Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काण्वसंहिताभाष्यसंग्रहः

आनन्दबोधभट्टोपाध्यायप्रणीतः

चतुर्थो दशकः

[३१-४० अध्यायात्मकः]

पु० सं० २७.६०
व द २२

डा० सुभद्रझा - व्रजवल्लभद्विवेदाभ्यां

सम्पादितः ।

सारस्वती सुषमा

भाद्रः २०११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रास्ताविकं निवेदनम्

शुक्लयजुर्वेदीयकाण्वसंहितायाः (३१–४०) अध्यायात्मकस्य चतुर्थदशकस्य श्रीमदानन्दबोधभट्टोपाध्यायविरचितं काण्वसंहिताभाष्यसंग्रहनामकमप्रकाशितपूर्वं भाष्यं साम्प्रतमुपस्थाप्यते ग्रन्थरूपेण विदुषां वैदिकगवेषणानिरतानां पुरतः। ग्रन्थोऽयं त्रयाणां कोषाणां साहाय्येन संपादितः। तत्र क०ख०संकेताभ्यां सूचितौ कोषौ सरस्वतीभवनस्थौ, 'ग' संकेतेन सूचितः कोषस्तु होशियारपुरस्थविश्वेश्वरानन्दवैदिकशोधसंस्थानस्य। अयमत्रासां मातृकाणां परिचयः—

(क) ७७६ संख्याङ्कितः, १–१४४ पत्रात्मकोऽयं कोषः १०·१″ × ४·४″ आकारं बिभर्ति। प्रतिपत्रं विंशतिपङ्क्तयः, प्रतिपङ्क्त्यक्षराणि चत्वारिंशदासते। ३१ अध्यायादारभ्य ४०अ०पर्यन्तः संपूर्णोऽयं हस्तलेखः शुभ्रसुपुष्टतूलपत्राधारः शोभनदेवनागराक्षराङ्कितः शुद्धप्रायः। लिपिकारलिपिकालौ नैव ज्ञायेते।

(ख) ७७५ संख्याङ्कितः, १–९५, १०२–१३८ पत्रात्मकः कोषोऽयं ११″×५·४″ आकारकः। प्रतिपत्रं विंशतिपङ्क्तयः, प्रतिपङ्क्त्यक्षराणि २५–३० वर्तन्ते। ३१ अ० आरभ्य ४०अ०पर्यन्तः कोषोऽयं मध्ये खण्डितः, ९६–१०१ पत्राणामभावात्। बभ्रुवर्णजीर्णतूलपत्राधारे पठितुं योग्यैर्देवनागराक्षरैर्लिखितोऽशुद्धिभूयिष्ठोऽप्ययं हस्तलेखः संदिग्धपाठशोधनेऽतीव सहायकः। लिपिकारलिपिकालौ प्राग्वत्।

(ग) ५६५१ संख्याङ्कितः, १–७४ पत्रात्मक एष कोषः ९½″×४½″ आकारं धारयति। प्रतिपत्रं प्रायोऽष्टाविंशतिपङ्क्तयः सन्ति। ३१-३९ अध्यायात्मकः संपूर्णोऽयं हस्तलेखः सुपुष्टतूलपत्राधारः शोभनदेवनागराक्षराङ्कितः, गैरिकादिप्रदानेन संशोधितोऽत एवातीव शुद्धः सटिप्पणश्च। टिप्पणी चात्रोवटमहीधरभाष्यानुसारिणी। लिपिकारलिपिकालौ प्राग्वत्।

एषु क०ग०कोषौ समानस्रोतस्कौ, अशुद्धीनां पाठभेदानां च प्रायः समानत्वात्। ग०कोषस्थगैरिकसंशोधनं विजातीयेन कोषेणापि तस्य परिचयं प्रत्याययति, स च ख०कोषसदृशः स्यादिति वक्तुं शक्यते, संशोधनानां तदनुकूलत्वात्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वतीभवनेऽन्यत्र चाधुना काण्वसंहिताया आनन्दबोधीयं संपूर्णं भाष्यमुपलब्धम्। किन्तु भाष्यप्रकाशनारम्भसमयेऽस्मत्सविधे चतुर्थदशकस्यैव द्वौ कोषावास्ताम्, अतः प्राक् तस्यैव संपादने मतिर्नियोजिता। द्वात्रिंशाध्यायतश्च होशियारपुरस्थकोषेणापि महत्त्वाधायकं साहाय्यमाचरितम्। अतः सर्वप्रथमं विश्वेश्वरानन्दवैदिकशोधसंस्थानसंचालकेभ्यः श्रीविश्वबन्धुशास्त्रिभ्यो बहुमानपुरस्सरा कृतज्ञता ख्याप्यते।

चत्वारिंशाध्यायस्थख०कोषस्य संपादनमानन्दाश्रममुद्रितभाष्यसाहाय्येन, क०कोषस्य च शाङ्करभाष्यमवलम्ब्य कृतम्। अत्र भाष्यसंशोधने यदावाभ्यां प्रयतितं तदुभयोर्भाष्ययोर्दृङ्निक्षेपमात्रेणैव विद्वद्भिरवगन्तुं सुशकम्।

बहुषु स्थलेषु कोशत्रयेऽपि समाना अशुद्धयो विद्यन्ते। तादृशेषु स्थलेषु पाठसंशोधने महाविद्यालयाध्यापकैः प्रत्युत्पन्नशेमुषीकैः श्रीरघुनाथशर्मभिः क्वचिच्च पण्डितराजश्रीराजेश्वरशास्त्रिद्रविडमहाभागैः स्तुत्यं साहाय्यमाचरितम्। भाष्योद्धृतवचनमूलस्थलपरिज्ञानदिशि म०म०श्रीगोपीनाथकविराजमहोदयैः, वेदवाणीसंपादकैः श्रीयुधिष्ठिरमीमांसकैः, गोयनकाग्रन्थालयाध्यक्षैः श्रीकृष्णदत्तपन्तमहाशयैश्चानुकूलो निर्देशः प्रदत्त इति सर्वे महानुभावाः कथमावाभ्यां संमाननीयेति न जानीवः। सरस्वतीभवनस्थान् श्रीरघुनाथपाण्डेय-श्रीचन्द्रभानुपाण्डेय-श्रीतारकनाथभट्टाचार्य-श्रीनिशाकान्तपाठकांश्च सहयोगप्रदानाय धन्यवादैर्भूषयावः।

आशास्यतेऽवशिष्टं भाष्यांशमपि शीघ्रमेव विदुषां पुरतः समुपस्थाप्येतेति। संपूर्णे भाष्ये प्रकाशिते सत्येव विस्तृता भूमिकाऽपि प्रकाशिता स्यात्। अधुना तु—"गच्छतः स्खलनं क्वापि" इति कुमारिलभट्टवचनमनुसरद्भ्यामावाभ्यां विद्वांसस्त्रुटिक्षमापनाय प्रार्थ्यन्ते—

विदुषां वशंवदाभ्याम्—

डा० सुभद्रझा-

व्रजवल्लभद्विवेदाभ्याम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

*काण्वसंहिताभाष्यसंग्रहः

आनन्दबोधभट्टोपाध्यायप्रणीतः

चतुर्थो दशकः

एकत्रिंशोऽध्यायः

समिद्धो[1] अञ्जन्नाश्वमेधिकोऽध्यायः'। आद्या एकादश त्रिष्टुभः आग्नेय्यः अश्वस्तुतिः। ऋषिर्बृहदुक्थो वामदेवः, अश्वो वा सामुद्रिः। तथा च—"समिद्धो अञ्जन्कृदरं मतीनामिति बार्हदुक्थीभिराप्रीणीयाद् बृहदुक्थो ह वै वामदेव्योऽश्वो वा सामुद्रिरश्वस्याप्रीर्ददर्श। ता एतास्ताभिरेवैनमेतदाप्रीणीम इति वदन्तो न तथा कुर्याज्जामदग्नीभिरेवाप्रीणीयात् प्रजापतिर्वै जमदग्निः सोऽश्वमेधः स्वयैवैनं[2] देवतया समर्धयति" इत्यादिश्रुतेः [शत. ब्रा. १३।२।२।१४]। [3]पाठस्तु—

समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः।
वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम्॥ १॥

इति। (मा. २९।१)

---

* श्रीमदानन्दबोधभट्टोपाध्यायकृतशुक्लयजुर्वेदीयकाण्वसंहिताभाष्यसंग्रहो न केनचिदिदानीं यावत् प्रकाश्यं नीतः। तस्य चतुर्थदशकस्य द्वौ आदर्शग्रन्थौ सरस्वतीभवने काश्यां वर्तेते। तावेवानुसृत्य भाष्यसंग्रहोऽयमत्र प्रकाश्यते। तयोरेकः 'क'-पदेनापरस्तु 'ख'-पदेनात्र सूचितः।

अन्येभ्यः स्थानेभ्योऽपि भाष्यसंग्रहस्य ग्रन्थान् प्राप्तुं यतमानोऽहमाशासे यत् कतिपुचिद्देव वर्षेषु सम्पूर्णं भाष्यसंग्रहं पाठकमहोदयानां करकमलानि प्रापयिष्यामीति—सम्पादकः।

१ 'समिद्धो अञ्जन्निति। आश्वमेधिकोऽयमध्यायः।' इति खपुस्तकस्थः पाठः।

२ 'स्वयै'''यति' इति खपुस्तके नास्ति।

३ 'पाठस्तु' इति, सम्पूर्णो मन्त्रः, 'इति' इति च खपुस्तके नास्ति। एवमेवाग्रेऽपि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे श्रीभगवन्नग्ने, समिद्धः संदीप्तः। अञ्जन् 'अञ्जू [1]व्यक्तिम्लक्षणकान्तिगतिषु' [१४५६ रुधादिः] अभिव्यक्तिं कुर्वन्। कृद्रम्। वर्णव्यत्ययः। अरंकृत् अलंकृत्[2] मतीनाम् अलंकर्ता। मधुमत् [3]मधुरसवत्। घृतं पिन्वमानः 'पिन्व पिन्व[4] सेचने' घृतसेचनं कुर्वाणः, यजमानेन दत्तं घृतमादाय देवान् प्रति सिञ्चन् स्वात्मानं च प्रति। वाजी स्वयं हविर्लक्षणान्नवान्। वाजिनम् [5]वाजिलक्षणं विशिष्टं हविः। वहन् देवान् प्रति वहन् प्रापयन्। हे श्रीजातवेदः, देवानां प्रियं मधुमद् घृतम्। आसधस्थम् सह स्थितम्। देवान् प्रति आवक्षि 'वह प्रापणे' [१००४ भ्वादिः] आभिमुख्येन प्रापय ॥ १ ॥

घृतेनाञ्जन्त्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान्।
अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि ॥ २ ॥
(मा. २९।२)

असौ [वाजी। [6]वेजनवान्] देवानप्येत्विति सम्बन्धः। किं कुर्वन्नेत्विति घृतेन आज्येन पथो देवयानान् मार्गान् अभिव्यक्तिं कुर्वन् प्रजानन् देवान् ऋतुसम्बन्धिनो देवान् प्रकर्षेण जानन् अवगच्छंश्च। तान् देवान् प्रति एतु गच्छतु। किं च, अनु त्वा सप्ते प्रदिशः सचन्ताम्। हे सप्ते, [7]प्रदिशः सचन्ताम्। हे सप्ते हे अश्व। तं त्वां प्रदिशः प्रदिगुपलक्षितानि भूतानि। सचन्ताम् 'षच समवाये' [९९७ भ्वादिः] समवायिकुरुताम् अनुसंगच्छन्तु[8]। किं च, स्वधामस्मै यजमानाय धेहि। अस्मै यजमानाय। स्वधाम् अन्नम्। धेहि प्रयच्छ ॥ २ ॥

तत्स्थाने भाष्यारम्भे 'समिद्धो अञ्जन्निति।' इत्येवं प्रकारेण सर्वत्र मन्त्रस्य प्रतीक एवोद्धृतः। अत्र तु द्वितीयमन्त्रतः खपुस्तकस्थं प्रतीकम्, कपुस्तकस्थौ 'पाठस्तु', 'इति' इति पाठौ च विहाय केवलो मन्त्र एव प्रदीयते।

१ 'व्यक्तिम्रक्षणगतिषु' इति खपुस्तके। 'व्यक्तिम्रक्षणकान्तिगतिषु' इति तु धातुपाठस्थः पाठः। २ '.....कृत्। अरंकृत् मती.....' इति खपुस्तके। ३ मधुररसवत्—खपुस्तके।

४ पिन्व मिन्व-ख०। वस्तुतस्तु 'पिवि मिवि णिवि सेचने' [५८८-९० भ्वादिः]।

५ 'वाजिनलक्षणम्' इति—क० ख०। ६ 'वाजिनवान्' इति—क०ख०।

७ 'हे सप्ते, प्रदिशः सचन्ताम्' इति नास्ति—ख०। ८ अनुगच्छन्तु—क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ ३ ॥
(मा. २९।३)

हे वाजिन्, ईड्यः स्तुत्योऽसि। वन्द्यश्च नमस्कार्योऽसि। आशुः शीघ्रगामी असि। मेध्यश्च यज्ञार्होऽसि। हे सप्ते सरणशील। अग्निष्ट्वा देवैरिति। अश्वं त्वां वसुभिर्देवैः सह सजोषाः जातवेदाः। जातप्रज्ञानः श्रीभगवानग्निः। त्वां दृष्ट्वा प्रीतं जातं वह्निं देवानां हविर्वाहकं प्रापकम्। वहतु [1]प्रापयतु ॥ ३ ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम्।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ ४ ॥
(मा. २९।४)

पृथिव्यां वेद्याम्। उरु। [2]पृथु स्थूलम्। प्रथमानं पृथुभावमापद्यमानम्। स्तीर्णं विस्तीर्णम् आस्तृतं बर्हिः। जुषाणा। व्यत्ययः। [[3]जुषाणम् [4]सेवमानम्।] [5]सुष्टरीमा 'स्तृञ् आच्छादने' [१२५३ स्वादिः] शोभनमावरणं कुर्मः। अश्वं प्रतीति शेषः। देवेभिर्युक्तमदितिः सजोषाः। देवेभिः [[6]देवैः] युक्तमश्वम्। सजोषं समानजोषणम्। स्योनं सुखम्। कृण्वाना। अदितिः देवमाता। सुविते [7]सुष्ठु इते खाद्ययुक्तप्रदेशे। दधातु स्थापयतु ॥ ४ ॥

एता उ वः सुभगा विश्वरूपा विपक्षोभिः श्रयमाणा उदातैः।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥
(मा. २९।५)

[8]हे सुभगाः सौभाग्यसंपन्ना हे ऋत्विग्यजमानाः आश्वमेधिकाः। वः युष्माकम्। एता उ एव द्वारः [9]अश्वमेधयज्ञद्वारः। सुप्रायणाः भवन्तु। ताः कथंभूता इति। विश्वरूपा विपक्षोभिः।

---

१ 'प्रापयतु' नास्ति-ख०। २ 'पृथु' इति नास्ति-क०। ३ जुषाणाः-क०, जुषाणां-ख०। ४ सेवमानाः-क०, सेवमानां-ख०। ५ सुष्टरीम-क०। ६ वेति-क० ख०। ७ सुष्ठु रस्मायुक्तप्रदेशे-ख०। ८ 'हे सुभगाः' इति नास्ति-ख०। ९ यज्ञगृहद्वारः-ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यत्ययः । विपक्षाभ्याम् उभयपार्श्वाभ्यां विश्वरूपाः विचित्ररूपाः चित्रपक्षैर्विचित्रिताः । श्रयमाणा उद्आतैः । उत् आतैः 'अत सातत्यगमने' [३८ भ्वादिः] [1]उत्कृष्टगन्तृभिः श्रयमाणाः आश्रयमाणाः सेवमानाश्च । भवन्तु सन्तु । ऋष्वाः सतीः सुषिराः सतीः । कवषः [[2]कुषिताः] । शुम्भमानाः शोभमानाः । द्वारो देवीः देव्यः । सुप्रायणाः सुप्रशमनयुक्ताः । भवन्तु ॥ ५ ॥

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वाᳫँ सुहिरण्ये सुशिल्पे ऋतस्य योना इह सादयामि ॥ ६ ॥
(मा० २९।६)

[3]अन्तरा मध्ये । मित्रावरुणा अन्तरा मित्रावरुणयोर्मध्ये । मित्र इत्ययं लोकः । वरुण इत्यसौ लोकः । "अयं वै लोको मित्रोऽसौ वरुणो यदेवेदमन्तरेण" इति श्रुतेः [शत० ब्रा० १२।९।३।१२] । मित्रावरुणयोर्द्यावापृथिव्योर्मध्ये । मुखं यज्ञानामभिसंविदाने । यज्ञानां मुखम् अग्निहोत्रम् । अभि आभिमुख्येन । संविदाने अग्निहोत्रस्य होमकाले संविदाने संवादयन्त्यौ कथयन्त्यौ होमकालं सूचयन्त्याविव । उषासा । नक्तशब्दस्याध्याहारः । नक्तोषासा । छान्दसं पदम् । नक्तोषसे । चरन्ती चरन्त्यौ भवतः । वां सुहिरण्ये सुशिल्पे ऋतस्य योनौ । तयोः वां युवयोः सम्बन्धिनि । सुहिरण्ये साधुहिरण्ये हिरण्यालङ्कारभूषिते । सुशिल्पे शोभनविचित्रयुक्ते । ऋतस्य सत्यस्य । इह अस्याम् । योनौ स्थाने । दम्पती यजमानौ । [4]सादयामि । एवं स्थापनादिद्वारा अश्व एव स्तूयते ॥ ६ ॥

प्रथमा वाᳫँ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥
(मा० २९।७)

---

१ उत्कृष्टां गन्तृभिः–क० । २ कवषः कविताः–क० ख० ।
३ 'अन्तरा मध्ये मित्रावरुणा । मित्रावरुणा अन्तरा' इति खपुस्तकपाठः ।
४ सादयामि स्थापयामि–खपुस्तके ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमा वाम् । प्रथमा होतारा हे [1]प्रथमौ होतारौ । अयं चाग्निरसौ मध्यमो वायुरित्येतौ होतारौ । कथंभूतौ । सरथिना सरथिनौ समानरथवन्तौ । सुवर्णा सुवर्णौ शोभनवर्णवन्तौ । देवौ द्योतनादिगुणवन्तौ [2]मध्यस्थतया पश्यन्तौ भुवनानि विश्वा । विश्वा सर्वाणि भूतानि पश्यन्तौ । श्रीभगवदात्मकत्वेन भुवनानां साक्षाद्द्रष्टारौ । [3]वां युवाम् । अपिप्रयम् । [4]प्रीणातेर्णिजन्तस्य लुङि उत्तमैकवचनस्यैतद्रूपम् । एवं गुणयुक्तौ होतारौ [5]प्रीणितवानस्मि युवयोः प्रीणनं कृतवानस्मि । चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता । चोदना चोदनेति चोदनाप्रमाणकं कर्म लक्ष्यते । वां युवयोः दम्पतीयजमानयोः युवयोः । मिमाना मिमानौ । ज्योतिः पारमार्थिकं ज्योतिःस्वरूपम् । दिशन्ता हितमुपदिशन्तौ होतारौ । प्रदिशा । व्यत्ययः । [6]प्रदिशतम् उपदिशतमित्यर्थः ॥ ७ ॥

आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत् ।
इळोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ ८ ॥

(मा. २९।८)

आदित्यैर्नः । देवैः सहिता श्रीभारती । नः अस्माकम् । वष्टु यज्ञम् । वष्टु 'वश कान्तौ' [१०८० अदादिः] कामयन्ती सरस्वतीदेवता रुद्रैः सहिता । नः अस्मान् । आवीत् अवतु । इळोपहूता वसुभिः । अत्रोपहूता इळानाम देवी वसुभिः सहिता । सजोषाः समानप्रीतिमती । नः अस्मान् । आवीत् अवतु । एवं संस्तुताः अपरोक्षीकृताः [7]स्त्रियो देव्यः । नः अस्माकम् । यज्ञम् । हे देव्यः, अमृतेषु देवेषु । यूयं धत्त स्थापयत ॥ ८ ॥

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥ ९ ॥

(मा० २९।९)

---

१ 'प्रथमौ' इति नास्ति–ख० । २ अध्यस्ततया–ख० । ३ 'तौ कौ वाम्' इति–क-ख० । ४ प्रीणयतेरेतद्रूपम्–ख० । ५ प्रीणीतवान्–ख० । ६ प्रदिशतेव पदस्थितमित्यर्थः–ख० । ७ 'तिस्रो देव्यः' इति उवटमहीधरौ ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वष्टा यः [1]पत्रादितनूकरणकर्ता संहरणकर्ता । देवकामं देवैः काम्यमानमृणत्रयापाकरणदक्षम् । वीरं पुत्रम् । जजान 'जनी प्रादुर्भावे' [११४९ दिवादिः] जनयति । किं च, त्वष्टुः सकाशात् । अर्वा अरणभूतः । आशुः शीघ्रगामी । अश्वः उक्तलक्षणः । जायते । त्वष्टेदं विश्वं भुवनं जजान । इदं विश्वं सर्वं भुवनजातम् । त्वष्टा जजान जनयति । तमेव गुणसंपन्नं बहोः बहुविधभूतग्रामस्य कर्तारं श्रीभगवन्तं त्वष्टारम् । होतः, इह यज्ञे । यक्षि यजस्व ॥ ९ ॥

अश्वो घृतेन त्मन्या समक्त उप देवाँ २ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १० ॥

(मा. २९।१०)

अश्वः । त्मन्या । छान्दसं पदम् । आत्मना स्वयमेव । घृतेन समक्तः [2]सञ्जितः । उपदेवानृतुशः । ऋतावृतौ पाथः देवानामन्नं भूत्वा । देवान् उपैतु उपगच्छतु । किं च, [3]वनस्पतिः प्रयाजदेवता । देवलोकं प्रजानन् अवगच्छन् स्वयमश्वस्य देवलोकं दर्शयन्नुपगच्छतु । किं च, अग्निना हव्या । अग्निना च शामित्रेण । स्वदितानि [4]मुष्टीकृतानि । हव्यानि हवींषि । वक्षत् अश्वः वनस्पतिश्च वहतु[5] ॥ १० ॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥ ११ ॥

(मा. २९।११)

हे श्रीभगवन्नग्ने, त्वं प्रजापतेस्तपसा जातः । सद्यो वावृधानः अतिशयेन वर्द्धमानः । यज्ञं दधिषे [6]देवताभ्योऽर्थाय धारयसि । स्वाहाकृतेन हविषा [7]स्वाहाकारेण संपादितेन हविषा

---

१ पापादि—ख० । २ स्मजीत-ख० । ३ 'वनस्पतिः .... किं च' इति कपुस्तके नास्ति । ४ 'मृष्टीकृतानि' इति उवटः, 'मिष्टीकृतानि' इति महीधरः । ५ वहत्-ख० । ६ देवताभ्यर्थायसि-ख० । ७ 'स्वाहाकारेण संपादितेन हविषा' इति नास्ति-ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह । स्वभावतः पुरोगाः अग्रयायिन्, [1]त्वं याहि । देवलोकं प्रतीति शेषः । तत्र साध्या नाम देवाः [2]त्वया यद्धुतं हविः । अदन्तु भक्षयन्तु ॥ ११ ॥

इत उत्तरमश्वस्य रक्षिणस्तद्युद्धोपकरणानि च स्तूयन्ते—

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।

समुषद्भिरजायथाः ॥ १२ ॥ (मा० २९।३७)

आग्नेयी गायत्री । ऋषिर्मधुच्छन्दाः । केतुं कृण्वन्नकेतवे । केतुरिति प्रज्ञानाम [निघ० ३।९] केतुः प्रज्ञा न विद्यते यस्य स अकेतुस्तस्मै अकेतवे प्रज्ञानशून्याय लोकाय । हे श्रीभगवन्नग्ने, त्वाम् अकेतवे केतुं प्रज्ञाम् । मर्याः मनुष्याः ब्राह्मणास्ते सर्गादौ सृष्टाः । कृण्वन् कुर्वन् । पेश इति सुवर्णनाम [निघ० १।२] । पेशो न विद्यते यस्य स अपेशस्तस्मै अपेशसे । अग्निं त्वां पेशः कृण्वन् । यद्वा पेश इति सुखनाम । अपेशसे सुखरहिताय । त्वामेव पेशः कृण्वन्तु । [3]अतस्त्वत्त एव सर्वेषां सुखं भवतीति प्रसिद्धम् । समुषद्भिरजायथाः । 'उष दाहे' [६९९ भ्वादिः] । उषद्भिः हवनं कुर्वद्भिः अग्निहोत्रादिहवनं कुर्वद्भिर्यजमानैः । अजायथाः जातोऽसि । यद्वा वसतेः कृतसंप्रसारणस्यैतद्रूपम् । उषद्भिरित्यग्निं [4]प्रति निवसद्भिर्यजमानैररण्यामजायथाः । यस्त्वं जातोऽसि तमग्निं त्वां केतुं कृण्वन्निति सम्बन्धः ॥ १२ ॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।

अनाविद्धया तन्वा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥ १३ ॥

(मा० २९।३८)

लिङ्गोक्तदेवत्या त्रिष्टुप् । ऋषिर्भरद्वाजः । जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । 'मदि [5]स्तुतिमोदमदस्वप्नगतिषु' [१३ भ्वादिः] । समदः संग्रामाः । सशब्दः सहार्थः, सह योद्धारः सह परस्परं यत्र माद्यन्तीति समदः संग्रामाः । तेषां समदां

---

१ त्वा—ख० । २ त्वयोपवहत्वम्—ख० । ३ 'अतः' नास्ति—ख० । ४ प्रसवद्भिः—ख० । ५ 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' इति धातुपाठस्थः पाठः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संग्रामाणाम् । उपस्थे उत्सङ्गे[१] । यत् यदा । वर्मी कवची । वर्मणा संनद्धः । याति गच्छति । तदा जीमूतस्य [२]मेघस्य । प्रतीकं मुखमिव, मेघस्य मुखे यथा विद्युत्स्तनितादि भवति तद्वत् स्तूयते । तथा हस्त्यश्वरथपदातीनां परस्परं संनादः शस्त्रास्त्राणां परस्परं संघर्षः स्फुरणादीन्यपि भवन्तीति[३] एवमतो ब्रवीमि । अनाविद्धया तन्वा जय । अक्षतया तन्वा शरीरेण जय । त्वा वर्मणो महिमा पिपर्तु । वर्मणो महिमा माहात्म्यम् । त्वा योद्धारं त्वाम् । पिपर्तु पालयतु 'पॄ पालनपूरणयोः' । [१०८६ जुहोत्यादिः] त्वयि सर्वाणि बलानि पूरयतु त्वां संपूर्णशक्तिं करोतु ॥ १३ ॥

धन्व॑ना॒ गा धन्व॑ना॒जिं ज॑येम॒ धन्व॑ना ती॒व्राः स॒मदो॑ जयेम ।
धनुः॒ शत्रो॑रपका॒मं कृ॑णोति॒ धन्व॑ना॒ सर्वाः॑ प्र॒दिशो॑ जयेम ॥ १४ ॥

(मा० २९।३९)

धनुःस्तुतिः । त्रिष्टुप् । भरद्वाजः । धन्वना धनुषा । गाः [४]भुवः प्रदेशविशेषान् देशान् । जयेम । धन्वना धनुषा । आजिं [५]मार्गम् । जयेम । धन्वना तीव्राः [६]अतिपटवः उद्गूर्णायुधाः । समदः संग्रामाननेकान् । जयेम । धनुः अस्मदीयं धनुः । शत्रोः वैरिणः । अपकामम् अपगतार्थफलशून्यकामम् तं शत्रोः कामं विफलम् । [७]कृणोति [८]करोतीत्यर्थः । धन्वना सर्वाः [९]दिशः प्रदिशः विदिशश्च जयेम ॥ १४ ॥

ते आ॒चर॑न्ती॒ सम॑नेव॒ योषा॑ मा॒तेव॑ पु॒त्रं बि॑भृतामु॒पस्थे॑ ।
अप॒ शत्रू॑न् विध्यतां᳖ संविदा॒ने आर्त्नी॑ इ॒मे वि॑ष्फु॒रन्ती॑ अ॒मित्रा॑न् ॥१५॥

(मा० २९।४१)

---

१ उत्सङ्गे चरणरङ्गे–क० । २ 'मेघस्य । प्रतीकं मुखमिव' इति नास्ति–क० । ३ 'भवन्तीति भावयते' इति–क-ख० । ४ 'भुवः' स्थाने 'मातुः'–ख० । ५ 'मार्गम्' नास्ति–ख० । ६ 'अतिपटवः उद्गूर्णायुधाः' इत्यस्य स्थाने 'अविवा' इत्येव पाठः–ख० । ७ कृणुत–ख० । ८ करोत्वित्यर्थः–ख० । ९ 'दिशः प्रदिशः विदिशश्च जयेम' इत्यस्य स्थाने 'प्रदिशः प्रदिशश्च जयेम' इति पाठः–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनुषः कोटी स्तूयेते । त्रिष्टुप् । ये इमे आत्मधनुषः कोटी ते आचरन्ती समनेव योषा । समना समानवचना । सुयोषेव भार्येव । मातेव पुत्रम् । उपस्थे उत्सङ्गे । बिभृतां धारयताम् । अप शत्रून् विध्यताम् । 'व्यथ [व्यध] ताडने' [११८१ दिवादिः], शत्रून् अपविध्यताम् । संविदाने परस्परं संवादं कुर्वाणे । इमे आर्त्नीं धनुषः । विस्फुरन्ती विस्फुरन्त्यौ विशेषेण स्फुरन्त्यौ स्फुरणवन्त्यौ । अमित्रान् शत्रून् । अपविध्यताम् । समना । समने इति व्यत्ययः । समनस्के । योषा । योषे इति व्यत्ययः । पतिमित्यध्याहारः । इव यथा समनस्के योषे भार्ये एकं पतिं बिभृताम्, माता च पुत्रमुत्सङ्गे बिभर्ति, तथा ये आर्त्नीं इमे अस्मदीये धनुषः कोटी ते । ज्यामित्यध्याहारः । ज्यामाचरन्ती आचरन्त्यौ ज्याः बिभृताम् । किं च आर्त्नीं धनु[षः] कोटी । विस्फुरन्ती विस्फुरन्त्यौ । अमित्रान् शत्रून् । अपविध्यताम् अमित्रान् तान् ताडयताम्[1] ॥ १५ ॥

वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वन् ज्या इयꣳ समने पारयन्ती ॥ १६ ॥
(मा. २९।४०)

ज्यास्तुतिस्त्रिष्टुप । 'वच परिभाषणे' [१०६३ अदादिः] । वक्ष्यन्तीव अभिधास्यन्ती इव । इत् आगनीगन्ति आगच्छन्ती । कर्णं कर्णमूलम् । प्रियं सखायमिव । परिषस्वजाना 'षञ्ज ? [स्वञ्ज] परिष्वङ्गे' [९७६ भ्वादिः] परिष्वङ्गं कुर्वन्ती आलिङ्गनं कुर्वन्ती । योषा इव । शिङ्क्ते 'शिजि अव्यक्ते शब्दे [१०२७ अदादिः] वर्णाभिव्यक्तिशून्यं शब्दं करोति । यथा योषा कामुका रतिकाले अव्यक्तशब्दं वदतीव । वितताधि धन्वन् ज्या इयं समने पारयन्ती । धन्वन् धन्वनि उपरि । वितता व्याप्ता । इयं ज्या । समने संग्रामे । पारयन्ती [2]संग्रामात्तारयन्तीति ज्या स्तुता ॥ १६ ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांꣳसं परिपातु विश्वतः ॥ १७ ॥
(मा. २९।५१)

---

१ ताडयन्ती—क० ख० । २ 'पारयन्ती' इत्यस्याग्रे 'जयन्ती' इत्यधिकं खपुस्तके ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्तघ्नः स्तूयते। हस्ते स्थितो यो ज्यया हन्यत इति हस्तघ्नः, यश्चर्मादिभिर्निर्मितो हस्तरक्षकः स हस्तघ्न इति। हस्तघ्नदेवत्या त्रिष्टुप्। ऋषिर्भरद्वाजः। यः अहिरिव सर्प इव। भोगैः स्वशरीरावयवैः। पर्येति बाहुं हस्तं पर्येति परिवेष्टयति। ज्याया हेतिम्। छान्दसं पदम्। हेतिम् [1]आयुधम्। परिबाधमानः परिहरन्। हस्तघ्न इति विशेष्यपदम्। एवं गुणो हस्तरक्षकः। विश्वा विश्वानि सर्वाणि। [2]वयुनानि प्रज्ञानानि सर्वापायविषयाणि। विद्वान् जानन्। यं देवतात्वेन स्तौति। पुमान् पुंस्त्ववान्। शूरः अक्लीबः। पुमांसं स्वधारक्षकम्। विश्वतः सर्वतः। परिपातु रक्षतु॥ १७॥

ब॒ह्वी॒नां पि॒ता ब॒हुर॑स्य पु॒त्रश्चि॒श्चा कृ॑णोति॒ सम॑नाव॒गत्य॑।
इ॒षु॒धिः स॒ङ्काः पृत॑नाश्च॒ सर्वाः॑ पृ॒ष्ठे निन॑द्धो जयति॒ प्रसू॑तः॥ १८॥
[मा. २९।४२]

इषुधिः स्तूयते। इषुधिदेवत्या त्रिष्टुप्। बह्वीनाम् इषूणाम्। पिता पालकः। तेन हीषवः पाल्यन्ते। [3]बहूनामाधारत्वेनोपचारः। स्वयमपीषुधिर्बहुरित्युच्यते। अस्य इषुसमूहस्य [4]पुत्रस्ताभिः स्वोदरपूरणेन त्रायत इति पुत्रः। चिश्चाकृणोति समनावगत्य। स इषुधिः समनान् संग्रामान्। [5]अवगत्य ज्ञात्वा। चिश्चाकृणोति शब्दानुकरणम्। स हि इषौ निष्क्रम्यमाणे चिश्चेति शब्दं करोति। तत्र संग्रामेषु स इषुधिः धानुष्केण पृष्ठे निनद्धः 'णह बन्धने' [११६६ दिवादिः] नितरां धानुष्मतः अपरभागे बद्धः। प्रसूतः अनुज्ञातश्च सन्। संकाः संकाशं दधतेऽस्मिन् योधा इति संकीर्यन्ते वाऽस्मिन् योधा इति संकाः, शत्रुसंकटं

---

१ आघातम्–क०। आयुधघातम्–ख०।

२ 'वयुनानि प्रज्ञानानि सर्वापायविषयाणि' इत्यस्य स्थाने 'वयुनानि सर्वोपायविषयाणि' इति–ख०।

३ बहूनामित्यतः प्राक् 'बहुः' इत्यधिकं खपुस्तके।

४ 'पुत्रस्ताभिः स्वो.....' इत्यस्य स्थाने 'पुत्रः नातिस्वो.....' इति पाठः–ख०।

५ 'अवगत्य ज्ञात्वा' इत्यादिव्याख्यानं खपुस्तके नास्ति। तत्स्थाने–'अततिस्तू विक्षेपे संग्रामे तातारिता वितता संक्षीय इति संकाः। वर्णलोपश्छान्दसः। सर्वाः पृतनाः इषुधिः जयतीति' इति पाठः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा । 'कॄ विक्षेपे' [१४१० तुदादिः] । संग्रामे जालविततिवत् संकीर्यन्ते इति संका इति पृतनाविशेषणं वा । वर्णलोपश्छान्दसः । पृतनाः इषुधिर्जयतीति स्पर्द्धनीयतमाः संग्रामभक्तीः सर्वाः ॥ १८ ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ १९ ॥
[मा. २९।४८]

इषुं स्तौति । इषुदेवत्या त्रिष्टुप् । सुपर्णं वस्ते । या इषुः सुपर्णम् । सुपर्णः पक्षी तद्विकारः सौपर्णस्तम् । वृद्धिलोपश्छान्दसः । सुपर्णं पक्षम् । [1]वस्ते । पुंस्त्वनिबन्धनार्थमिति शेषः । मृगो अस्या दन्तः । या इषुस्तस्या अस्या इषोर्दन्तः दन्तवद्दन्तः शत्रूणां [2]प्राणभक्षणसाधनाद् दन्तः [3]नाराचाग्रः । मृगश्च[4]वेध्यं मृगयन्त इति मृगः । गोभिः [5]वायुभिः वीर्यवद्भिः । संनद्धा संबद्धा[6] । पतति प्रसूता शत्रुबलं प्रति प्रसूता धनुषः प्रणोदिता पतति । यत्रा नरः सं च वि च द्रवन्ति । तत्र तस्मिन् प्रदेशे नरः योद्धारः इषवश्च अभिद्रवन्ति गच्छन्ति तत्रास्मभ्यम् इषुः संग्रामे प्राप्ते च । शर्म सुखम् । शर्म शरणं वा । यंसन्[7] अयंसन् यच्छन्तु ॥ १९ ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥ २० ॥
[मा. २९।५२]

रथदेवत्या त्रिष्टुप् । हे वनस्पते, वीड्वङ्गः । वीडुशब्दो दृढवचनः [निघ० २।९, निरु० ६।१२] । दृढः[8] दृढाङ्गः । भूयाः भव । हि यस्माद् [9]वीड्वङ्गस्तस्मात् । अस्मत्सखा

१ 'वस्ते' नास्ति—ख० । २ प्राणरक्षण—क० । ३ नराचाग्रः—क० । ४ 'वेध्यम्' इत्यस्य स्थाने 'तेभ्यः'—ख० । ५ 'वायुभिः' इत्यस्य स्थाने 'बहुभिः'—ख० । ६ 'संबद्धा' नास्ति—ख० । ७ 'यंसन् संसत् अयंसत् यच्छतु' इति खपुस्तके । ८ 'दृढः दृढाङ्गः' इत्यस्य स्थाने 'दृढः हि' इति पाठः—ख० । ९ 'वीड्वङ्गस्तस्मात् । अस्मत्' इति नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतरणः । प्रतरन्ति संग्राममनेनेति प्रतरणः । सुवीरश्च विक्रान्तश्च । गोभिः संनद्धः । [१]गोविकारैश्चर्मभिः संनद्धोऽसि[२] । अतस्त्वां ब्रवीमि । वीळयस्व आत्मानं संस्तम्भय दृढीकुरु च । आस्थाता ते । तव आस्थानस्य कर्ता च । जयतु जेत्वानि । जेतव्यानि जयतु ॥ २० ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥२१॥
(मा. २९।४३)

[३]सारथिरस्याश्च देवता । जगती । पूर्वोक्त एव ऋषिः । रथे स्यन्दने तिष्ठन् सारथिम् नयति । वाजिनः [[४]अश्वान्] नयति । पुरः पूर्वम् । [५]सुषारथिः सुशोभनः सारथिर्यस्य स सुषारथिः । [६]रथी पूर्वं प्रथमं यत्र यत्र कामयते यं यं देशं यं यं योद्धारं वा गन्तुं ज्ञातुं च इच्छति तं देशं रथे तिष्ठन् सारथिर्नयतीति सम्बन्धः । अभीशूनां महिमानं पनायत । अभीशूनां प्रग्रहाणां रविकराणाम् । महिमानं माहात्म्यम् । पनायत । 'पण व्यवहारे' [स्तुतौ च ४३९, पन च ४४० भ्वादिः] । पनायत व्यवहरतेति । स्वेच्छया रज्ज्वाकर्षणादिकं करोति । मनः पश्चादनुयच्छन्ति रश्मयः । पश्चाद् अश्वस्य मनः रश्मयोऽपि यच्छन्ति नियमयन्तीति ॥ २१ ॥

आजङ्घन्ति सान्वेषां जघनाँ २ उपजिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥२२॥ (मा. २९।५०)

कशां स्तौति । कशादेवत्यानुष्टुप् । आजङ्घन्ति सान्वेषाम् । अश्वानां सानु सानुनि पार्श्वप्रदेशे अश्वारोहाः कशया आजङ्घन्ति । जघनान् जघनप्रदेशान् । उपजिघ्नते उपजिघ्नन्ति ताडयन्ति । अश्वाजनि प्रचेतसः । [७]अश्वानाम् अजनि 'अज गतिक्षेपणयोः' [२३० भ्वादिः]

---

१ गोविकारोश्चवर्मभिः—ख० । २ 'असि' स्थाने 'हि'—ख० ।
३ 'सारथिरस्याश्च'....[अश्वान्] नयति' इति कपुस्तके नास्ति ।
४ 'अस्मात्' इति—क० ख० । ५ 'सुषारथिः' नास्ति—ख० ।
६ 'रथी पूर्वं प्रथमम्' इत्यस्य स्थाने 'रथिपूर्वंत्रय' इति खपुस्तकपाठः ।
७ 'अश्वानाम् अजनि' इत्यस्य स्थाने 'अश्वानां याजनि' इति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

'णीञ् प्रापणे' [९०१ भ्वादिः] इति च। अजनमजः, अजो नीयते यया कशया सा भवति अजनिः। अश्वस्य अजनिः अश्वाजनिः। कशासंबोधनम्। हे अश्वाजनि, प्रचेतसः [1]प्रकृष्टज्ञानान् अश्वशिक्षाविधिज्ञानसंयत्नान्[2] अश्वान्। समत्सु संग्रामेषु। चोदय ॥२२॥

उप॑श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्।
स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑सेध॒ शत्रू॑न् ॥२३॥

(मा. २९।५५)

दुन्दुभिदेवत्या त्रिष्टुप्। उपश्वासय पृथिवीमुत द्याम्। हे दुन्दुभे, पृथिवीम् उपश्वासय 'श्वस प्राणने' [१०६६ अदादिः]। तव घोषेण पृथिवीम् आश्वासय अनातङ्कां कुरु। उत अपि। द्याम् उपश्वासय श्लथां कुरु। पुरुत्रा ते मनुतां विष्ठितं जगत्। पुरुत्रा बहुधा। ते त्वया। जगत् स्थावरजङ्गमात्मकं जगत्। त्वयैव स्थितं विशेषेण स्थितं सुस्थितं जातमिति। मनुतां जानातु। दुन्दुभे, सजूरिन्द्रेण देवैश्च सजूः समानप्रीतिः समानजोषणः। दूराद्दवीयः दूरादपि दूराद् अतिदूरादेव। शत्रून् अपसेध अपगमय। अस्माकं च जयमावह ॥२३॥

यदक्र॑न्दः प्रथ॒मं जाय॑मान उ॒द्यन्त्स॑मु॒द्रादु॒त वा॒ पुरी॑षात्।
श्ये॒नस्य॑ प॒क्षा ह॑रि॒णस्य॑ बा॒हू उ॑प॒स्तुत्यं॒ महि॑ जा॒तं ते॑ अर्व॑न् ॥२४॥

(मा. २९।१२)

[3]त्रयोदशाप्रीरश्वस्तुतिः। त्रिष्टुभः। भार्गवो जमदग्निर्ददर्श दीर्घतमाश्च। अर्वन्, यत् यदा अक्रन्दः हेषितशब्दमकार्षीः अक्रन्दः। तदेत्याह—प्रथमं जायमानः। जायमानः प्रथमं यदक्रन्दः। कस्माज्जायमान इति? उद्यन्त्समुद्रादुत वा पुरीषात्। यश्च त्वं समुद्रात्। समुद्र इत्यन्तरिक्षनाम [निघ० १।३]। अन्तरिक्षात् समुद्रात् पार्थिवाद्वा समुद्रात्। यस्मात्कारणात् समुद्रवति कार्यं स समुद्रः। तस्मात् समुद्रात्। उद्यन् उद्गच्छन्। उत अपि वा[4]। पुरीषात्। पुरीषमित्युदकनाम [निघ० १।१२]। [5]उदकसंघात्। उद्यन् अक्रन्दः हेषितमकरोस्तदैव[6]।

---

१ प्रकृष्टप्रज्ञानान्—ख०। २ विधिज्ञान् सम्पन्नान्—ख०। ३ त्रयोदशाप्रीणः ताः अश्वस्तुतिः—ख०। ४ 'वा' स्थाने 'च'—ख०। ५ उदकसंघातात्—ख०। ६ तदैव हि—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]हे अर्वन्, तव महिमा उपस्तुत्यं जातम्। वेगवत्त्वादिश्रवणीयगुणैरुपस्तुत्यम् उपस्तवनार्हं जातमभूत्। वेगत्वादौ दृष्टान्तमाह—श्येनस्य पक्षा हरिणस्य बाहू। श्येनस्य शशादनस्य पक्षा पक्षौ लुप्तोपमं पदम्। पक्षाविवायमश्वो वेगवान्। हरिणस्य बाहू इव। लुप्तोपमं पदं चैतत्। बाहू शब्देनात्र पूर्वपादौ विवक्षितौ। तद्वद्वेगवानश्व इति। तव महि स्तुत्यं जातमिति। यद्वा श्येनस्य [2]पक्षौ हरिणस्य बाहू[3] अतिवेगवत्त्वादश्वोऽजैषीदिति शेषः ॥२४॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ २५ ॥

[मा. २९।१३]

यमेन जगन्नियन्त्रा नियामकेन। दत्तं तमश्वम्। इतस्त्रिषु स्थानेषु भूरादिषु आत्मानं तनोतीति त्रितः त्रिस्थानो वायुः। आयुनक् आयुनक्तवान्। इन्द्र एणं प्रथमो अध्यतिष्ठत्। प्रथम इन्द्रः सर्वेषामादिभूतः परमैश्वर्ययुक्तः। एनमश्वमध्यतिष्ठत् अधिष्ठानं कृतवान्। गन्धर्वो अस्य रशनाम्। अश्वस्य रशनां रज्जुम्। गन्धर्वः विश्वावसुः। अगृभ्णात् गृहीतवान्। सूरात् सूर्योपलक्षितसूर्यमण्डलात्। अश्वं वसवो नाम देवा निरतष्ट। [4]तक्षति करोति। अत्र तक्षतिः [5]करोतिकर्मा। [6]अकृष्टवन्तः [7]समभूमिं प्रतीति शेषः ॥ २५ ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ २६ ॥

[मा. २९।१४]

अश्वः स्तूयते। हे अर्वन् अश्व। त्वं यमोऽसि नियन्तासि। आदित्योऽसि। [8]त्रितोऽसि वायुरसि। गुह्येन [9]गोप्येन। व्रतेन कर्मणा। त्रितो भवति। सोमेन चन्द्रेण। समया [10]शमेन।

---

१ 'हे अर्वन्, तव महिमा' नास्ति—ख०। २ पक्षा—ख०। ३ बाहू च—ख०। ४ 'तक्षति करोति। अत्र तक्षतिः करोतिकर्मा' इत्यस्य स्थाने 'तृहिरत्र कृतिकर्मा' इति खपुस्तके। ५ कृतकर्मा—क०। ६ निष्कृष्य कृतवन्त इति उवटः, निष्कृष्टवन्त इति महीधरः। ७ 'भूमिम्' इत्येव पाठः—ख०। ८ असि त्रितः—ख०। ९ गोप्यव्रतेन—ख०। १० समेन—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपृक्तः संयुक्त एकीभूतो देवतासायुज्यं प्राप्त इति भावः। किं च, आहुस्ते त्रीणि दिवि बन्धनानि । [1]दिवि द्युलोके आदित्यात्मनावस्थितस्य त्रीणि बन्धनानि ऋग्यजुःसामलक्षणानीत्याहुः ॥ २६ ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तःसमुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥२७॥
(मा. २९।१५)

हे [2]अर्वन् हे अश्व, ते तव। [3]दिवि द्युलोके स्थितस्य। त्रीणि [4]ऋग्यजुःसामलक्षणानि बन्धनान्याहुः। त्रीण्यप्सु अद्भिरुपलक्षितभूमौ स्थितस्य ते त्रीणि आकृष्टिवृष्टिबीजानि। त्रीण्यन्तःसमुद्रे। समुद्रे अन्तरिक्षे अन्तः मध्यस्थितस्य तव त्रीणि बन्धनानि मेघविद्युद्वायव इति त्रीणि। उत इव मे वरुणश्छन्त्सि। अपि वरुणोऽप्येवं छन्त्सि शंसति कथयति। हे अर्वन्, यत्र ते तव। परममुत्कृष्टतमम्। जनित्रं [5]जन्म। आहुः वेदा वदन्ति। तत्र शंसति ॥२७॥

इमा ते वाजिन्नवमार्जनानीमा शफानाँ सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥२८॥
(मा. २९।१६)

हे वाजिन्, इमा इमानि। ते तव। अवमार्जनानि वेतसकटप्रभृतीनि कृतानि अपद्रष्टास्मि। इमा इमानि। शफानां सनितुः 'षणु दाने' [१४६५ तनादिः] अभीष्टफलप्रापिरश्वस्य शफानां पादक्षुराणां निधाना इमा इमानि निधानानि पदविक्षेपणानि। अपश्यं दृष्टवानस्मि। अत्रा ते भद्राः। अत्र स्थितस्य मेध्यस्य अश्वस्य। ते तव। भद्राः भन्दनीयाः स्तुत्याः। रशनाः [6]रश्मयः। ताः अपश्यम्। ऋतस्य यज्ञस्य सम्बन्धिनमश्वम्। या

१ 'दिवि''''लक्षणानीत्याहुः' इति खपुस्तके नास्ति। २ 'हे अर्वन् हे अश्व, ते तव' इति नास्ति–ख०। ३ 'दिवि द्युलोके आत्मन्यात्मनावस्थितस्य' इति–ख०। ४ 'ऋग्यजुःसामलक्षणानि' इति नास्ति–ख०। ५ 'जन्म। आहुः' इत्यस्य स्थाने 'जन्यमाहुः' इति पाठः–ख०। ६ रज्जवः–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिरक्षन्ति गोपाः। या रशनाः। गोपाः [1]गोप्यः। अभिरक्षन्ति। ता रशना अपश्यमिति सम्बन्धः॥ २८॥

अथ भविष्यत्कालकर्मभिरश्वं स्तौति—

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम्।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ २९॥
(मा. २९।१७)

पशुसंदर्शनोत्तरकालमात्मानं ते मनसा आराद् अजानाम्। छान्दसं पदम्। अजानाम् अजानम्। हे अश्व, तवात्मानं चारात् दूरादेव। मनसा अजानं ज्ञातवानस्मि। अवो दिवा पतयन्तं पतङ्गम्। दिवा द्युस्थानात्। पतयन्तं पतन्तम्। पतङ्गं सूर्यम्। हे अश्व, त्वम्। अवः 'अव रक्षणे' [६३६ भ्वादिः]। रक्षणमकरोः, रक्षणं कृतवानसि। शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि। हे [2]अश्व, ते शिरः पतत्रि उत्पतनशीलं शिरः। सुगेभिः सुगमैः। अरेणुभिः अनुपद्रवैः। पथिभिः मार्गैः। जेहमानं गच्छन्। पतत्रि पतनशीलं ते शिरः। अपश्यं दृष्टवानस्मि॥२९॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आपदे गोः।
यदा ते मर्तो अनु भोगमानळादिद् ग्रसिष्ठ ओषधीरजीगः॥ ३०॥
(मा. २९।१८)

अत्र द्युलोके। ते तव। जिगीषमाणं जेतुमिच्छमानम्। उत्तमं रूपमहमपश्यं जातं दृष्टवानस्मि। इष आपदे गोः। स्वर्गलोकस्य आपदे स्थाने। इषः अन्नानि। अदृष्टं संपादितानि अपश्यम्। अथ पुनः पृथिव्यां स्थितस्य। ते तव। यदा ते मर्तः। [3]आवर्तः मनुष्यपर्यन्तः यं भोगं तं ते [4]तव आनट् अनुव्याप्नोति। आनट् 'णह बन्धने' [११६६ दिवादिः] आनह्यते [5]आबध्यत इति आनट् वाहनादि। किं च, आत् समन्तात्। इत् एव। ग्रसिष्ठः '[6]ग्रस अदने' ग्रसिष्ठः अतिशयेन भक्षितवानसि। ओषधीश्च अजीगः गृह्णासि गिरसि वा॥ ३०॥

---

१ 'गोप्यः' इति नास्ति—ख०। २ 'हे अश्व, ते शिरः पतत्रि' नास्ति—ख०।
३ आरत्तः—क०। ४ 'ते तव' इत्यस्य स्थाने 'देवा' इति पाठः—ख०।
५ व्यावध्यत—ख०। ६ ग्रसु ग्लसु अदने। [६७०-७१ भ्वादिः]।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यन्ते ॥ ३१ ॥

(मा० २९।१९)

[1]अन्विति परभागमाचष्टे । हे अर्वन्, अनु त्वा अश्वं त्वाम् अनु रथोऽनुगच्छतु । अश्वं त्वां मर्यः मनुष्यः । अनुगच्छतु । त्वा अश्वं त्वामनु गावः गच्छन्तु । अश्वं त्वामनु [2]भगः गच्छतु । कनीनाम् अक्षितारकाणाम् । भाग्यमपि त्वामनुवर्तते । अनुव्रातासः प्राणिनां विशिष्टसमूहाश्च । तव सख्यं सखिभावम् । अन्वीयुः अनुगच्छेयुः । देवा अनुममिरे वीर्यं ते । तव वीर्यं सामर्थ्यम् । देवाः अनुममिरे । तव अचिन्त्यसामर्थ्यं निर्मितवन्तः, अनुमितवन्तो वा ॥ ३१ ॥

हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥ ३२ ॥

(मा० २९।२०)

सर्वेषां रजतप्रभृतीनामुपलक्षणं हिरण्यम् । हिरण्मये शृङ्गे यस्याश्वस्य स हिरण्यशृङ्गः । अयो अस्य । अश्वस्य अयः अयसा सदृशाः पादाः । मनोजवाः मनोवेगाः । अवर इन्द्र हे अश्व, तव महिम्नो निरीक्षणे इन्द्रोऽपि । अवरः अर्वाचीन आसीत् । देवा इदस्य हविरद्यमायन् । यः अस्य अश्वस्य सम्बन्धि [3]अवस्वादानलक्षणम् । अद्यम् अदनीयं हविः । देवाः इत् अपि । आयन् आगच्छन् प्राप्ताः । यो अर्वन्तं प्रथमो अध्यतिष्ठत् । अर्वन्तमश्वं यः प्रथमः इन्द्रः । अध्यतिष्ठत् अधिष्ठितवान् । तमपि स्तुमः । इन्द्रस्तुतिद्वारा अश्व एव स्तूयते ॥ ३२ ॥

---

१ अन्वित्यपरभागमाचष्टे–ख० । २ 'भगः' नास्ति–ख० ।

३ अवदनलक्षणम्–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदित्यस्य रथे नियुक्ता अश्वाः स्तूयन्ते—

ईर्मान्तासः सिलिकमध्यमासः संशूरणासो दिव्यासो अत्याः।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः॥ ३३॥

[मा० २९।२१]

[1]आदित्यरथे सप्ताश्वा नियोजिताः। तेषां मध्ये चत्वार एवंनामानोऽश्वाः—ईर्मान्तासः, सिलिकमध्यमासः, संशूरणासः, दिव्यास इति। ईर्मान्ता एव ईर्मान्तासः। सिलिकमध्यमा इति सिलिकमध्यमासः। संशूरणा इति संशूरणासः। दिव्या एव दिव्यासः। अत्र बहुवचनं पूजार्थम्। ईर्मान्ताः समीरितान्ता विस्तृतविरलाः पृथूरस्काः पृथुजघना अश्वा ईर्मान्तासः। सिलिकमध्यमासः संश्लिष्टमध्यमाः। संशूरणाः 'णम प्रह्वत्वे शब्दे' [१०५० भ्वादिः] शूरान् नमयन्तीति शूरणा अश्वाः। [2]दिव्यासः दिव्याः दिविभवाः। एवं चतुर्विधनामानः। अत्या इत्यश्वनाम [निघ. १।१४]। सन्ततगमनार्हाः। हंसा इव श्रेणिशो यतन्ते। यथा हंसाः श्रेणिशः श्रेणीभूताः। यतन्ते परिधावनार्थमेकविधं यत्नं कुर्वन्ति। एवं कृतप्रयत्ना अश्वा यदाक्षिषुर्दिव्यमज्मम्। अज्ममिति गृहनाम [निघ. ३।४]। दिवि भवं दिव्यं यद् गृहं तद्। आक्षिषुः। [3]'अशु व्याप्तौ'। आक्षिषुः आप्तुमिच्छेयुरिति॥ ३३॥

तव शरीरं पतयिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान्।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति॥ ३४॥

[मा० २९।२२]

हे अर्वन्, तव शरीरं पतयिष्णु उत्पतनशीलम्। तव चित्तं वात इव ध्रजीमान्। [4]ध्रजीमत् अतिचञ्चलम्। तव शृङ्गाणि। शृङ्गशब्दो ज्वलन्नामसु पठितः [निघ. १.१७]। तव शृङ्गाणि अर्चींषि विष्ठिता निष्ठितानि विविधं स्थितानि। पुरुत्रा पुरुषु बहुषु बहुधा च

---

१ आदित्यस्य रथे-ख०। २ 'दिव्यासः' नास्ति-ख०।
३ अशू व्याप्तौ संघाते च [१२६५ स्वादिः]। ४ 'ध्रजीमत्' नास्ति-ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्युच्चन्द्राग्न्यर्कादिषु तेजोरूपेण अरण्येषु [1]जर्भुराणा चरन्ति । जर्भुराणानि देदीप्यमानानि दावाग्निरूपेण । चरन्ति आचरन्ति ॥ ३४ ॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ ३५ ॥

[मा० २९।२३]

वाजी वाजवान् । अर्वा अश्वः । शसनं [2]विशसनम् । उपप्रागात् उपागच्छत् । देवद्रीचा देवान् प्रत्यञ्चितेन मनसा । दीध्यानः हिरण्यगर्भपदं ध्यायन् । [3]विशसनमुपप्रागादिति सम्बन्धः । अजः छागः । [4]अश्वस्य पुरः पुरस्तात् नीयते । "[5]कृष्णग्रीव आग्नेयो रराटे पुरस्तात्" इति । [6]नाभिरस्यानु पश्चात् । अश्वस्य नाभिः अनु पश्चात् नाभ्यां पौष्णः [7]पशुर्नीयत इत्यर्थः, "[8]पौष्णः श्यामो नाभ्याम्" इति श्रुतेः । पश्चात्कवयो यन्ति रेभाः । कवयः [9]रेभा नाम क्रान्तदर्शिनः । यन्ति अनुगच्छन्ति ॥ ३५ ॥

एवमश्वमभिष्टुत्याथेदानीं यजमानः कृतकृत्योऽश्वं संबोधयन्नाह—

उप प्रागात्परमं यत्सधस्थमर्वाँ२ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथाशास्ते दाशुषे वार्याणि ॥ ३६ ॥

[मा० २९।२४]

---

१ 'जर्भुराणा चरन्ति' नास्ति–ख० । २ 'विशसनम्' नास्ति–ख० ।
३ 'विशसनम्' नास्ति–ख० । ४ 'अस्य अश्वस्य' इति–ख० ।
५ 'कृष्णग्रीवमाग्नेयं रराटे पुरस्तात्' इति पाठः । [शत. ब्रा. १३।२।२।३]
६ 'नाभिरस्यानु पश्चात्' इत्यस्य स्थाने 'नाभिः अस्य अनु पश्चात्' इति पाठः–ख० ।
७ 'पशुर्नीयत' इत्यस्य स्थाने 'पशूनां यजत' इति पाठः–ख० ।
८ 'पौष्णं श्यामं नाभ्याम्' इति पाठः । [शत. ब्रा. १३।२।२।६]
९ 'रेभा नाम' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे अर्वन्, परमं प्रकृष्टतमम् । सधस्थं देवमनुष्याणां सधस्थं सहस्थानं सहावस्थितिस्थानम् । पितरं मातरं च । अच्छा आभिमुख्येन । [1]अर्वान् अश्वः । उपप्रागादिति सम्बन्धः । अतो यजमानं ब्रवीमि—अद्य हे यजमान, जुष्टतमो हि देवानां प्रियतमोऽसि यस्मात्तस्मात् [2]त्वं देवान् प्रति गम्याः [3]प्रतिगच्छः । अद्या अद्य । आशास्ते दाशुषे हवींषि दत्तवते दानशीलाय च । वार्याणि वरणीयानि फलानि ऋत्विग् आशास्ते प्रार्थयते याचते ॥ ३६ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।

आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ ३७ ॥

[मा० २९।२५]

द्वादश आग्नेय्यः भार्गवो जमदग्निरपश्यत् । अतस्त्वत्र तस्यार्षम् । हे भगवन् जातवेदः, यस्त्वं समिद्धः संदीप्तः । अद्य अस्मिन् यजनीयेऽहनि । मनुषः मनुष्यस्य यजमानस्य । दुरोणे यज्ञगृहे । देवो देवान् यजसि । देवनादिगुणयुक्तो यस्त्वं देवान् देवनादिगुणसंपन्नान् । यजसि देवपूजादिकं करोषि । अतस्त्वां प्रार्थयामि । हे जातवेदः, त्वम् आवह आवहसि । मित्रं च । चशब्दाद् देवानावह[4] यजसि च । हे मित्रमहः, मित्राणां यशः प्रथयिता [5]यस्त्वं चिकित्वान् । 'चिती संज्ञाने' [३९ भ्वादिः] । चिकित्वान् संज्ञानवान् परिदृष्टकारी । हे श्रीभगवदग्ने, यतस्त्वं महतां किङ्करोऽसि अतस्त्वां ब्रूमः—त्वं दूत इति । देवानामाह्वाने तेषां हविःप्रदाने चास्माकं च दूतोऽसि । कविः क्रान्तदर्शी । [6]कर्तव्यविशेषान् साकल्येन सदा त्वं वेत्सि । अतस्त्वं प्रचेताः प्रकृष्टज्ञानसंपन्नोऽसि ॥ ३७ ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।

मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥ ३८ ॥

[मा० २९।२६]

---

१ 'अर्वान्' नास्ति—ख० । २ 'त्वम्' नास्ति—ख० ।
३ 'प्रतिगच्छेः' इति पाठः—ख० । ४ 'आवह' इत्यस्य स्थाने 'आवाह्य' इति—ख० ।
५ 'यस्त्वम्' इत्यस्य स्थाने 'त्वम्' इत्येव—ख० । ६ 'त्वया कर्तव्य०' इति—क-ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनूनपात् अग्निः । ऋतस्य [1]कर्मफलस्य । पथः मार्गान् । [2]कथंभूतान् ? [3]यमनस्थानविशेषान् [4]यानान् गन्तृणां प्रापकान् । मध्वा स्वदया स्वादुभूतया रसवत्या मध्वा । समञ्जन् मार्गान् व्यक्तीकुर्वन् । हे सुजिह्व, शोभनजिह्व मधुरजिह्व कल्याणजिह्व । नानादेवत्यानि हवींष्यवहरसि । मन्मानि धीभिः अस्माकं धीभिः कर्मभिश्च मन्मानि [5]मननीयानि ध्येयानि फलानि । समञ्जन् व्यक्तीकुर्वन् । उत अपि च । यज्ञमृन्धन् । 'रुधिर् आवरणे' [१४३९ रुधादिः] । आवृण्वन् यज्ञस्य सफलतां संपादयन् । देवत्रा च कृणुह्यध्वरं नः । देवत्रा देवान् प्रति । नः अस्माकम् । अध्वरं कृणुहि कुरुष्वेति ॥ ३८ ॥

नराशꣳसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥३९॥
[मा० २९।२७]

नराणां शंसो यज्ञः अग्निर्वा तस्य नराशंसस्य । एषां देवगणानां मध्ये नराशंसस्य अग्नेः । महिमानं महाभाग्यरूपम् । उपस्तोषाम उपस्तोष्यामः । कैरिति ? यजतस्य छान्दसं पदम् । यष्टव्यस्याग्नेः । यज्ञैः [6]यजनैः यागैरुपस्तोष्यामः । ये सुक्रतवः सुष्ठुकर्माणः । शुचयः शुद्धाः । धियंधाः देवताविषयबुद्धिं धारयितारः, देवपूजार्थे कर्म कुर्वाणाः । स्वदन्ति देवाः । व्यत्ययः । [7]देवा उभयानि हव्या हव्यानि उभयविधानि सोमलक्षणानीतराणि च हवींषि । स्वदन्ति भक्षयन्ति । प्रधानानीतराणि [8]वा स्तोष्याम इति सम्बन्धः ॥ ३९ ॥

आजुह्वान ईड्यो वन्द्यश्चायाह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ ४० ॥
[मा० २९।२८]

---

१ 'कर्मफलरूपस्य' इति–ख० । २ 'कथंभूतान् स्थानान्' इति–ख० ।
३ 'मनस्थानविशेषान्' इत्येव पाठः–ख० । ४ 'यानान्' नास्ति–ख० ।
५ 'गमनीयानि' इति–क० । ६ 'यजनैः' नास्ति–ख० । ७ 'देवान्' इति–ख० ।
८ 'वा' इत्यस्य स्थाने 'ते वयम्' इति पाठः–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे श्रीभगवन्नग्ने, ईड्यः स्तुत्यः। वन्द्यश्च नमस्कार्यश्च। आजुह्वानः आहूयमानः सन्। वसुभिर्नाम देवैः सह। सजोषाः सहप्रीतिः समानजोषणः सन्। आयाहि आगच्छ। त्वं च देवानामसि यह्व होता। देवानां त्वं होतासि। यह्व इति महन्नाम [निघ. ३।३, निरु. ८।८]। हे यह्व, हे महान्। यक्षि यजसि। इषितः देवानामभीष्टः। [1]यजीयान् यजिष्ठः श्रेष्ठः यजीयान्। स त्वं यक्षीति सम्बन्धः ॥ ४० ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्।
व्यु प्रथते वितरँ वरीयो देवेभ्यो अदितये स्योनम् ॥ ४१ ॥
[मा० २९।२९]

प्राचीनं [2]प्रागञ्चनं प्रागग्रम्। बर्हिः प्रदिशा पृथिव्याः। वेदेः वेद्यां प्रदिशा। यथायोग्यं यथाप्रागग्रं बर्हिः। वृज्यते [3]प्रस्तीर्यते। कदेति? वस्तोरस्या वृज्यते अग्रे अह्नाम्। दिवसानां च[4] वस्तोरग्रे। वस्तुशब्दोऽहर्वचनः [निघ. १।९]। पूर्वाह्णकालस्याग्रे प्रातःकाले। अस्याः वेदेः। उपरि बर्हिः [5]प्रवृज्यते। व्यु प्रथते [6]वि उ प्रथते [7]वितरम्। उकारः पादपूरणार्थः। विविधं विततम् अतितरां वरीयः श्रेष्ठं बर्हिः प्रथते आच्छादयति। देवेभ्यो अदितये स्योनम्। स्योनमिति सुखनाम [निघ. ३।६, निरु. ८।९]। देवेभ्यः स्योनं कर्तुम्, अदितये च सुखं कर्तुं श्रेष्ठं [8]प्रवर्तत इति सम्बन्धः ॥ ४१ ॥

व्यचस्वतीरुर्विया विश्रयन्तां पतिभ्यो न जनयः शुम्भमानाः।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ४२ ॥
[मा० २९।३०]

---

१ 'यजीयान्' नास्ति–ख०। २ 'प्रागञ्चनम्' इत्यस्य स्थाने 'प्रागञ्चतम्' इति पाठः–क०। 'प्रागवचनम्' इति पाठः–ख०।
३ 'प्रस्तूयते' इति–ख०। ४ 'च' नास्ति–ख०। ५ 'वृज्यते' इति पाठः–ख०।
६ 'वि उ प्रथते' इति नास्ति–ख०। ७ 'वितरम्'''अदितये स्योनम्' इति नास्ति–क०।
८ 'प्रवर्तत' इत्यस्य स्थाने 'प्रथते' इति–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमोऽर्द्धर्चः परोक्षतः, द्वितीयः प्रत्यक्षतः। व्यचस्वतीः व्यचस्वत्यः। यज्ञगृहद्वारः [1]व्यचनवत्यः द्वारः। विश्रयन्तां [2]विश्रयणं कुर्वतां विवृतावयवा भवन्तु। कथमिव। पतिभ्यो न जनयः शुम्भमानाः। पतिभ्यो न इव। जनयः शुम्भमानाः शोभमानाः जनयः जायाः। यथा [3]मिथुनधर्मेण। पृथ्व्यारुर्विया। छान्दसं पदम्। ऊर्व्या ऊर्वोः। ऊरुप्रदेशविवरणं पतिभ्यः पत्यर्थम्। विश्रयन्ते विवृतद्वारा भवन्ति। तथा देवीः देव्यः। द्वारो बृहती बृहत्यः। विश्वमिन्वाः विश्वस्य सिञ्चन्त्यः (?) विश्वस्य प्रीतिं कुर्वाणाः। देवेभ्यः ऋत्विग्भ्यो यजमानेभ्यश्च। सुप्रायणाः सुगमनाः। भवत भवन्तु ॥ ४२ ॥

आसुष्वयन्ती यजते उपाके उषासानक्ता सदतां नियोनौ।
दिव्ये योषणे बृहती सुरुक्मे अधिश्रियंꣳ शुक्रपिशं दधाने ॥ ४३ ॥

[मा० २९।३१]

[4]आभिमुख्येन परस्परं [5]सुष्वयन्ती हसन्त्यौ [6]साधूय संगत्यौ वा (?)। यजते। छान्दसं पदम्। यजते [7]यजिः प्राप्ते (?)। उपाके अतिसमीपवर्तिन्यौ। उषासानक्ता उषासानक्ते कालावयव-दैवते। [8]सदतां नियोनौ। नितरां [9]योनौ [10]यज्ञगृहद्वारे [11]निरन्तरम्। सदताम् आसीदताम्। पुनः कथंभूते उषासानक्ते ? दिव्ये दिवि भवे दिव्ये। योषणे स्त्रीरूपिण्यौ। बृहती बृहत्यौ ब्रह्मरूपिण्यौ। सुरुक्मे शोभनसुवर्णवत्यौ सुरोचने वा। अधिश्रियम् अधिकां सम्पदं दधाने। शुक्रपिशं शुक्ररूपम्। दधाने धारयन्त्यौ। उषासानक्ते यज्ञगृहे आसीदतामिति सम्बन्धः ॥४३॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥४४॥

[मा० २९।३२]

---

१ 'व्यञ्चनवत्यः' इति–ख०। २ 'विश्रयम्' इति–ख०। ३ 'मैथुनधर्मेण' इति–ख०। ४ 'आ आभिमुख्येन' इति–ख०। ५ सुष्वयन्ती' इत्यस्याग्रे 'सहन्ती' इत्यधिकम्–ख०। ६ 'साधु स्वपन्त्यौ वा' इति–उवटमहीधरौ। ७ 'यज्ञे' इति–उवटः, 'यजनीये' इति–महीधरः। ८ 'सदतां नियोनौ' नास्ति–क०। ९ 'योनौ' नास्ति–ख०। १० यज्ञगृहस्थाने–ख०। ११ नितराम्–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]प्रथमा प्रथमौ आद्यौ । सुवाचा शोभनवाचौ । मिमाना यज्ञं यज्ञं निर्ममाणौ । मनुषः मनुष्यस्य । यजध्यै [२]यजनाय । प्रचोदयन्ता प्रचोदयन्त्यौ(न्तौ) । विदथेषु यज्ञेषु । अन्यान् ऋत्विजः चोदयन्त्यौ(न्तौ) प्रेरयन्त्यौ(न्तौ) । कारू स्वयंकर्तारौ [३]एवंगुणौ होतारौ । प्राचीनं ज्योतिः पूर्वस्यां दिशि स्थितमाहवनीयाख्यं ज्योतिः । प्रदिशा [४]यष्टव्यमिति प्रदिशा आदेशेन । दिशन्ता दिशन्तौ । एवंगुणकौ होतारौ अस्मदीयं यज्ञं [५]भावयतामिति शेषः ॥ ४४ ॥

आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदꣳ स्योनꣳ सरस्वती स्वपसः सदन्तु ॥४५॥
[मा० २९।३३]

आ नः अस्माकम् । यज्ञम् । भारती भारतः आदित्यः तद्वती भारती । तूयमिति क्षिप्रनाम [निघ. २।१५, निरु. ५।१२, ८।१३] । तूर्णम् । यज्ञम् । एतु आगच्छतु । इळा नाम देवता । मनुष्वत् मनुष्यवत् परिदृष्टकारिणी सती । [६]इह यज्ञगृहे । चेतयन्ती प्रकाशयन्ती सरस्वती च इत्येव तिस्रो देवीः तिस्रो देव्यः । बर्हिरिव आ इदं बर्हिः । स्योनं सुखरूपम् । स्वपसः । अपस् इति कर्मनाम [निघ. २।१, निरु. ४।१७] । सु शोभनानि अपांसि कर्माणि यासां ताः स्वपसः । सदन्तु आगच्छन्तु ॥४५॥

य इमे द्यावापृथिवी जनित्री रूपैरपिꣳशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥४६॥
[मा० २९।३४]

यश्च त्वष्टा । इमे द्यावापृथिवी द्यावापृथिव्यौ । जनित्री [७]भूतानां जनयित्र्यौ । रूपैः चित्ररूपैः । [८]अपिंशत् अपिंशद्भिः विचित्ररूपैश्चित्रे अकरोत् । भुवनानि विश्वा । विश्वानि च

---

१ 'प्रथमा' नास्ति–ख० । २ यजमानाय–ख० । ३ 'एवंगुणौ होतारौ' नास्ति–ख० । ४ 'यष्टव्यमिति' इति–क० । ५ 'भावयताम्' इति–ख० । ६ 'इह यज्ञगृहे । चेतयन्ती' इति नास्ति–ख० । ७ 'सर्वभूतानाम्' इति–ख० । ८ 'अपिंशत् अपिंशद्भिः विचित्ररूपैश्चित्रे' इत्यस्य स्थाने 'अविलसद्भिः चित्ररूपे ते' इति पाठः–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाणि [1]भुवनानि भूतजातानि च यो रूपैः अपिंशत् [2]विचित्ररूपाणि अकरोत् । तं त्वष्टारम् । अद्य अस्मिन्नहनि । हे होतः, इषितः [3]अतिरुचितस्त्वम् । यजीयान् यष्टृभ्यः अन्येभ्यः श्रेष्ठः यजीयान् होता । देवं देवनादिगुणयुक्तं त्वष्टारम् । इह यज्ञे । विद्वांस्त्वं यक्षि यजसि ॥ ४६ ॥

उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥४७॥
[मा० २९।३५]

द्वितीयोऽर्द्धर्चः पूर्वं व्याख्येयः । [4]वनस्पतिः यूपः । शमिता शम्यते हिंसिष्यते इति शमः, तस्य शमस्य शमनस्य कर्ता शमिता । उपलक्षणमेतत् । देवः अग्निर्वै शमित्र इति । एते देवाः स्वदन्तु हव्यं मधुना घृतेन च । सहितं हव्यं हविः स्वदन्तु [5]आस्वादयन्तु भक्षयन्तु । [6]अतः उपावसृज त्मन्या । उपश्लिष्टं पाशुकम् अवदानम् उपावसृज अवक्षिप । त्मन्या आत्मना । समञ्जन् देवानां पाथः. देवानां सम्बन्धि उदकोपलक्षितमन्नम् । अञ्जन् व्यक्तीकुर्वन् उपावसृज । किं च, ऋतुथा ऋतौ ऋतौ । हवींषि सृज एतद्योग्येषु क्षिपेति ॥ ४७ ॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ ४८ ॥
[मा० २९।३६]

सद्यस्तदानीमेव जातः यजमानः दीक्षणीयया दीक्षितो जातः अरण्यां जातश्चाग्निर्वा सद्यः । यज्ञं व्यमिमीत निर्मितवान् । अतः देवानां पुरोगाः अग्रेसरः सर्वकार्येष्वग्रगामी अभवत् । अस्य होतुः प्रदिशि प्राच्यां दिशि स्थितस्य आहवनीयात्मना स्थितस्य होतुः । ऋतस्य वाचि । होतुमुखान्निर्गम्यमानस्य ऋतस्य ब्रह्मणः सम्बन्धिन्यां परिणम्यमानायां वाचि वाक्ये । यत् स्वाहाकृतं स्वाहाकारोपलक्षितं हविः । देवा अदन्तु भक्षयन्तु ॥ ४८ ॥

---

१ भूतानि–क० । २ चित्ररूपाणि–ख० । ३ अभिरुचितः–ख० ।
४ 'वनस्पतिः यूपः' इत्यस्य स्थाने 'वनस्पतिरूपः' इति–ख० । ५ 'आस्वादयन्तु' इत्यस्य स्थाने 'खादयन्तु' इति पाठः–ख० । ६ 'अतः' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अ॒ग्नये॑ गाय॒त्राय॑ त्रि॒वृते॑ राथ॑न्तराया॒ष्टाक॑पाल॒ इन्द्रा॑य॒ त्रैष्टु॑भाय पञ्चद॒शाय॒ बार्ह॑ताये॒कादशकपालो॒ विश्वे॑भ्यो दे॒वेभ्यो॒ जाग॑तेभ्यः सप्तद॒शेभ्यो॑ वैरू॒पेभ्यो॒ द्वाद॑श॑कपालो मि॒त्रावरु॑णाभ्या॒मानु॑ष्टुभाभ्यामेकवि॒ꣳशाभ्यां॑ वैरा॒जाभ्या॑म् । पय॒स्या॒ बृह॒स्पत॑ये॒ पाङ्क्ता॑य त्रिण॒वाय॑ शाक्व॒राय॑ च॒रुः स॑वि॒त्र औष्णि॑हाय त्रयस्त्रि॒ꣳशाय॑ रैवताय॒ द्वाद॑शकपालः प्राजापत्यश्च॒रुरदि॑त्यै॒ विष्णु॑पत्न्यै च॒रुर॒ग्नये॑ वैश्वान॒राय॒ द्वाद॑शकपा॒लोऽनु॑मत्या अ॒ष्टाक॑पालः ॥ ४९ ॥ [मा० २९।६०]

[1]दशहविष्केष्टिदेवत्यानि [2]एतानि यजूंषि । अग्नये सर्वज्ञाय । गायत्राय गायत्रीसम्बन्धिने । त्रिवृते त्रिवृत्स्तोमात्मने । राथन्तराय रथन्तरसामात्मकाय । अष्टाकपालः अष्टसु कपालेषु श्रपितः पुरोडाशः अष्टाकपालः । कार्य इति शेषः । इन्द्राय त्रैष्टुभाय त्रिष्टुप्सम्बन्धिने । पञ्चदशाय पञ्चदशस्तोमात्मने । बार्हताय बृहत्सामात्मरूपाय । एकादशकपालः [3]एकादशसु कपालेषु श्रपितः पुरोडाशः एकादशकपालः कार्यः । विश्वेभ्यो देवेभ्यो जागतेभ्यः जगतीसम्बन्धिभ्यः । सप्तदशेभ्यः स्तोमेभ्यः । वैरूपेभ्यः सामभ्यः । [4]द्वादशसु कपालेषु श्रपितः पुरोडाशः द्वादशकपालः कार्यः । मित्रावरुणाभ्यामानुष्टुभाभ्याम् अनुष्टुप्सम्बन्धिभ्याम् । एकविंशाभ्यां स्तोमात्मकाभ्याम् । वैराजाभ्यां वैराजसामरूपाभ्याम् । पयस्या पयोविकारश्चरुः कार्यः । बृहस्पतये पाङ्क्ताय पङ्क्तिसम्बन्धिने । त्रिणवाय स्तोमात्मने । शाक्वराय शक्वरीसामात्मने । चरुः कार्यः । सवित्रे औष्णिहाय उष्णिक्सम्बन्धिने । त्रयस्त्रिंशाय स्तोमात्मने । रेवताय रैवतसामात्मने । द्वादशकपालः पुरोडाशः कार्यः । प्राजापत्यः प्रजापतिदेवत्यश्चरुः कार्यः । अदित्यै विष्णुपत्न्यै चरुः कार्यः । अग्नये वैश्वानराय [5]द्वादशकपालः द्वादशकपालेषु श्रपितः पुरोडाशः द्वादशकपालः [6]कार्यः । अनुमत्यै अष्टाकपालः पुरोडाशः कार्यः ॥ ४९ ॥

---

१ 'दशहविष्केष्टि.....' इत्यस्य स्थाने 'दशहविष्कावेष्टिसंज्ञेष्टि.....' इति–महीधरपाठः ।
२ 'एतानि' नास्ति–क–ग० । ३ 'एकादशसु.....एकादशकपालः' इति नास्ति–क० ।
४ द्वादशकपालेषु–क० । ५ 'द्वादशकपालः' नास्ति–ख० । ६ 'कार्यः' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेवः । ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ॥ ५० ॥ [मा० २९।५८]

एकादशिन्यां पशुदेवत्यानि यजूंषि । आग्नेयः अग्निदेवत्यः । कृष्णग्रीवः नीलग्रीवोऽजश्च । सारस्वती सरस्वतीदेवत्या । मेषी पशुः । बभ्रुः कपिलवर्णः । सौम्यः सोमदेवत्यः । पौष्णः पूषदेवत्यः । श्यामोऽजः । शितिपृष्ठः शुक्लपृष्ठोऽजः । बार्हस्पत्यः बृहस्पतिदेवत्यः । शिल्पः विचित्रवर्णः । वैश्वदेवः विश्वेदेवदेवत्यः । ऐन्द्रः इन्द्रदेवत्यः । अरुणः अरुणवर्णः । मारुतः मरुद्देवत्यः । कल्माषः कृष्णवर्णः । ऐन्द्राग्नः इन्द्राग्निदेवत्यः । संहितः संनिहितः । अधोरामः अधः शुक्लवर्णः । सावित्रः सवितृदेवत्यः । वारुणः वरुणदेवत्यः । कृष्णः कृष्णवर्णः पशुः । एकशितिपात् एकतः शुक्लवर्णः पादः । पेत्वः छान्दसं पदम् । पीत इति पीतवर्णः ॥५०॥

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ । मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ॥ ५१ ॥ [मा० २९।५९]

एकादशिन्यां पशुदेवत्यानि यजूंषि—'अग्नयेऽनीकवते', 'शुक्रज्योतिश्च' [१८।८०] इत्याद्याः । अग्नये सेनावते । [1]रोहिताञ्जि रोहितवर्णो जितोजः अनड्वान् [2]पुम्पशुः । अधोरामौ अधः शुक्लवर्णौ [3]एतौ सावित्रौ सवितृदेवत्यौ । पौष्णौ पूषदेवत्यौ अजौ । रजतनाभी शुक्लनाभी । वैश्वदेवौ विश्वेदेवदेवत्यौ अजौ । पिशङ्गौ पिशङ्गवर्णौ । [4]तूपरौ खण्डशृङ्गौ शृङ्गरहितौ वा अजौ । मारुतः मरुद्देवत्यः । कल्माषः कृष्णः । आग्नेयः अग्निदेवत्यः । कृष्णोऽजः । सारस्वती सरस्वतीदेवत्या मेषी । वारुणः पेत्वः पीतवर्णः पशुः वरुणदेवत्य इति ॥ ५१ ॥

इति [5]शुक्लयजुःकाण्वसंहिताभाष्यसङ्ग्रहे एकत्रिंशोऽध्यायः ॥ ३१ ॥

---

१ 'रोहितो रक्तोऽञ्जिश्चिह्नको यस्य सोऽनड्वान् वृषभः' इति—महीधरः । २ 'अयम्पशुः' इति-ग० । ३ 'एतौ' नास्ति-ख०, 'तौ' इति-क० । ४ 'तूपरौ' इत्यस्य स्थाने 'वृषभौ' इति-ख० । ५ काण्ववेदमन्त्रभाष्यसङ्ग्रहे-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

*द्वात्रिंशोऽध्यायः

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥ १ ॥
(मा० ३३ । १)

[1]अग्निष्टुत्यग्निष्टोमिके[2] प्रथमेऽहनि सप्तदश पुरोरुचः अग्निदेवत्याः वैवस्वतमार्षम् । अस्याजरास इति । सर्वमेधस्तु [3]सर्वकामस्यादशरात्रं क्रतुर्भवति । [4]अस्याद्यग्निष्टोमः [5]प्रथममहः । [6]इन्द्रस्तदुक्थ्यो द्वितीयमहः । [6]सूर्यस्तदुक्थ्यस्तृतीयमहः । वैश्वदेवश्चतुर्थमहः । आश्वमेधिकं [7]मध्यमं पञ्चममहः । पौरुषमेधिकं मध्यमं षष्ठमहः । आप्तोर्यामं सप्तममहः । त्रिणवमष्टममहः । त्रयस्त्रिंशं नवममहः । विश्वजित् सर्वपृष्ठोऽतिरात्रो दशममहः । इत्येवं दशरात्रं क्रतुः सर्वमेधः । [8]अत्राश्वमेधिकानामादितश्चतुर्णामह्नां चत्वार आद्याः [9]पुरोरुचोऽस्मिन्नध्याये प्रायशः पठ्यन्ते । [10]तथाहि–"तस्याग्निष्टुदग्निष्टोमः प्रथममहर्भवति । अग्निर्वा अग्निष्टुदग्निष्टोम्यग्निः[11] उखा वै सर्वे देवाः सर्वेषां देवानामाप्त्यै तस्याग्नेया ग्रहा भवन्त्याग्नेय्यः पुरोरुचः सर्वमाग्नेय्यमसत्" [शत० ब्रा० १३।७।१।३] इत्यादिश्रुतेः । तथा च सूत्रकारः–"सर्वमेधः सर्वकामस्य [12]दशरात्रोऽग्नेरुत्तमोऽग्निष्टुत् त्रय उक्थ्या इन्द्रस्तुत् सूर्यस्तुद् वैश्वदेवस्तुद् व्रतं

---

* एकत्रिंशाध्यायस्य चतुर्विंशतिपृष्ठमुद्रणानन्तरं भाष्यसंग्रहस्यास्य चतुर्थदशकस्यैको ग्रन्थो होशियारपुरस्थश्रीविश्वेश्वरानन्दानुसन्धानमन्दिराधिकारिणामनुग्रहेण प्राप्तः । अतः परं तत्साहाय्येनापि संपादनं विधास्यते । ग्रन्थोऽयमत्र 'ग'–पदेन संकेतितः । मुद्रितस्यैकत्रिंशाध्यायस्यात्रत्यानि पाठान्तराणि यथावसरं पृथग्रूपेण दास्यन्ते–सम्पादकः ।

१ 'अग्निष्टुति' नास्ति–क० । २ 'आग्निष्टोमिके' इति–सर्वानुक्रमसूत्रस्थः पाठः । ३ '....कामस्य दश...' इति–ख० । ४ 'अस्याग्निष्टुदग्निष्टोमः' इति–उवटः । ५ 'प्रथममहः' इत्यस्य स्थाने'प्रथमः' इत्येव–ख० । ६ 'इन्द्रस्तुदुक्थ्यो', 'सूर्यस्तुदुक्थ्यः' इति पाठाभ्यां भवितव्यम् । ७ 'मध्यमम्' नास्ति–क-ग० । ८ 'अत्र सार्वमेधिकानाम्' इति–उवटः । ९ 'पुरोरुचः' नास्ति–ख० । १० 'तथाहि' नास्ति–ख० । ११ '....ष्टोमोऽग्निमुखा ह वै....' इति पाठः–श० ब्रा० । १२ 'दशरात्रोऽग्निरुत्तमः' इति–का० श्रौ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]वाजपेयोऽतिरात्रोऽप्तोर्यामः [2]सर्वस्मिन्नालभते [3]वपायास्त्वचो जुहोति ओषधिवनस्पतीनां [4]संव्रश्चनम् [5]अन्नं जुहोति वपान्ते तृतीयसवने च हुतेषु [6]हविराश्वमेधिकं मध्यमं व्रतस्थाने पौरुषमेधिकं वाजपेयस्य त्रिणवत्रयस्त्रिंशा उक्थावतिरात्रौ[7] विश्वजित् पुरुषमेधवद् दक्षिणा[8]भूमिः" [का० श्रौ० २१।२] इत्येवं व्याचष्टे । एवम्–"इन्द्रस्तु[9] उक्थ्यो द्वितीयमहर्भवति तस्यैन्द्रा ग्रहा भवन्त्यैन्द्र्यः पुरोरुचः सर्वमैन्द्रम् । सूर्यस्तु [10]उक्थ्यस्तृतीयमहस्तस्य सौर्या ग्रहा भवन्ति सौर्यः पुरोरुचः सर्वं [11]सौर्यमिति । वैश्वदेवश्चतुर्थमहर्भवति तस्य वैश्वदेवा ग्रहा भवन्ति वैश्वदेव्यः पुरोरुचः सर्वं वैश्वदेवमहरिति[12]" [शत० ब्रा० १३।७।१।४-६] एताश्च पुरोरुचो [13]यच्छान्दस्काः प्रकृतौ दृष्टास्तच्छान्दस्का[14] [15]एवेहापि प्रायशो दृश्यन्ते । तत्रैन्द्रवायवग्रहस्य पुरोरुगियं त्रिष्टुप् । आग्नेयी नियोगबलात् । ऋषिर्वत्सापिः[16] । अस्याजरास इति । अथ पदव्याख्या । अस्य अस्याग्नेः । अजरासः जरारहिताः, अजरा एव अजरासः । दम इति गृहनाम [निघ० ३।४, निरु० ४।५] । [17]दमामिति व्यत्ययः । दमाः । अरित्राः अरिभ्यो जलादिभ्यस्त्रायन्त इति अरित्राः गृहाः । अर्चद्धूमासः [18]'ऋच दीप्तौ' । अर्चन्तः दीप्तिमन्तोऽग्नयो धूमाश्च येषु गृहेषु ते तथोक्ताः । यद्वा अर्चिर्भिर्युक्तो धूमो येषु ते अर्चद्धूमासो गृहा अस्याग्नेः सन्तीत्यध्याहारः । किं च, अग्नयः पावकाः । तेष्वग्निगृहेष्वाहवनीयगार्हपत्यदक्षिणाग्निलक्षणा अग्नयो [19]ये वसन्ति कथंभूतास्त [20]इति ? पावकाः पावयन्तीति पावकाः । श्वितीचयः श्वितिम् उषसोपलक्षितां प्रभाम् [21]अर्चन्ति गमयन्तीति श्वितीचयोऽग्नयः । श्वात्रासः । श्वात्रमिति धननाम [निघ० २।१०] । 'आस उपवेशने' [१०२१

---

1 'वाजपेयोऽप्तोर्यामः' इति–का० श्रौ० । 2 'सर्वस्मिन्' इति–का० श्रौ० । 3 'अवपाकानां त्वचो' इति–का० श्रौ० । 4 'संव्रश्चम्' इति–का० श्रौ० । 5 'अन्नमन्नम्' इति–का० श्रौ० । 6 'हविःषु' इति–का० श्रौ० । 7 'अतिरात्रो' इति–का० श्रौ० । 8 'सभूमि' इति–का० श्रौ० । 9 इन्द्रस्तुदुक्थ्यो' इति–श० ब्रा० । 10 सूर्यस्तुदुक्थ्यः' इति–श० ब्रा० । 11 'सौर्यमसदिति' इति–श० ब्रा० । 12 'मसदिति' इति–श० ब्रा० । 13 'यच्छन्दस्काः' इति–उवटः । 14 'तच्छन्दस्काः' इति–उवटः । 15 एवमिहापि–क०–ग० । 16 'वत्सप्रीः' इति–सर्वा० मही० च । 17 'व्यत्ययः । दमामिति दमा' इति–क०, 'दममिति दमा इति व्यत्ययः' इति–ख० । 18 'ऋच स्तुतौ' [१३०३ तुदादिः] । 19 'ये' नास्ति–क-ग० । 20 'इति' नास्ति–क-ग० । 21 अर्चयन्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदादिः]। आसनम् आसः श्वात्राय हविर्लक्षणधनार्थम् आसो येषामग्नीनां ते श्वात्रासः अग्नयो वसन्तीति। किं च, भुरण्यवः। भुरण्युरिति क्षिप्रनाम [निघ० २।१५, निरु० १२।२२] क्षिप्रगामिनो वायवः। कथंभूता इति ? वनर्षदः। वनमिति रश्मिनाम [निघ० १।५]। वनैः रश्मिभिः सह सीदन्तीति वनसदः। छान्दसो रेफः। वायवः। नकारः समुच्चयार्थः। सोमाः सोमरसोपलक्षिता वायवस्तव[1] वसन्तीति ॥ १ ॥

हर॑यो धूमके॑तवो वात॑जूता उप॒ द्यवि॑।
यत॑न्ते॒ वृथ॑गग्नयः॑ ॥ २ ॥ (मा० ३३।२)

ऐन्द्रवायवस्य पुरोरुक्। गायत्री। ऋषिर्विरूपः[2]। हरयः हरितवर्णाः अग्नयः। धूमकेतवः धूमध्वजाः। वातजूताः [3]जूतिर्यूतिः वायोर्गतिर्वा, जूतिरिव जूतिर्येषां ते वातजूताः वायुसखत्वाद् वायुगमनाः। उपद्यवि यतन्ते। द्यवीति द्युलोके। उपयतन्ते प्रयत्नमाचरन्तीति। वृथक्। वर्णव्यत्ययः। पृथक्। अग्नयः पृथग्यतन्ते[4] [5]प्रयत्नमाचरन्ति ॥ २ ॥

यजा॑ नो मि॒त्रावरु॑णा॒ यजा॑ दे॒वाँ २ ऋ॒तं बृ॒हत्।
अग्ने॑ यक्षि॒ स्वं दम॑म् ॥ ३ ॥ (मा० ३३।३)

ऐन्द्रवायवमैत्रावरुणादिरूपेणाग्नेय्या ग्रहा एवात्र स्तुत्याः। यजा न इति मैत्रावरुणस्य पुरोरुक्। [6]गौतम ऋषिः। हे श्रीभगवन्नग्ने, नः अस्माकम् अस्मत्संबन्धिनौ मित्रावरुणौ। यज यजनं कुरु। यजा देवान् ऋतं बृहत्। बृहन्तं यज्ञमपि यज। अग्ने यक्षि स्वं दमम्। स्वं स्वकीयम्। दमं यज्ञगृहम्। यक्षि यजसि ॥ ३ ॥

---

१ 'तव वसन्तीति' इत्यस्य स्थाने 'न वसतीति' पाठः—ख०, 'तत्र वसन्तीति' इति तु युक्तः पाठः। २ 'विरूपाः' इति—ख०, 'विश्वरूपः' इति—मही०। ३ 'जूतिर्यूतिः वायोर्गतिर्वा' इत्यस्य स्थाने 'जूरिर्जूतिः वायोर्जूति' इति पाठः—ख०। ४ 'यतन्ते इति' इति पाठः—ख०—ग०। ५ 'प्रयत्नमाचरन्ति' इति नास्ति—ख०। ६ 'गोतमः' इति-सर्वानुक्रमसूत्रे महीधरभाष्ये च।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

युक्ष्वा हि देवहूतमाँ २ अश्वाँ २ अग्ने रथीरिव ।
निहोता पूर्व्यः सदः ॥ ४ ॥ (मा० ३३।४)

आश्विनस्य पुरोरुक् । व्याख्यातोऽयं[1] मन्त्रः [१४।३६] ॥ ४ ॥

द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुपधापयेते ।
हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥५॥
(मा० ३३।५)

शुक्रग्रहस्य पुरोरुक् । त्रिष्टुप् । ऋषिः कुत्सः । द्वे रात्र्यहनी । विरूपे परस्परविरुद्धरूपे । कृष्णा रात्रिः शुक्लमहः, एवं विरूपे । स्वर्थे शोभनार्थे कर्माधिकारिणां शोभनार्थे निमित्ते । चरतः आदित्येन सह चरतः । अन्यान्या वत्समुपधापयेते । [2]अन्यान्या अन्या एका रात्रिः । वत्सं स्वप्रियमग्निम् । धापयते । छान्दसमन्यान्येति । [3]अन्यमपरमेकः (?) अहः वत्सं स्ववत्सम् आदित्यमुपधापयते । अग्निसूर्यदैवत्यमग्निहोत्रं तदभिप्रायमेतत् । तथा च लोके दृश्यत इत्याह– हरिरन्यस्यां भवति । [4]हरिः हरितवर्णोऽग्निः । अन्यस्यां रात्रौ भवति । स्वधावान् । स्वधाशब्दोऽन्नवचनः [निघ० २।७] हविर्लक्षणान्नवान् । शुक्रः सौवर्णः । सुवर्चाः आदित्यः । [5]अन्यस्यामन्यस्मिन्नहनि । ददृशे दृश्यते । द्वे विरूपे इति [6]द्यावापृथिवी । अन्यान्या वत्समिति समानार्थः । हरिरन्यस्यां पृथिव्यामग्निः स्वधावान्, अन्यस्यां दिशि [7]शुक्लमादित्यं सुवर्चाः शोभनदीप्तिमान् ॥ ५ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ ६ ॥
(मा० ३३।६)

मन्थिनो ग्रहस्य पुरोरुक् । व्याख्यातो मन्त्रः [३।२१] ॥ ६ ॥

---

१ 'अयम्' नास्ति–ख० । २ 'अन्यान्या' इत्यस्य स्थाने 'अन्या' इत्येव–ख० ।
३ 'अन्यदपरमेकम्' इति तु युक्तः पाठः । ४ 'हरिः' नास्ति–क० । ५ 'अन्यस्याम्' नास्ति–ख० ।
६ 'द्यावापृथिव्यां वा' इति–ख० । ७ विशुक्लम्–ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रीणि॑ श॒ता त्री स॒हस्रा॑ण्य॒ग्निं त्रि॒ꣳश॒च्च॑ दे॒वा नव॑ चाऽसपर्यन् ।
औक्ष॑न्घृ॒तैरस्तृ॑णन्ब॒र्हिर॑स्मा॒ आदिद्धोता॑र॒ं न्य॑सादयन्त ॥ ७ ॥

(मा० ३३।७)

वैश्वदेवस्य पुरोरुक् । त्रिष्टुप् । ऋषिर्विश्वामित्रः । त्रीणि शता त्रीणि शतानि । [1]त्री त्रीणि सहस्राणि त्रिंशच्च नव च । एवमेकोनचत्वारिंशदुत्तरत्रिशताधिकत्रिसहस्रदेवाः[2] । अग्निमसपर्यन् । [3]सपर्यति पूजाकर्मा [निघ० ३।५] । [4]अग्निं पूजयन्ति । कथमिति ? औक्षन्घृतैः । 'उक्ष सेचने' [६५७ भ्वादिः] । अग्निं घृतैः औक्षन् सेचितवन्तः । अस्तृणन्बर्हिरस्मा । अस्मै अग्नये अग्न्यर्थम् । बर्हिरास्तृणन् । आत् समन्ततः । इत् एव । होतारमग्निमेव । देवा न्यसादयन्त आसादितवन्तः ॥ ७ ॥

मू॒र्द्धानं॑ दि॒वो अ॑र॒तिं पृ॑थि॒व्या वै॑श्वान॒रमृ॒त आ जा॒तम॒ग्निम् ।
क॒विꣳ स॒म्राज॒मति॑थिं॒ जना॑नामा॒सन्ना पात्रं॑ जनयन्त दे॒वाः ॥ ८ ॥

(मा० ३३।८)

व्याख्यातो मन्त्रः [७।२६] [5] ॥ ८ ॥

अ॒ग्निर्वृ॒त्राणि॑ जङ्घनद् द्र॒विण॒स्युर्वि॑प॒न्यया॑ ।
समि॑द्धः शु॒क्र आहु॑तः ॥ ९ ॥ (मा० ३३।९)

ऐन्द्राग्नस्य पुरोरुक् । गायत्री । भरद्वाज ऋषिः । अग्निर्वृत्राणि जङ्घनत् । यजमानस्य वृत्राणि पापानि । जङ्घनत् अत्यर्थं हन्ति । केन हेतुना ? द्रविणस्युः द्रविणं धनं हविर्लक्षणं

---

१ 'त्री' नास्ति—क-ख० । २ 'त्रिसहस्रदेवाः' इत्यत्र "३३३९ इति वस्वादिगणदेवताः । अथवा आगमाच्च—'नवैवाङ्कास्त्रिवृद्धाः स्युर्देवानां दशकैर्गणैः । ते ब्रह्मविष्णुरुद्राणां शक्तीनां वर्णभेदतः ॥' यथा ३३३३३३३३३" इति—गपुस्तकस्था टिप्पणी । ३ 'सपर्यतिः पूजाकर्मा....न्यसादयन्त' नास्ति—ख० । ४ 'अग्निमपूजयन्' इति युक्तः प्रतिभाति । ५ 'मूर्द्धानमिति प्रकृतिवदेव ध्रुवग्रहपुरोरुग्' इति—सर्वा०मही० च ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनम् इच्छन् द्रविणस्युः। विपन्यया। विपन्यतिरर्चतिकर्मा[1]। पूजया देवपूजया निमित्तभूतया। समिद्धः संदीप्तः। शुक्रः स्वतो विशुद्धः। [2]'शुच दीप्तौ'। शुक्रः दीप्तः शुद्धो वा। आहुतः [3]आहुतैराहुतिभिराहुतः, आहुतिभिः संप्राप्तः। एवं परिपुष्टः सन्नग्निर्वृत्राणि जङ्घनदिति संबन्धः॥९॥

विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना।
पिबा मित्रस्य धामभिः॥ १०॥ (मा० ३३।१०)

वैश्वदेवस्य पुरोरुक्। गायत्री। मेधातिथिः। हे श्रीभगवन्नग्ने, विश्वेभिः विश्वैर्देवैः सह। इन्द्रेण वायुना सह। मित्रस्य सूर्यस्य। धामभिः नामभिश्च [4]सहितः। [5]त्वं (सोम्यं सोममयम्।) मधु अमृतं पिब॥ १०॥

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके।
अग्निः शर्धमनवद्यं युवानꣳ स्वाध्यं जनयत् सूदयच्च॥ ११॥
(मा० ३३।११)

[6]आ यत्, अग्ने शर्द्धेति च द्वे ऋचौ मरुत्वतीयौ पुरोरुचौ त्रिष्टुभौ। [7]आ यदित्यस्य पराशर ऋषिः शक्तिपुत्रः। आ यत्। तेजः शुचि मन्त्रसंस्कृतं शुक्रम्। रेतः बीजभूतं जगदुत्पत्तीनां बीजभूतम्। यद् इषे अन्नार्थे निषिक्तं निषेकं प्राप्तं यत् शुचि तेजो रेतः।

---

१ 'विपनिरर्चतिकर्मा' इति–उवटः, 'पनतिरर्चतिकर्मा' इति–महीधरः। निघण्टावर्चतिकर्मसु 'पनायते' [निघ० ३।१४] इति पठितः। धातुपाठे तु–'पण व्यवहारे स्तुतौ च, पन च' [४३९-४४० भ्वादिः] इति पाठः। २ निघण्टौ ज्वलतिकर्मसु [निघं० १।१६] 'शोचति' इति पठितः। धातुपाठे तु–'शुच शोके' [१८३ भ्वादिः] इत्येव। ३ 'आहुतैः' इत्यस्य स्थाने 'हुतैः' इत्येव पाठः–ख०। ४ 'स्तुतः' इति–उवटमहीधरौ। ५ 'तम्' इति–क ख ग०
६ 'आ यत्'''त्रिष्टुभौ' नास्ति–ख०। ७ 'व्यवहितप्रायोऽयं मन्त्रः' इति–गपुस्तकटिप्पणी। 'व्यवहितपदप्रायः' इति–उवटः। 'व्यवहितपदो मन्त्रः' इति–महीधरः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नृपतिं [1]नृणां [2]पतिं पालकमग्निं तद् आनट्। आङ्पूर्वस्य नहेरत्र व्याप्त्यर्थ(कत्व)म् [निघ० २।१८]। नृपतिम् आनट् व्याप्नोति तत्तेजः। ततो [3]मध्यमं स्थानमाप्नोति विद्युल्लक्षणं तेजः। द्यौरभीके। अभीक इति संग्रामनाम [निघ० २।१७]। द्यौरपि आहुतिपरिणामभूतस्य संग्रामजये फलनिर्वर्तनात् (?)। अग्निः शर्द्धम्। शर्द्ध इति बलनाम [निघ० २।९]। व्यत्ययः। शर्द्धस्य बलस्य हेतुभूतम्। अनवद्यं प्रशस्यम्। युवानं परिपक्वशरीरं वीर्यवन्तं वा। स्वाध्यं सुष्ठु आध्यम्। [4]तं नृपतिमग्निम्। व्याप्यस्य सर्वाभिलषितं [5]जनयत् जनयति। सूदयच्च। 'षूद क्षरणे' [१७१८ चुरादिः]। वृष्टिद्वारेण क्षरति। [6]यद्वा आ यदिति। इषे अन्नाय अन्नार्थम्। शुचि रेतो निषिक्तम् अन्नसंस्कारैः संस्कृतं शुचि रेतः जगदुत्पत्त्यादिबीजं तेज आज्यम्। "तेजो वा आज्यम्" [शत० ब्रा० १३।१।१।१] इति श्रुतेः। तेजो निषिक्तं सेचितं देवतोद्देशेनाग्नौ प्रक्षिप्तं यत् तेजस्तदाज्यम्। आ आभिमुख्येन नृपतिं पालकमग्निम्। [7]आनट्। 'णह बन्धने' [११६६ दिवादिः] आङ्पूर्वस्य नहेर्व्याप्तिकर्मता [निघ० २।१८]। आनट्। अग्निं व्याप्नोति। द्यौरभीके अग्निस्तत्र। व्यत्ययः। द्यौरिति दिवः। [8]अभीके द्युलोकस्थाने। अग्निस्तेजोलक्षणं हविः प्राप्तोऽग्निः परिणामात्मकः सन्। शर्द्धं बलवत्। कथंभूतम्? अनवद्यं प्रशस्यम्। युवानं परिपक्वरसरूपम्। स्वाध्यं सुष्ठु आध्यम् [9]आध्येयम्। यजमानाभिलषितमन्नलक्षणं फलं जनयत् सूदयच्च। 'षूद क्षरणे' [१७१८ चुरादिः] वृष्टिं च क्षरति। अतो वृष्टिद्वारेण तं जनयतीत्यर्थः ॥ ११ ॥

अग्ने शर्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।
संजास्पत्यꣳ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ॥ १२ ॥

(मा० ३३।१२)

त्रैष्टुभस्य [10]ऋषिरत्रिदुहिता विश्ववारा। हे श्रीभगवन्नग्ने, शर्द्ध शर्द्धमुत्साहं बलं वा

---

१ नृणाम्—ख०। २ 'पतिम्' नास्ति—ख०। ३ मध्यमस्थानम्—ख०। ४ 'तम्' नास्ति—ख०। ५ 'जनयत्' नास्ति—ख०। ६ 'यद्वा' नास्ति—ख०। ७ 'अश्नोतेरेतद्रूपम्' इति—गटिप्पणी। ८ 'अभितः' इति—क-ग०। ९ 'आधेयम्' इति—ख-ग०। १० 'ऋषिनिर्दुहिताभिश्वचारुः' इति—ख०। 'ऋषिर्दुहिताभिश्वचारुः' इति—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृणुष्व आविष्कुरु। किमर्थमिति ? महते सौभगाय यजमानस्य महत्सौभाग्यसिद्ध्यर्थम्। एवं-गुणस्य तवाग्नेः तव द्युम्नानि। द्युम्नमिति धननाम [निघ० २ । १०]। उत्तमानि सन्तु। उत्कृष्टतमानि हविर्लक्षणानि धनानि। सन्तु भवन्तु। एवं गुणं त्वां प्रार्थये। [1]संजास्पत्यमिति अपत्यनाम (?)। आसामपत्यानां पत्यम् (?) (आसां पत्नीनामपत्यम्) [2]पत्युरपत्यं जास्पत्यमपत्य-पतित्वफलकम्। सुयमं सुष्ठुनियमयुक्तं जास्पत्यम्। आकृणुष्व [3]आकुरुष्व। किं च, शत्रूयताम् आत्मनः शत्रुत्वमिच्छतां शत्रुवदाचरताम्। किं च, त्वं तु। अभितिष्ठा महांसि। महांसि तेजांसि। अभितिष्ठ [4]ब्रह्मतेजांसि तिष्ठेति ॥ १२ ॥

त्वाꣳ हि मन्द्रतमसर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥ १३ ॥

(मा० ३३।१३)

महेन्द्रस्य पुरोरुक्। त्रिष्टुप्। ऋषिर्भरद्वाजः। हे श्रीभगवन्नग्ने, त्वां हि एव। मन्द्रतमं मृदुहृदयतमं मदनीयतमं वा त्वामेव। अर्कशोकैः। अर्कः। [5]'ऋच दीप्तौ'। अर्च्यन्ते दीप्यन्ते प्रकाश्यन्ते देवता यैस्ते अर्का मन्त्रास्तेषां शोकैः। [6]'शुच दीप्तौ'। दीप्तिभिर्मन्त्रप्रकाशैः। ववृमहे। [7]'वृञ् संवरणे'। वरणं कृतवन्तो वयम्। त्वं च वृतः। अर्क इत्यन्ननाम [निघ० २।७, निरु० ५।४]। हविर्लक्षणान्नकान्तिभिरर्कशोकैरिति वा त्वामेव ववृमहे। हे श्रीभगवन्नग्ने, महि नः श्रोषि। महि महत् स्तोत्रम्। नः अस्माकम्। अस्मत्कृतं महत् स्तोत्रं त्वं श्रोषि शृणोषि।

---

१ संजास्पत्यं जासितिं–ख०। 'संजास्पत्यम्। जायापतिमिति प्राप्ते आकार-यकारयोर्लोपः सुक् च' इति–उवटः। 'जास्पत्यं जायापत्यमित्यर्थे जास्पत्यमिति निपातः। जायापत्यं पत्नीयजमानरूपम्' इति–महीधरः। २ 'पत्युरपत्यम्' इत्यस्य स्थाने 'पत्युरहं पत्यम्' इति–ख०। ३ 'आकुरुष्व' इत्यस्य स्थाने 'आत्मनि कुरुष्व' इति क-ग०। ४ 'परब्रह्मतेजांसि' इति–ख०। ५ 'रुच दीप्तौ' इति–क-ख०। धातुपाठे तु–'ऋच स्तुतौ' [१३०३ तुदादिः], 'रुच दीप्तावभिप्रीतौ च' [७४५ भ्वादिः] इति पाठौ। ६ निघण्टौ ज्वलतिकर्मसु [निघ० १।१६] 'शोचति' इति पठितः। धातुपाठे तु–'शुच शोके' [१८३ भ्वादिः] इत्येव। ७ 'वृञ् वरणे' [१२५५ स्वादिः]।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

छान्दसं पदम् । किं च, इन्द्रं न इन्द्रमिव स्थितमग्निम् । त्वा त्वाम् । शवसा बलेन । [1]देवता देवताः पृणन्ति । किं च, वायुं पृणन्ति शवसा यं च वायुमापृणन्ति [2]आपूरयन्ति । किं च, राधसा हविर्लक्षणेन धनेन । नृतमाः मनुष्यतमा मनुष्याणां श्रेष्ठा यायजूकास्त्वां पृणन्ति ॥१३॥

त्वे अ॑ग्ने स्वाहुत प्रि॒यास॑ः सन्तु सू॒रय॑ः ।
य॒न्ता॒रो ये म॒घवा॑नो॒ जना॑नामू॒र्वान्दय॑न्त॒ गोना॑म् ॥ १४ ॥

(मा० ३३।१४)

आदित्यग्रहस्य पुरोरुक् । [3]अनुष्टुप् । ऋषिर्वसिष्ठः । हे श्रीभगवन्नग्ने, स्वाहुत [4]शोभनह्वानसम्पन्न । त्वे तव । प्रियासः प्रियाः सन्तु । कथंभूता इति ? सूरयः पण्डिताः । यन्तारो ये । यन्तारः स्वमनसो नियन्तारः निगृहीतसर्वविषयाः । ते तव बहवः । ये च मघवानः । मघो धनं येषां ते मघवानः, जनानां मध्ये धनवन्तः । ते तव सन्तु । किं च, ऊर्वान्दयन्त गोनाम् । 'दय दानगतिरक्षणहिंसादानेषु' [४८१ भ्वादिः] । दयन्त [5]ददत । गोनाम् । छान्दसं पदम् । गवां गोसम्बन्धिभिः । उपसेचनैः सहितामूर्वां गवां योग्यमन्नविशेषं दयन्त ॥ १४ ॥

श्रु॒धि श्रु॑त्कर्ण॒ वह्नि॑भिर्दे॒वैर॑ग्ने स॒याव॑भिः ।
आसी॑दन्तु ब॒र्हिषि॑ मि॒त्रो अ॑र्य॒मा प्रा॒त॒र्यावा॑णो अध्व॒रम् ॥१५॥

(मा० ३३।१५)

आदित्यस्य ग्रहस्य पुरोरुक् । [6]बृहती । ऋषिः प्रस्कण्वः । श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने । हे श्रीभगवन्नग्ने, श्रुधि श्रुत्कर्ण । शृणोतीति श्रुत्, श्रुतौ कर्णौ यस्य स (श्रुत्कर्णः), तत्संबोधनं हे श्रुत्कर्ण कृपया श्रवणावधानसंपन्न, वह्निभिः वह्निगणैः । सयावभिः । 'या प्रापणे' [१०४६ अदादिः] । वनिप् । समानप्रापणैर्देवैश्च सहितः । त्वं श्रुधि शृणुष्व । आसीदन्तु बर्हिषि

---

१ 'देवता' नास्ति–क० । २ 'आपूरयन्ति' नास्ति–ख० ।
३ 'बृहती' इति–सर्वा० मही० च । ४ शोभनाह्वानसम्पन्न–ग० ।
५ 'ददत' नास्ति-ख० । ६ 'बृहस्पतिः' इति–क·ख·ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रो अर्यमा प्रातर्यावाणो अध्वरम्। बर्हिषि निमित्ते मित्रः सूर्यः, अर्यमा च मासाधिकारी। सूर्य ईश्वरोऽन्ये च देवाः। प्रातर्यावाणो अध्वरम्। प्रातरेव हविषो यावानं प्रापणं येषां देवानां ते देवाः प्रातर्यावाणः। ते सर्वे अध्वरं यज्ञमासीदन्तु आगच्छन्तु ॥ १५ ॥

विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम्।
अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥१६॥

(मा० ३३।१६)

आदित्यग्रहाणां पुरोरुक्। [1]विराट्पङ्क्तिः। वामदेवो [2]गौतम ऋषिः। विश्वेषामदितिः। यज्ञिया यज्ञियार्हा यज्ञसंपादिनस्तेषां यज्ञियानाम्। विश्वेषामदितिः योनिः, अदितिः अखण्डितशक्तिः [3]अदीनः। विश्वेषां मानुषाणां मनुष्याणामग्निहोत्रिणां सर्वेषां चायमग्निरतिथिः। सोऽग्निर्विष्णुः देवानामवः। अव इत्यन्ननाम [निघ० २।७]। [4]अन्नमावृणानः अन्नं समर्पयन्। जातवेदाः जातप्रज्ञः सर्वज्ञः। सुमृळीकः सुसुखो भवतु ॥ १६ ॥

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥१७॥

(मा० ३३।१७)

सावित्रग्रहस्य पुरोरुक्। त्रिष्टुप्। [5]ऋषिर्लुशोधानाकः। महो अग्नेः समिधानस्य शर्मणि। शरणे आश्रये समिधानस्य दीप्यमानस्याग्नेर्महः महत् स्वप्रकाशस्वरूपम्। वयमावृणीमहे संस्तुमः। तन्नतिस्तोत्रेण वयमनागाः अनागसः निष्पापाः स्याम भवेम। एवं च सति मित्रे वरुणे चानागाः निरपराधाः स्याम। स्वस्तये अविनाशाय स्याम। तेन च सवितुः जगत्प्रसवकर्तुः सवीमनि (प्रसवे) वयं स्याम। तद्देवानाम्। तत्तस्माद् यस्मादेवं तस्माद्देवानामवः अन्नं हविर्लक्षणं देवार्थं हविः। आवृणीमहे हविर्गृहीत्वा वयं प्रदास्याम इति शेषः ॥ १७ ॥

---

१ 'त्रिष्टुप्' इति-उवटमहीधरसर्वानुक्रमसूत्रेषु। २ 'गोतम' इति-सर्वा०मही० च।
३ आदीनः-क०। ४ 'अन्नमावृणानः' नास्ति-क०।
५ 'ऋषिस्तु सौभानकः' इति-क-ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपश्चित्पिप्युस्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा त्वꣳ हि धीभिर्दयसे विवाजान् ॥१८॥
(मा० ३३।१८)

[1]इन्द्रस्तुत्युक्थ्ये द्वितीयेऽइन्यैन्द्यः पुरोरुचो [2]द्वादश। आपश्चिदैन्द्री त्रिष्टुप्। वसिष्ठ ऋषिः। आपश्चित्। [3]'पदि वृद्धौ'। आपश्चित्पिप्युः वृद्धिं गच्छेयुः सोमं वर्धयेयुः। चित्(अपि)। स्तर्यः यजमानः। स्तीर्यते येन स स्तार्यः। ह्रस्वस्तु छान्दसः। स्तर्यः (न यथा) सोमं वर्धयति तथा आपः सोममिति। गावो नक्षन्। एवमृग्यजुःसामलक्षणा वाचो नक्षन्। नक्षतिर्व्याप्तिकर्मा [निघ० २।१८]। सोमेऽभिष्टुते सति गावः ऋतं यज्ञं नक्षन् व्याप्नुवन्ति। एवं हे इन्द्र, ते तव जरितारः होतारः। जरितार इति होतृनाम [निघ० ३।१६]। ते सर्वे त्वां स्तुत्वा पिप्युः वर्धयेयुः। याहि वायुर्न नियुतो नो अच्छा। हे इन्द्र, वायुर्न त्वं वायुरिव यथा वायुर्नियुतः। व्यत्ययः। नियुता अश्वेन अश्ववाहनादिना नियुक्तः सन्। नः अस्मान्। अच्छा आगच्छ आप्तुं प्राप्तुमस्मत्समीपमागच्छति तथा त्वमपि नः अस्माकं प्रतीहि आयाहि[4]। हे इन्द्र, आगत्य च त्वम्। त्वं हि धीभिर्दयसे विवाजान्। धीभिः बुद्धिविषयाभिर्बुद्धिभिः कर्मभिश्च दयसे। 'दय दानगतिरक्षणहिंसादानेषु' [४८१ भ्वादिः]। [5]अत्र दानार्थोऽयं धातुः। विवाजान् अन्नानि दयसे ददासि हि ॥ १८ ॥

दक्षिणार्थं स्थिता गाव उच्यन्ते—

गाव उपावतावतं मही यज्ञस्य रप्सुदा ।
उभा कर्णा हिरण्यया ॥ १९ ॥ (मा० ३३।५९)

लिङ्गोक्तदेवत्या गायत्री। पुरुमीढाजमीढौ ऋषी। गाव इति। हे गावः, उपावतावतम्। अवतमिति तृणनाम (?)। अन्नं गोग्रासलक्षणमवतमुपाव्रत उपगच्छत। तृणप्रदर्शनं गवा-

---

१ 'इन्द्रस्तुत्युक्तम्' इति—क—ख—ग०। २ 'द्वादशरात्रः' इति पाठः—क—ख—ग०। ३ 'ओप्यायी वृद्धौ' [४८८ भ्वादिः]। ४ 'हि। हे इन्द्र,''''गतिरक्षण' इति नास्ति—क०। ५ 'अन्नदाना''''' इति—क—ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मागमनकारणं हि। मही यज्ञस्य रप्सुदा। रप्सु रभसे ददातीति रप्सुदा। मही यज्ञस्य सम्बन्धिनी रप्सुदा। यज्ञसम्बन्धिनी इयं मही। यजसे (?)। भवतीनाम् उभा कर्णा हिरण्यया। हिरण्मयौ [1]कर्णौ कृतौ। [2]दानार्थमेत्र। अत्र उपावतेति सम्बन्धः॥ १९॥

गवां नियममाह—

यद॒द्य सूर॒ उदि॒तेऽना॑गा मि॒त्रो अ॑र्य॒मा।

सु॒वाति॑ सवि॒ता भगः॥ २०॥ (मा० ३३।२०)

लिङ्गोक्तदेवत्या गायत्री। ऋषिर्वसिष्ठः। यदद्य यदस्मिन्नहनि। सूरे सूर्ये। उदिते उद्गते। सूर्योदये सति। मित्रः मित्रो नाम सूर्यः। सविता च प्रसविता। यत्कर्म गवा प्रसुवाति अनुजानाति। अर्यमा मासाधिकारी सूर्यो भगश्च द्वादशानामादित्यानामुपलक्षणम्। अनागाः अनपराधा गावस्तत्कर्मैवं कुर्युरिति शेषः॥ २०॥

आ सु॒ते सि॑ञ्चत॒ श्रिय॑ꣳ रोद॑स्योरभि॒श्रिय॑म्।

र॒सा द॑धीत वृष॒भम्। तं प्र॒त्नथा॒यं वे॒नश्चो॑दयत्॥ २१॥

(मा० ३३।२१)

लिङ्गोक्तदेवत्या [3]त्रिष्टुप्। [4]सुमित्र ऋषिः। आसुते अभिषुते सोमेऽभिष्टुते सति। हे ऋत्विजः, ग्रहपात्रेषु श्रियं श्रियो हेतुभूतं सोमं सिञ्चत सोमसेचनं कुरुत। रोदस्योः द्यावापृथिव्योः। अभिश्रियं कुरुतेति शेषः। सोमस्य श्रियं ब्रह्माण्डव्यापिनीं कुरुत। रसा दधीत। रसं रसान् गावः। दधीत धारयत। वृषभम् [5]ऋषभम्। तं प्रत्नथा। प्रत्नशब्दः पुराणवचनः [निघ० ३।२७, निरु० १२।३२]। था इत्युपमार्थीयः [निरु० ३।१६]। पुराणानामाज्यानां यथा धारणं तथा रसानादधीत तं वृषभं वर्षितारं श्रेष्ठं वा सोमम्। अयं वेनः मेधावी

---

१ 'कर्णौ' नास्ति—ख०। २ 'दानार्थमेतत्' इति—क—ख—ग०। ३ 'गायत्री' इति—उवट-महीधरसर्वा०। ४ 'सुनीतिः' इति—मही०, 'असुनीतिः' इति—सर्वा०। ५ 'ऋषभम्' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋत्विक्। चोदयत् [१]प्रेरयति। देवानां प्रतीति शेषः। [२]तं प्रत्नथायं वेनश्चोदयदिति। तं प्रत्नथा [३]पूर्वथा [७।११], अयं वेनश्चोदयत्पृश्निगर्भा [७।१५] इति प्रतीकोक्ताविमौ मन्त्रौ ॥२१॥

आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः।

महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ २२ ॥

(मा० ३३।२२)

ऐन्द्री त्रिष्टुप्। विश्वामित्र ऋषिः। इन्द्रस्यात्र वृष्टिकर्मोच्यते। ग्रीष्मान्ते मध्यमस्थानमातिष्ठन्तमिन्द्रम्। विश्वेदेवाः पर्यभूषन् पर्यलंकृतवन्तः मध्यमदेवगणाः। श्रियो वसानश्चरति स्वरोचिः। स चेन्द्रो मध्यमस्थो यः सर्वेषां देवगणानां श्रियः श्रीः वसानः। 'वस आच्छादने' [१०२३ भ्वादिः]। आच्छादयन्। स्वरोचिः स्वयं दीप्तिः स्वाभाविकतेजःसंपन्नश्चरति। अमृतानि। अमृतमित्युदकनाम [निघ० १।१२]। व्यत्ययः। अमृतेषु वर्षणीयेषूदकेषु। असुरस्य [४]असुषु प्राणिषु प्राणिनां प्राणेषु निमित्तभूतेषु रमत इत्यसुरस्तस्य। वृष्णः वर्षितुः। 'वृष सेचने' [७०६ भ्वादिः]। सेचनकर्तुः पर्जन्यस्य। तन्नाम। नमनं प्रह्वीभावः, तत् महत् नाम पर्जन्यो वृष्टिप्रद इति यत् नाम तन्नाम। आविश्वरूपः श्रीभगवदात्मकः परमैश्वर्ययुत इन्द्रः। तस्थौ आस्थितवान् स्वयमेव वृष्टिं प्रयच्छतीत्यर्थः ॥ २२ ॥

प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे।

इन्द्रस्य यस्य सुमखꣳ सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥ २३ ॥

(मा० ३३।२३)

इन्द्रदेवत्या त्रिष्टुप्। [५]ऋविक ऋषिः। हे ऋत्विजः, वो युष्मान् प्रकर्षेण महे पूजयामि। अन्धसः अन्नस्य दात्रे इति शेषः। कथंभूताय दात्रे? मन्दमानाय। 'मद-[६]स्तुति-

---

१ 'प्रेरयति' नास्ति—क-ग०। २ 'तं प्रत्नथायं वेनश्चोदयदिति' नास्ति—क०।
३ 'पूर्वथा' नास्ति—क०। ४ 'असुषु' नास्ति—ख०।
५ 'रुचिक' इति—ख०। 'कचिक' इति—ग०। 'सुचीक' इति—सर्वा० मही० च।
६ 'स्तुतिमोदमद....' इति—धातुपाठः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोदस्वप्रकान्तिगतिषु' [१३ भ्वादिः]। मोदमानाय स्तूयमानाय च। विश्वानराय विश्वानरात्मकाय। विश्वाभुवे विश्वकारणभूताय सर्वव्यापिने श्रीभगवते। एवंभूतदेवतार्थम्। वः युष्मान् पूजयामीति सम्बन्धः। किं च इन्द्रस्य यस्य। वैश्वानरादिरूपस्य यस्येन्द्रस्य। सहः बलमप्रतिरूपं बलं यस्येन्द्रस्य। महिश्रवः महद्यशः, [1]महि महत्सुखमनन्तसुखं ब्रह्मानन्दं यस्य [2] तस्य। अनावृतं सुमखं सुयज्ञम्। नृम्णं धनम्। प्रार्च। व्यत्ययः। (प्रार्चयामि) पूजयामि। किं च, यस्येन्द्रस्य सहः बलं श्रवः यशश्च रोदसी द्यावापृथिव्यौ। सपर्यतः परिचरतः। तमिन्द्रं [3]प्रार्चयामि पूजयामि॥ २३॥

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः।
येषामिन्द्रो युवा सखा॥ २४॥ (मा० ३३।२४)

इन्द्रदेवत्या गायत्री। त्रिशोक ऋषिः। तृतीयः पादः पूर्वं व्याख्यायते, यच्छन्दयोगात्। येषामिन्द्रो युवा (सखा)। सर्वकर्मक्षम इन्द्रो येषां सखा भवति तेषां यजमानानाम्। बृहन् इत् एव महानेव इध्मः। (इध्मः) यज्ञसाधनानां सर्वेषामुपलक्षणम्, यज्ञसाधनं सर्वं सिद्धमित्यर्थः। यद्वा [4]तेषां श्रीभगवदाराधनार्थं कर्म कुर्वतां यजमानानाम्। बृहन् बृहत्तरम्। तच्च भूरि अतिबृहत्। तच्च शस्तमात्मत्वेन सर्वेषां प्रशस्तम्। तद्ब्रह्मैवात्मत्वेन सखा, ब्रह्मापरोक्षं भवतीत्यर्थः। इन्द्रस्य सखित्वे कर्मणां फलसिद्धिः किमुतेत्यभिप्रायः। स चेन्द्रः पृथुः स्वरुः। प्रथनात्पृथुः प्रथमत्वाद्वा पृथुः। स्वरुः। 'स्वृ शब्दोपतापयोः' [९३२ भ्वादिः]। स्वरति स्वरयतीति [5]स्वरुः [6]परतत्त्वप्रकाशकशब्दप्रदाता इन्द्रः सखा चेत् किं न्वसाध्यमित्यर्थः॥ २४॥

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः।
महाँ २ अभिष्टिरोजसा॥ २५॥ (मा० ३३।२५)

---

१ 'महि महत्सुखम्' इत्यस्य स्थाने 'महिमत्सुखम्' इति–क०।
२ 'यस्य स अनावृतं तं सुमखम्' इति–क–ख–ग०। ३ 'अर्चयामि' इति–क-ग०।
४ 'तेषां येषाम्' इति–ग०। 'येषामेषाम्' इति–ख०। ५ 'स्वरुः खड्गः' इति–क-ग०।
६ 'परतत्त्व' इत्यस्य स्थाने 'उपतत्त्व' इति–क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐन्द्री गायत्री । ऋषिर्मधुच्छन्दः । इन्द्रेहि । हे इन्द्र [1]आ इहि आगच्छ । मत्स्यन्धसः [2]अन्नात् [3]यज्ञशिष्टान्नात् । मत्स्व । [4]'मद तृप्तौ' [१७०६ चुरादिः]। मत्सि तृप्तिं कुरु । किं च, विश्वेभिः विश्वैः सोमपर्वभिः सोमयागनिमित्तैर्महोत्सवैश्चास्माकं मत्सि तृप्तिं कुरु । महान् अभिष्टिरोजसा । ओजसा बलेन त्वं महान् अभिष्टिः अभ्येषणशीलोऽभिष्टः, अतो मत्सीति सम्बन्धः ॥ २५ ॥

इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्यꣳसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥ २६ ॥
(मा० ३३।२६)

इन्द्रदेवत्या त्रिष्टुप् । विश्वामित्र ऋषिः । इन्द्रो वृत्रमवृणोच्छर्धनीतिः । शर्द्धं इति बलनाम [निघ० २।९] । (शर्द्धः) चतुरङ्गबलम्, नीतिर्नयनम्, शर्द्धस्य नीतिर्यस्य स शर्द्धनीतिः । इन्द्रो वृत्रमवृणोत् [5]युद्धार्थं स्वसेनाभिर्वृत्रं प्रावृणोत् । प्रमायिनाममिनाद्वर्पणीतिः । यश्च मायिनां मायां प्रामिणात् । 'मीङ् हिंसायाम्' [११३७ दिवादिः] । प्रकर्षेणामिनात् अहिंसीत् । हिंसाभिनिवृत्तिनिमित्तं वर्पणीतिः । वर्प इति रूपनाम [निघ० ३।७, निरु० ५।८] । वर्पस्य रूपस्य नीतिर्नयनं येन भवति स वर्पणीतिः । नानेता (?) इन्द्रः । अहन् वृत्रं हन्ति वृत्रहननं कृतवान् । तदा [6]कथंभूतं वृत्रम् ? व्यंसं विशिष्टांसमंशमात्रावशेषेण विच्छिन्नबाहुं वृत्रम् । उशधग्वनेषु । 'वश कान्तौ' [१०८० अदादिः] । वृतसंप्रसारणस्यैतद्रूपमुशेति, [7]दहते रूपं धगिति । उशधक् । [8]कोऽर्थः ? कामयमानरूपं दहतीत्युशधक् । असुराणां काम्यमानरूपदाहकः, वनेषु वनेष्वपि वर्तमानानां दाहकः । आविः स्वयंप्रकाशरूप्ययमिन्द्रः । धेना । (धेना) इति स्तुतिरन्नं वा । अकृणोद्राम्याणाम् । अवश्यं रमणीयमानानां रमयितव्यानामन्नमकृणोत् ॥२६॥

---

१ 'आयाहि' इति—क० । २ 'अन्नान्' इति—क-ग० । ३ 'यज्ञशिष्टान्नान्' इति—क-ग० । ४ 'मद तृप्तियोगे' इति—धातु० । ५ 'शुक्रार्थी' इति—ख० । 'शुद्धार्थम्' इति—क-ग० । ६ 'कथंभूतं वृत्रम्' इत्यस्य स्थाने 'इत्थंभूतम्' इत्येव पाठः—क ग० । ७ 'दहते' इत्यस्य स्थाने 'हन्ते' इति—क-ग० । ८ 'कोऽर्थः ? कामयमानरूपं दहतीत्युशधक्' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ।
महाँ २ इन्द्रो य ओजसा कदा चन स्तरीरसि कदा चन प्रयुच्छसि ॥२७॥
(मा० ३३।२७)

[1]इन्द्रागस्त्यमरुतां संवादे मरुतां वाक्यमिदं कुतस्त्वमिति । इन्द्रदेवत्यस्त्रैष्टुभः । प्रगाथः । अगस्त्य ऋषिः । हे इन्द्र, कुतः कस्माद्धेतोः । त्वं माहिनः महनीयः पूज्यः सर्वस्य पूज्यः [2]सन् । एकः असहायः यासि । हे सत्पते, श्रुतिस्मृत्यनुष्ठानानां [3]पालयितः । किं त इत्था । ते तव इत्था [4]इत्थंभावे किं प्रयोजनमस्ति येन एकाकी असि । तत्किमिति नः अस्माकं वोचेः ब्रूहि, अस्मान्वा संपृच्छसे संपृच्छस्व । समराणः संगच्छमानः अस्माभिः सह संगच्छमानः संपृच्छसे । शुभानैः शोभमानैर्मार्गैः समराणः संगच्छमानः किमेवमवोचः[5] । तर्हि तद् ब्रूमः । नो हरिवो यत्ते अस्मे । हे हरिवः अश्वसम्पन्न इन्द्र, नः अस्माकमिन्द्र । यत्ते तव प्रवृत्तिकारणं तदस्मे अस्मभ्यं ब्रूहि । [6]महानिन्द्रो य ओजसा कदाचन स्तरीरसि कदाचन प्रयुच्छसि । (स्तरीः ।) स्तृणातेर्हिंसार्थस्यैतद्रूपम् [निघ० २।१९] । ओजसा बलेन यो महान् सत्त्व इन्द्रः [7]कदाचिदपि न स्तरीरसि [8]न कुप्यसि कदाचिदपि न प्रयुच्छसि । [9]युच्छतिः प्रमादार्थः । कदाचिदपि न प्रमाद्यसि ॥ २७ ॥

आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं ये पुरुपुत्रां महीꣳ सहस्रधारां बृहतीं दुदुक्षन् ॥ २८ ॥
(मा० ३३।२८)

ऐन्द्री त्रिष्टुप् । [10]ऋषिर्गौरीवितिः । आतत्ते । हे इन्द्र परमैश्वर्यसम्पन्न, ते तव तद्वृत्रवधा-

---

१ 'इन्द्रमरुत्संवादे' इति—उवटः । २ 'सन्' नास्ति—क—ग० । ३ 'फलम्' इति—क—ख—ग० । ४ 'इत्थंभूतम्' इति—क—ग० । ५ 'एवोचः' इति—क—ग०, 'अवोचः' इति—ख० । ६ 'महानिन्द्रो''''प्रयुच्छसि'नास्ति—क० । ७ कदापि—क० । ८ 'न कुप्यसि कदाचिदपि न प्रयुच्छसि' नास्ति—ख० । ९ 'युच्छ प्रमादे' [२१४ भ्वादिः] । १० 'गौरी' इति—क—ख—ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिकम् । आयवः मनुष्या यजमाना अभिपनन्त । [1]'पन पण व्यवहारे' । [2]पनतिरत्र पूजाकर्मा [निघ० ३।१४] । [3]अभिपनन्त अभिपूजयन्ति । किं च, य ऊर्वं गोमन्तं तितृत्सान् । य ऊर्वमन्नं सोमलक्षणं तितृत्सान् । [4]'उतृदिर् हिंसानादरयोः' [१४४७ रुधादिः] । [5]तर्दितुं हिंसितुमिच्छतीति । [6]सोमवल्ल्या च हननमेव हिंसा नाम । निग्राभ्या (भिः) सोमोऽभिषूयत इति । [7]गोमन्तमुदकवन्तं सोममिति । ससोमम् उदकं [8]योऽभिषिञ्चतीति । एवमूर्वं सोमलक्षणमन्नं तत्रोपयोगि गोमन्तं जलवन्तम् । सकृत्स्वं सकृदेकवारमेव स्वेन हिरण्यादिना यः प्रसूत इति स सकृत्स्वः सोमस्तं सकृत्स्वं सोमम् । तितृत्सान् अभिवृतः सन् (?) । एवं सोमाभिषवं ये कुर्वन्ति तेऽपि त्वामेवाभिपनन्त अभ्यपूजयन् । किं च, ये यजमानाः । [9]पुरुपुत्रां बहुपुत्राम् । सर्वेऽपि पदार्थाः पृथिव्यामेव प्रायश उत्पद्यन्त इति तां [9]पुरुपुत्राम् । महीं महनीयां पूज्याम् । सहस्रधारां सहस्रशो भोगप्रदाम् । बृहतीं गुणतो [10]बृहद्रूपां महीम् । दुदुक्षन् अदुधुक्षन् । 'दुह प्रपूरणे' [१०१४ अदादिः] । दुदुक्षन् दोहनं कृतवन्तः । [11]दकारश्छान्दसः । तेऽपि तव कर्मैव [12]कृतवन्तोऽभिपनन्त पूजयन्ति ॥२८॥

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसा मदन्ननु ॥२९॥
(मा० ३३।२९)

इन्द्रदेवत्या जगती । कुत्स ऋषिः । हे इन्द्र, यस्य ते तव स्तोत्रे यत् [13]या धिषणा बुद्धिर्वाग्वा । तां महीं महनीयां महतीमिमां धियम् । प्रभरे धारयामि । किं च यत् ते तव महः

---

१ 'पण व्यवहारे स्तुतौ च, पन च' [४३९- ४४० भ्वादिः] । २ 'पानतिरत्र' इति–क० । 'पनिरत्र' इति–ख० । ३ 'अतिपनन्त अतिपूजयन्ति' इति–क-ख ग० । ४ 'तृ हिंसायाम्' इति–क-ख-ग० । ५ 'तर्तितुम्' इति–क-ख-ग० । ६ 'सोमवल्ल्या च हननमेव हिंसा नाम' इत्यस्य स्थाने 'सोमवल्ल्यत्र दलनमेना' इति पाठः–ख० । ७ 'गोमन्तम्' इत्यस्य स्थाने 'सोमम्' इति–ख० । ८ 'योऽभिषिञ्चतीति ··· अभिवृतः सन्' इत्यस्य स्थाने 'योऽसि गच्छतीति ते इति संसकृत्स्वं सोमं ये ते सकृत्स्वं सोमयें त्रिवृत सन् अभिवृस्तन्' इति पाठः–ख० । ९ पुरुत्राम्–क० । १० बृहद्रूपिणीम्–ख० । ११ 'दकारश्छान्दसः' नास्ति–ख–ग० । १२ 'कृतवन्तः' नास्ति–ख० । १३ 'या धिषणा बुद्धिर्वाग्वा ताम्' इत्यस्य स्थाने 'शक्तिवर्णबुद्धियुक्ताम्' इति पाठः–ख०, 'बुद्धियुक्ताम्' इति–क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेजः स्वरूपमहमानजे अभिव्यक्तं करोमि साक्षात्करोमि । तमिन्द्रम् । कथंभूतम् ? सासहिं भृत्यापराधसहनशीलमिन्द्रम् । उत्सवे यज्ञादिमहोत्सवे च [1]प्रसवे चाभ्यनुज्ञायां वर्तमाना देवासः । शवसा बलेन । अन्वमदन् तमिन्द्रमभिष्टुवन्ति ॥ २९ ॥

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥३०॥
(मा० ३३।३०)

[2]सूर्यस्तुत्युक्थ्ये तृतीयेऽहनि चतुर्दश पुरोरुचः । तत्र विभ्राडिति सूर्यदेवत्या जगती । [3]प्रस्कण्व ऋषिः । विभ्राड् बृहत् । 'भ्राजृ दीप्तौ' [१८१, ८२३ भ्वादिः] । विशेषेण भ्राजत इति विभ्राट् सूर्यः । द्वितीयोऽर्द्धर्चः प्रथमं व्याख्येयः, यच्छन्दयोगात् । यो वातजूतः वातेन वायुना जूतः प्रेरितः सन् यः सूर्यः । अभि अभितः सर्वतस्तमोनिर्हरणादिना [4]जनान् रक्षति । त्मना । वर्णलोपश्छान्दसः । आत्मना स्वस्वरूपेणैव । प्रजाः पुपोष आतपवर्षादिभिः सर्वाः प्रजाः सदा यः पोषयति पुष्यति च । स विभ्राड् विशिष्टदीप्तिसंपन्नः सूर्यः । बृहत् महत् । सोम्यं सोममयम् । मधु मध्विव मधु अमृतम् । पिबतु । किं कुर्वन् पिबत्विति ? आयुर्दधद्यज्ञपता अविह्रुतम् । [5]'ह्वृ कौटिल्ये' [९३१ भ्वादिः] । 'ह्रु ह्वरेश्छन्दसि' [अष्टा० ७।२।३१] इति ह्रु आदेशः । अनवखण्डितम् । आयुः जीवनकारणम् । यज्ञपतौ यजमाने । दधत् अनवखण्डितमायुः स्थापयन् मधु पिबत्विति सम्बन्धः । एवंलक्षणः सूर्यो विराजतीति ॥३०॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ ३१ ॥ (मा० ३३।३१)

सूर्यदेवत्या गायत्री । ऋषिः प्रस्कण्वः । पूर्वं व्याख्यातोऽयं[6] मन्त्रः [८।२३] ॥३१॥

---

१ 'प्रसवे च' नास्ति–क ग० । २ 'सूर्यस्तुतावुक्थ्ये' इति–क-ख-ग० ।
३ 'विभ्राट्' इति–सर्वा० मही० च । ४ 'जनाद् रक्षति' इति–क-ख-ग० ।
५ 'ह्वृ कौटिल्ये'.....'ह्रु आदेशः' इति नास्ति–ख०, गपुस्तके च टिप्पणीरूपेण धृतः ।
६ 'अयम्' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

येना पावक चक्षसा भुरण्यन्तं जनाँ २ अनु ।
त्वं वरुण पश्यसि ॥ ३२ ॥ (मा० ३३।३२)

सूर्यदेवत्या गायत्री । ऋषिः प्रस्कण्वः । येन [1]सर्वमेधाग्निश्चीयते [2]तेन रूपेणास्मानं संपद्यते यजमानः स्वार्थं प्राप्नोति तदिह प्रार्थ्यते । येना पावक चक्षसा । हे पावक पावयितः सर्वशुद्धिकर हे सूर्य, येन चक्षसा दर्शनेन । [3]चक्षतिर्दर्शनार्थः । भुरण्यन्तम् । शकुनिः क्षिप्रयायी भुरण्युरित्युच्यते [निघ० २।१५, निरु० १२।२२] । [4]क्षिप्रं मामेति च जनान् सर्वमेधयाजिनो जनान् अनु । भुरण्यन्तं [5]भुरणुवद्रूपमात्मानं (कृत्वा, गच्छन्तं [6]पक्षिरूपेण क्षिप्रं गच्छन्तमतिवाहिकदेवतारूपं देवम् । हे वरुण सूर्य, त्वं पश्यसि । एवं सर्वद्रष्टा सूर्यः स्तूयते ॥३२॥

दैव्या अध्वर्यू आगतꣳ रथेन सूर्यत्वचा । मध्वा यज्ञꣳ समञ्जाथे ।
तं प्रत्नथायं वेनश्चोदयच्चित्रं देवानाम् ॥ ३३ ॥ (मा० ३३।३३)

सूर्यदेवत्या गायत्री । तिस्रस्तु प्रतीकोक्ताः । ऋषिः प्रस्कण्वः । हे दैव्यौ [7]अध्वर्यू अध्वरस्य नेतारौ, आगतम् इह आगच्छतम् आगमनं कुरुतम् । रथेन सूर्यत्वचा । सूर्यस्य त्वगिव त्वग् यस्य स सूर्यत्वक् सूर्यत्वचा रथेनागतमिति सम्बन्धः । मध्वा यज्ञं समञ्जाथे । मध्वा मधुवत्स्वादुना हविषा सोमपुरोडाशदध्यादिना यज्ञं समञ्जाथे यज्ञमभिव्यक्तमतिप्रकृष्टं कुरुतम् । प्रभूतानि हवींषि कुरुतमित्यर्थः । तं प्रत्नथा [७।११], अयं वेनश्चोदयत् [७।१५], चित्रं देवानाम् [८।२४] इति तिस्रः प्रतीकोक्ताः ॥ ३३ ॥

आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ ३४ ॥
(मा० ३३।३४)

---

१ 'सर्वमेधेना....' इति-ख० । २ 'येन' इति-ख-ग० । ३ 'चक्षिङ् व्यक्तायां वाचि, अयं दर्शनेऽपि' [१०१७ अदादिः] । ४ क्षिप्रनामैव च-ख० । ५ भुरण्यं तद्रूपमात्मानम्-ख० । ६ क्षिप्ररूपेण-ख० । यजिरूपेण-क-ग० । ७'अध्वर्यू' नास्ति-क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सवितृदेवत्या त्रिष्टुप्। [1]पुलस्त्य ऋषिः। आ न इळाभिः। नः अस्माकम्। विदथे यज्ञे। इळाभिः करणभूताभिः। सुशस्ति। अविभक्तिको निर्देशः। सुशस्तिभिः [2]शोभनशंसनैर्निमित्तभूतैः सहितः। विश्वानरः सर्वप्राणिनामात्मभूतः। सविता सर्वप्राणिनां प्रसवकर्ता। देवः देवनादिगुणयुक्तः। एतु आ एतु आगच्छतु। अपि यथा युवान इति। अपि [3]च यथा येन प्रकारेण। हे देवाः, युवानः सर्वकर्मकरणक्षमाः। नः अस्मान्। मत्सथा माद्यथ तृप्यथ। किं च, विश्वं जगत् स्थावरजङ्गमात्मकं जगत्। अभि सर्वतः। मत्सथा माद्यथ [4]तृप्यथ। नः अस्माकं मनीषा बुद्धिः। [5]पित्वे। छान्दसं पदम्। पित्वे पानविषये मनीषा यथा स्यात्तथा सम्पादयेत्यर्थः। यद्वा सोमं पीत्वाम्बु पीत्वा पुनः पुनर्मनीषा यथा स्यात्तथा सम्पादयेति शेषः॥ ३४॥

यद॒द्य कच्च॑ वृत्रहन्नु॒दगा॑ अ॒भि सू॑र्य।
सर्वं॒ तदि॑न्द्र ते॒ वशे॑॥ ३५॥ (मा० ३३।३५)

सूर्यदेवत्या गायत्री। ऋषिस्तु [6]सूतकक्षसुकक्षौ। यत् यथा [7]कत् क इव कुत्रचित्। सूर्यः। सु सुष्ठु [8]उ ईरणात् प्रेरणात् सूर्य इति, तत्सम्बोधनं हे सूर्य। हे वृत्रहन्, वृत्रस्यासुरस्य [9]पाप्मनश्च [10]प्राणहन्तः। अद्य अस्मिन्नहनि। [11]यत् यत्र कुत्रचित्। अभि उदगाः तमः संहरन्नभ्युदितोऽसि। तदिदं सर्वं जगत् हे इन्द्र परमैश्वर्यसम्पन्न सूर्य। ते तव वशे। त्वमेव हि ईश्वरो नान्य इत्यर्थः॥ ३५॥

त॒रणि॑र्वि॒श्वद॑र्शतो ज्योति॒ष्कृद॑सि सूर्य।
विश्व॒मा भा॑सि रोच॒नम्॥ ३६॥ (मा० ३३।३६)

---

१ 'अगस्त्यः' इति-सर्वा०मही० च। २ 'शोभनशंसनैः' इति-गटिप्पणी। ३ 'च' नास्ति-क-ग०। ४ 'तृप्यथेति'-ख-ग०। ५ 'पित्वे। छान्दसं पदम्।' नास्ति-क०। ६ 'श्रुतकक्ष.....' इति-मही०। ७ 'कत् क इव' इत्यस्य स्थाने 'क इव' इति-ख०। ८ 'उ' नास्ति-ख० ९ 'पाप्मनश्च' नास्ति-क-ग०। १० 'प्राणहन्तः' इत्यस्य स्थाने 'वृत्रहन्तः' इति-ख०। ११ 'यत्' नास्ति-क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौरी गायत्री। ऋषिः प्रस्कण्वः। यस्त्वं तरणिः। संसारात्तारयतीति तरणिः सूर्यः। विश्वदर्शतः विश्वस्य सर्वस्य दर्शनीयः। ज्योतिष्कृत् [1]ज्योतिषः प्रकाशस्य कृत् कर्तासि। किं च, विश्वं सर्वम्। रोचनम्। [2]'रुच दीप्तावभिप्रीतौ च'[६४५ भ्वादिः]। चन्द्रग्रहादिकं ज्योतिरपि। त्वं भासि भासयसि। "तमेव भान्तमनुभाति सर्वं यस्य भासा सर्वमिदं विभाति" [श्वेता० ६।१४] इति श्रुतेः॥ ३६॥

तत्सूर्य॑स्य दे॒वत्वं तन्म॑हि॒त्वं म॒ध्या कर्तो॒र्वित॑त॒ꣳ सञ्ज॑भार।
यदेद॑युक्त ह॒रित॑: स॒धस्था॒दाद्रात्री॒ वास॑स्तनुते सि॒मस्मै॑॥ ३७॥

(मा० ३३।३७)

तत्सूर्यस्येति तन्मित्रस्येति च द्वे सूर्यदेवत्ये त्रिष्टुभौ। ऋषिः कुत्सः। [3]सूर्यस्य तव देवत्वं देवनादिगुणयुक्तत्वम्। सूर्यस्य तदेव महित्वं माहात्म्यं महाभाग्यम्। मध्या कर्तोर्विततं संजभार। [4]मध्या। कर्तोरिति कर्मनाम [निघ० २।१]। मध्ये सर्वप्राणिनामन्तः हृदयमध्ये स्थित्वा बहिरपि गगनमध्ये स्थित्वा कर्माणि क्रियमाणानां देवासुरमनुष्यादिसम्बन्धिनां कर्मणां प्रतिबन्धभूतं महन्मोहविततं मोहजालं बहिः स्थितं मोहजालं च। [5]संजभार संजहार संहरतीति यत्तदेव सूर्यस्य देवत्वं सूर्यमहत्त्वमिति सम्बन्धः। मध्ये च विततं रश्मिजालं संजभार संजहारेति यत्तदेव सूर्यस्य देवत्वम्। रश्मिजालं यथा विस्तारयितुमुपसंहर्तुं च स एव समर्थो नान्य इत्यभिप्रायः। किं च, यदेदयुक्त। यदा इत् अपि यदाकाले। हरितः हरितवर्णान् रश्मीन्। सधस्थात् सहस्थानात्। रश्मीनां सहस्थानम्, आदित्यरश्मयो यत्र विस्तार्य यावन्तं कालं प्रकाशयन्ते तद्धि सहस्थानम्, तस्मात्सहस्थानात्। आत् आहृत्य रश्मीन्। आत्मन्ययुक्त आत्मसंस्थानकरोत्। तदाकाले रात्रीवासस्तनुते सिमस्मै। रात्रीवास इति तमोनाम। रात्रौ वसतीति रात्रिवासस्तमः। सिमस्मै। सिमशब्दः सर्वनामसु पठितः। सर्वस्मै [6]तस्मै तनुते विस्तारयति। एवं स्वरश्मीन् विस्तारयितुमुपसंहर्तुं च श्रीभगवत ईश्वरात्मकस्य सूर्यस्यैव सामर्थ्यं नान्यस्येत्यभिप्रायः॥ ३७॥

---

१ 'ज्योतिषः' नास्ति–ख०। २ 'रुचिः दीप्तेः' इति–क ख–ग०।
३ 'तत्सूर्यस्य' इति–क०। ४ 'मध्या मध्या' इति–ख०। ५ 'संजभार' नास्ति–ख०।
६ 'तस्मै' नास्ति–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति ॥३८॥

(मा० ३३।३८)

तद्रूपं सूर्यः। द्योः द्युलोकस्य। उपस्थे उत्सङ्गे। यद्रूपं कृणुते करोति तद्रूपं मित्रस्य वरुणस्य चाभवत्। कस्मै इति? अभिचक्षे। [1]'चक्षिङ् दर्शने' [१०१७ अदादिः]। अभिचक्षे अभिदर्शनाय। सूर्यकृतेन रूपेण मित्रो हि सुकृतिनोऽनुगृह्णाति। वरुणस्तु सूर्यकृतेन रूपेण दुष्कृतिनोऽनुगृह्णाति। एवमनेन प्रकारेण सर्वजगदनुगृह्णाति सूर्यस्तस्य सर्वान्तर्यामित्वात्। किंच, अनन्तमन्यद्रुशदस्य पाजः। तस्य सर्वेषामपरोक्षभूतस्य। अनन्तं देशतः कालतो वस्तुतश्चान्तरहितमनन्तम्। अन्यद् एव सत्यज्ञानानन्तानन्दात्मलक्षणरूपं पाजः। [2]वर्णव्यत्ययः। [3]पादः। तत्पदं रुशत्। [4]रुशतिर्हिंसार्थः अविद्यादिसंहारकं श्रीहरिगुरुप्रसादादनुगृहीतं[5] मनो रुशदित्युच्यते। तन्मन एकं [6]पाजम्। पाज इति बलनाम [निघ० २९]। इह तु पाजशब्दः पादवचनः। पादमद्वैतलक्षणं रुशत् संभरन्ति। 'भृञ् भरणे' [८९८ भ्वादिः]। संभरन्ति। कृष्णमन्यद्धरितः संभरन्ति। कृष्णमन्यद् द्वैतं रूपं कृष्णं तमःप्रधानं जगद्रूपम्। हरितः रजोरूपा इन्द्रियवृत्तयो वृत्तिमदिन्द्रियाणि च संभरन्ति। एवंप्रकारेण सगुणनिर्गुणात्मकः श्रीभगवान् सूर्यः स्तूयते ॥ ३८ ॥

बण्महाँ २ असि सूर्य बळादित्य महाँ २ असि।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ २ असि ॥ ३९ ॥

(मा० ३३।३९)

सूर्यदेवत्या बृहती। जमदग्निः। बडिति सत्यनाम [निघ० ३।१०] हे श्रीभगवन् सूर्य, त्वं महान् अपरिच्छिन्नलक्षणः। बट् सत्यलक्षणं ब्रह्मासि। बळादित्य महानसि। हे

---

१ 'चक्षिङ् व्यक्तायां वाचि, अयं दर्शनेऽपि' इति-धातु । २ 'नामि व्यत्ययः' इति-ख०। ३ 'पाद एकः पादः। तत्पदं रुशत्' इति-ग०। 'पादम् एकं पदम्। 'पादः पत्' [अष्टा० ६।४।१३०]। पदं रुशत्' इति-ख०। ४ 'रुश हिंसायाम्' [१४२० तुदादिः]। ५ 'प्रसादानुगृहीतम्' इति-ख-ग०। ६ 'पाजः' इति-ख०।

७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभगवन्नादित्य, सर्वं जगत् स्वतेजसा आदत्त इत्यादित्यस्तत्सम्बोधनमादित्य । त्वमहान् [1]महत्सत्यरूपं परं ब्रह्मासि । महस्ते सतो महिमा पनस्यते । हे सूर्य, महः तेजः । सतः सद्रूपस्य ते तव तेजोरूपमहिमा । पनस्यते पूज्यते । सर्वैः प्राणिभिरिति शेषः । अद्धा देव महानसि । हे देव, देवनादिगुणयुक्त । अद्धेति सत्यनाम [निघ० ३।१०] । सत्यात्मको महानसि । अत्रादरार्थं पुनर्वचनम् । स्तुतौ पुनरुक्तिर्न दुष्यते । सर्वजगदुत्पत्तिजगदन्तर्यामिजगत्संहरणजगत्स्थित्या-दिकर्तृरूपोपलक्षितपरब्रह्मात्मकः सूर्य [2]इह स्तूयते ॥ ३६ ॥

बट् सूर्य श्रवसा महाँ २ असि सत्रा देव महाँ २ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ ४० ॥
(मा० ३३।४०)

सूर्यदेवत्या सतोबृहती जमदग्निर्ऋषिः । बट् [3]सत्यम् । हे सूर्य, श्रवसा । श्रव इति यशोनाम [निरु० ११।६] । श्रवसा यशसा श्रवणीयेन यशसा महानसि । सत्रेति सत्यनाम [निघ० ३।१०] । हे देव, सत्येन महानसि । किं च, मह्ना महत्त्वेन स्वकीयेन महत्त्वेन । त्वमेव देवानां मध्ये । असु प्राणास्तत्र रमत इत्यसुरः, तत्र भवः असुर्यः, अन्तर्यामित्वेन तत्रापि वर्तत इति । पुरोहितः पुरस्तादेव सर्वेषां हितकृत् पुरो हितश्च । किं च, विभु विभवनशीलं व्यापि च । ज्योतिः सत्यज्ञानानन्तानन्दात्मकं ज्योतिः । अदाभ्यम् । [4]दभ्नोतिर्हिंसाकर्मा [निघ० २।१६] । अदाभ्यमनुपहिंस्यं जन्मविनाशादिदोषरहितं ज्योतिरसि ॥ ४० ॥

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रतिभागं न दीधिम ॥ ४१ ॥
(मा० ३३।४१)

सूर्यदेवत्या बृहती । ऋषिर्नृमेधाः । 'श्रिञ् सेवायाम्' [८९७ भ्वादिः] । श्रायन्त इव आश्रिता इव । यथा सूर्यमाश्रिता रश्मयः । विश्वेदिन्द्रस्य । विश्वा विश्वानि । इत अपि । वसूनि

---

१ 'महत्' नास्ति–क-ख० । २ 'इह' नास्ति–ख० ।
३ सत्ये–ख० । ४ दम्नातिः-क-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनानि । इन्द्रस्य सम्बन्धीनि विश्वानि [1]सर्वाणि वसूनि इन्द्रानुज्ञातानि धनानि भक्षत । भक्षतिरत्र विभजनार्थः [निरु० ६।८] सूर्यावष्टम्भाद् [2]विभजत । वसूनि जाते जनमाने । एवं वयमपि सूर्यमाश्रिताः सन्तो विश्वानीन्द्रस्य धनानि । जाते पुत्रपौत्रादौ जाते । जनमाने [3]जनिष्यमाणे च । ओजसा बलेन कर्मज्ञानबलेन च । प्रतिभागं न इव । प्रतिपुरुषभागमिव स्थितं भागम् । दीधिम दधेमहि स्थापयामः । दधातेरेतद्रूपं [4]न तु ध्यायतेरर्थपौष्कल्यात् ॥४१॥

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥४२॥
(मा० ३३।४२)

'अद्या देवाः', 'आकृष्णेन' इति च द्वौ सूर्यदेवत्यौ त्रिष्टुभौ । कुत्स ऋषिः । अद्या [अद्य] अस्मिन्नहनि। हे देवाः देवनादिगुणयुक्ताः सूरयः यजमानाः । पूजार्थं बहुवचनम् । उदिता उदिते सूर्यस्योदयकाले । निर् अंहसः पापाद् विहिताकरणादिप्रयुक्तपापात्[5] । पिपृत 'पृ पालनपूरणयोः' [१०८६ जुहो०] । निष्पिपृत स्वात्मानं पापान्मोचयत[6] । किं च, निर् अवद्यात् अवद्यात् निन्दितात्कर्मणश्च । निष्पिपृत आत्मानं च मोचयत । किं च, हे देवाः यजमानाः । सूर्यस्योदिता सूर्यस्योदयकाले आगते निरंहसो निष्पापा अतो यूयं निरवद्याद् दोषरहितात्कर्मणः । व्यत्ययः । निरवद्यं कर्म कृत्वा निरवद्येन श्रुतिस्मृतिचोदितेन सन्ध्यावन्दनहोमादिकर्मणा पिपृत स्वात्मानं पालयत पुण्येन च पूरयत । किं च, तन्नो मित्रो वरुणो मामहन्तामदितिरिति । तत् कर्म । नः अस्माकं तत्कर्म । मित्रो वरुणोऽदितिर्देवता सिन्धुर्नदी पृथिवी च । उत अपि च द्यौः । इत्येता देवता मामहन्ताम् । छान्दसो दीर्घः [अभ्यासश्च] । [7]महन्ताम् 'मह पूजायाम्' [७३० भ्वादिः] । पूजयन्तां सफलं कुर्वतामित्यर्थः ॥ ४२ ॥

---

१ 'सर्वाणि' नास्ति–ख० । २ विवक्षन्–ख० ।

३ 'जनिष्यमाणे' नास्ति–ख० ।

४ 'तत् ध्यायामः । अर्थपौष्कल्यात्' इति–क-ग०, 'न ध्यायामः''''' इति–ख० ।

५ 'प्रयुक्तपापात्' इत्यस्य स्थाने 'प्रत्यवायात्' इति–ग०, 'प्रत्ययात्' इत्येव–क० ।

६ मोचयितुम्–क-ख-ग० । ७ ममहन्ताम्–क-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ४३ ॥

(मा० ३३।४३)

[1]कृष्णेन [2]रात्रिरूपेण रजसा अहोरूपेण च सहितः सविता । वर्तमानः पुनः पुनर्भ्रमणं कुर्वन् । निवेशयन् अमृतं देवादिकं प्राणिजातम्, मर्त्यं मनुष्यादिकं च निवेशयन् स्वेषु स्वेषु प्रदेशेषु [3]कार्यस्थानेषु प्रवेशयन् । हिरण्ययेन हिरणमयेनातितेजोमयेन देदीप्यमानेन रथेन । सविता देवनादिगुणयुक्तो देवः । भुवनानि भूतजातानि । साक्षाद् दृष्ट्वा अव्यवधानेन पश्यन् । [4]आयाति च याति चेति प्रसिद्धम् ॥ ४३ ॥

अथ वैश्वदेवश्चतुर्थमहर्भवति—

प्रवावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ ४४ ॥

(मा० ३३।४४)

चतुर्थेऽहनि वैश्वदेवस्तुत् । तत्रैकादश वैश्वदेव्यः पुरोरुचः, षट् प्रतीकोक्ताः । प्रवावृज इति त्रिष्टुप्[5] । वैश्वदेवस्तुतिर्वैश्वदेवस्य च पुरोरुक् । प्रवावृजे सुप्रया बर्हिः । सुप्रयाः शोभनप्रयाः प्रयाणं सुप्रगमनं येषां ते । प्रवावृजे 'वृजी वर्जने' [१०२६ अदादिः] । प्रवृज्यते [6]वर्ज्यते प्रच्छिद्यते गमनं विहायैकस्मिन् [7]स्थाने स्थित्वा । बर्हिरिति यजमानबर्हिः, यज्ञं ये कुर्वन्ति तेषामेषां यजमानानां बर्हिः । यज्ञम् आ इयाते । अश्विनावागच्छतम् । कौ इव ? विश्पतीव बीरिटे । विशां सर्वासां प्रजानां मनुष्याणां पती राजानाविव । बीरिट इति । बीरिटशब्दो गणवचनः [निरु० ५।२८] । विशां मनुष्याणां गणः । बीरिटेऽश्विनौ राजानाविव आ इयाते ।

---

१ अस्य मन्त्रस्याङ्गिरसो हिरण्यस्तूप ऋषिः । द्रष्टव्यम्—सर्वा० मही० च ।
२ रात्रीरूपेण—ख-ग० । ३ करप्रस्थानेषु—क-ख-ग० । ४ आयाति चेति च प्रसिद्धम्—क० ।
५ अस्य मन्त्रस्य वसिष्ठ ऋषिरिति—सर्वा० मही० च ।
६ 'वर्ज्यते' नास्ति—ख० । ७ स्थाने य स्थित्वा—क-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्मिन् काल इति ? अक्तोरुषसः । अक्तुरिति रात्रिनाम [निघ० १।७]। अक्तोरवसाने रात्र्यवसाने । उषस आगमनकाले । [पूर्वहूतौ पूर्वस्मिन् आह्वानकाले ।] इयात इति सम्बन्धः । किं च, वायुः प्राणवायुश्च । नियुत्वान् अश्ववान् । [1]नियुत इति वायोरश्वनाम [निघ०१।१५]। पूषा च । एतावपि इयात इति सम्बन्धः । स्वस्तये अविनाशाय इयात इति ॥ ४४ ॥

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् ।
आदित्यान्मारुतं गणम् ॥ ४५ ॥ (मा० ३३।४५)

'इन्द्रवायू बृहस्पतिम्', 'वरुणः प्राविता भुवत्' इति च द्वे वैश्वदेव्यौ गायत्र्या । [2]मेधातिथिः । इन्द्रश्च वायुश्चेति इन्द्रवायू तौ । बृहस्पतिम् । मित्रा । [3]छान्दसं पदम् । मित्रं सूर्यम् । अग्निं पूषणं भगम् आदित्यान् मारुतं गणं च । आह्वयामीति [4]च शेषः ॥ ४५ ॥

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।
करतां नः सुराधसः ॥ ४६ ॥ (मा० ३३।४६)

वरुणः [5]प्राविता प्रकर्षेणाऽविता [6]रक्षकः । भुवत् [7]भवतु । मित्रो विश्वाभिरूतिभिः[8] अवनैः सर्वप्रकारेणाऽविताऽभवत् । किं च, करतां नः सुराधसः । नः अस्मान् । सुराधसः साधुसिद्धिसंपन्नान् । करतां कुरुताम् ॥ ४६ ॥

अधि न इन्द्रैषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ।
तं प्रत्नथायं वेनश्चोदयद्यो देवास आ न इळाभिर्विश्वेभिः सोम्यं
मध्वोमासश्चर्षणीधृतः ॥ ४७ ॥ (मा० ३३।४७)

---

१ नियुत्वदिति—क-ग , नियुदिति—ख० ।

२ मेधातिथिः, उभयोर्मन्त्रयोर्ऋषिरिति योजनीयम् । ३ छान्दसपदम्—ग० ।

४ 'च' नास्ति—ख० । ५ 'प्राविता' नास्ति—ख० । ६ रक्षणः—ख० ।

७ अभवत्—ख० । ८ 'ऊतिभिः' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैश्वदेवी गायत्री । पट् प्रतीकोक्ताः । ऋषिः [1]कुसीदी काण्वः । [2]अधि नः । हे इन्द्र, एषां सजात्यानां [3]समानजात्यानाम् । [4]हे इन्द्र हे विष्णो सर्वव्यापक अभीष्टप्रद । मरुतः । अश्विना अश्विनौ च । नः अस्माकं यज्ञम् । अधि इता अभि इत [5]अभ्यगच्छत । 'तं प्रत्नथा पूर्वथा' [७।११] इति, 'अयं वेनश्चोदयत्पृश्निगर्भा' [७।१५] इति, 'ये देवासो दिव्येकादशस्थ' [७।२०] इति, 'आ न इळाभिर्विदथे सुशस्ति' [३२।३४] इति, 'विश्वेभिः सोम्यं मध्वग्न इन्द्रेण' [३२।१०] इति, 'ओमासश्चर्षणीधृतो विश्वेदेवासः' [७।३३] इत्येते प्रतीकोक्ता मन्त्रा विनियुक्ताः ॥ ४७ ॥

अग्न इन्द्र वरुण मित्र देवाः शर्धः प्रयन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥ ४८ ॥
(मा० ३३।४८)

वैश्वदेवी त्रिष्टुप् । प्रतिक्षत्र ऋषिः । हे अग्ने, हे इन्द्र, [6]हे वरुण, हे मित्र, हे देवाः । शर्धः बलं बलरूपा देवताः । [यूयम्] प्रयन्त प्रकर्षेण आगच्छत । अस्मद्यज्ञमिति शेषः । हे मारुत । [7]उत अपि । हे विष्णो । उभा उभौ । हे नासत्या अश्विनौ चेत्येते देवाः [8]प्रयन्त । [9]अध अथ । रुद्रः । ग्नाः [10]देवपत्न्यः वाग्देवताः पूषा भगः सरस्वतीदेवता चेत्येते देवाः । आगत्य यज्ञं जुषन्त [11]सेवन्ताम् ॥ ४८ ॥

इन्द्राग्नी मित्रा वरुणादितिꣳ स्वः पृथिवीं द्यां मरुतः पर्वताँ२ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳ सवितारमूतये ॥ ४९ ॥
(मा० ३३।४९)

---

१ कुसादी–क-ग०, कुशिदि–ख० । २ 'अधि नः' नास्ति–क-ग० । ३ समानजातानाम्–ख० । ४ 'हे' नास्ति–ख० । ५ 'अभ्यगच्छत' इत्यस्यानन्तरम्–'तं प्रत्नथायं वेनश्चोदयद्ये देवास आ न इळाभिर्विश्वेभिः सोम्यं मध्वोमासश्चर्षणीधृतः' इत्यधिकं खपुस्तके । ६ 'हे' नास्ति–क० । ७ 'उत' नास्ति–ख० । ८ 'प्रयन्त' नास्ति–क-ग० । ९ 'अध' नास्ति–ख० । १० 'देवपत्न्यः' नास्ति–ख० । ११ सेवन्त–क-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैश्वदेवी जगती । [1]काश्यपो वत्सार ऋषिः । इन्द्राग्नी मित्रावरुणा अदितिं स्वः पृथिवीम् । द्यां द्युलोकम् । मरुतः देवान् । पर्वतान् पर्वताभिमानिदेवताः । अपः उदकदेवताश्च । विष्णुं पूषणं ब्रह्मणस्पतिम् । भगं भगं नाम देवम् । शंसम् । सवितारं प्रतिप्रसवकर्तारं [2]चेत्येतान् [3]देवान् । हुवे आह्वये आह्वानं करोमि । ऊतये अवनाय ॥ ४९ ॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ २ अवन्तु देवाः ॥५०॥
(मा० ३३।५०)

वैश्वदेवी त्रिष्टुप् । [4]उमानाम ऋषिः । अस्मे अस्माकम् । रुद्रा मेहना । छान्दसं पदम् । मेहनाः महनीया रुद्राः । पर्वतासः पर्वताः । वृत्रहत्ये वृत्रवधार्थम् । भरहूतौ । भर इति संग्रामनाम [निघ० २।१७] । हूतौ हूतिराह्वानं संग्रामार्थमाह्वाने सति । सजोषाः सजोषसः समानप्रीतयः । एकाभिप्राया भवन्त्विति शेषः । यः शंसते शस्त्राणि शंसते शंसनं करोति । स्तुवते स्तोत्राणि करोति । धायि अधायि येन [5]हविरधायि । [6]पज्रः पज्रो [7]जयो येन धायि [8]अकारि । इन्द्रो ज्येष्ठो येषां देवानां ते देवा इन्द्रज्येष्ठाः । [9]ये देवा इन्द्रज्येष्ठास्ते सर्वे । अस्मान् अवन्तु रक्षन्तु ॥ ५० ॥

अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥ ५१ ॥
(मा० ३३।५१)

वैश्वदेवी त्रिष्टुप् । कूर्मो गार्त्समद ऋषिः । हे यजत्राः यजनीयाः । अद्य अस्मिन्नहनि । हे देवाः, अर्वाञ्चः अर्वागञ्चना अस्मानभिमुखतयाऽऽगम्यमाना भवत । आ वो हार्दि भयमानो

---

१ कश्यपावत्सार–क-ख-ग० । २ चेत्येनान्–ग० । ३ 'देवान्' नास्ति–क-ग० । ४ प्रगाथं ऋषिरिति–सर्वा०मही०च । ५ हरि–क-ग० । ६ 'पज्रः' इत्यत्र–"प्रकर्षेणार्जयतीति पज्रः प्रार्जितधनः सन् यो धायि" इति–ग०टि० । ७ अयः–ख० । ८ 'अकारि' इत्यस्याग्रे 'अयः कृतः' इत्यधिकम्–ख० । ९ 'ये देवाः' नास्ति–ग०, 'ये देवा इन्द्रज्येष्ठाः' इत्येतावान् नास्ति–क० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्ययेयम् । व्ययतिर्गत्यर्थः । 'अय पय गतौ' [४७४, ४७६ भ्वादिः] विपूर्वः । [1]आव्ययेयम् । [2]वः युष्माकम् । वः युष्मान् प्रति । हार्दि हृदयसम्बन्धि । यद्वा हृदेव हार्दि, हृदयं युष्मद्धृदयमभिप्रायं प्रति भयमानः बिभ्यत् । [3]आव्ययेयम् [4]आगच्छेयम् । अतो ब्रवीमि—त्राध्वं नो देवाः । हे देवाः, नः अस्मान् । त्राध्वम् । [5]'त्रैङ् पालने' [९६५ भ्वादिः] पालयध्वम् । निजुरः भक्षितमन्नं नितरां जरयतीति[6] निजुरः [7]अतिबुभुक्षितो जठराग्निः । वृकस्य वृकादेर्यो निजुरः । अस्मान्नः त्राध्वम् । कर्तात् । [8]कर्तोरिति कर्मनाम [निघ० २।१] । अनर्थहेतोश्च त्राध्वम् । अवपदो यजत्राः । यष्टव्या देवाः । अवाचीनानि पदानि यत्र भवन्ति [सोऽवपात्], तस्मादवपदः अतिसङ्कटसोपानादिविषमस्थानात् । नः त्राध्वम् ॥ ५१ ॥

विश्वे॑ अ॒द्य म॒रुतो॒ विश्व॑ ऊ॒ती विश्वे॑ भवन्त्व॒ग्नयः॒ समि॑द्धाः ।
विश्वे॑ नो दे॒वा अव॒सा ग॑मन्तु॒ विश्व॑मस्तु॒ द्रवि॑णं॒ वाजो॑ अ॒स्मे ॥ ५२ ॥

(मा० ३३।५२)

[9]अयं मन्त्रो व्याख्यातः [२०।२] ॥ ५२ ॥

विश्वे॑ दे॒वाः शृणु॒तेमꣳ हव॑मे॒ ये अ॒न्तरि॑क्षे॒ य उप॒द्यवि॒ ष्ठ ।
ये अ॑ग्निजि॒ह्वा उ॒त वा॒ यज॑त्रा आ॒सद्या॒स्मिन्ब॒र्हिषि॑ मादयध्वम् ॥ ५३ ॥

(मा० ३३।५३)

वैश्वदेवी त्रिष्टुप् । [10]होता ऋषिः । हे विश्वेदेवाः, शृणुत । मे मम । इमं हवम् आह्वानं शृणुत[11] शृणुध्वम् । ये विश्वेदेवाः । अन्तरिक्षे स्थाने । स्थ स्थिताः । ये च देवाः । उपद्यवि द्युलोकसमीपे । स्थ स्थिताः । ये देवाः । अग्निजिह्वाः अग्नेर्जिह्वेव जिह्वा येषां तेऽग्निजिह्वा अग्निमुखा देवाः । उत अपि वा । [12]ये यजत्राः यष्टव्याः । [13]एवमस्मदाह्वानं श्रुत्वा । आसद्या-

---

१ अव्ययेयम्—क-ग० । २ 'वः' नास्ति—ख० । ३ अव्ययेयम्—क-ख-ग० । ४ अगच्छेयम्—क-ख-ग० । ५ त्रैन्- क-ग०, त्रै—ख० । ६ 'जरयतीति' इत्यस्याग्रे 'निजूस्तस्य' इत्यधिकः पाठः—क-ग० । ७ अतिबुभुक्षितस्य—क-ग० । ८ कर्त्तादिति—क-ख-ग० । ९ 'अयम्' नास्ति—ख-ग० । १० सुहोत्र ऋषिरिति—सर्वा०महीo च । ११ 'शृणुत' नास्ति—क-ग० । १२ 'ये' नास्ति—ख० । १३ 'एवम्' इत्यस्य स्थाने—'ये च' इति पाठः—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मिन्बर्हिषि[1]। आगत्य [2]बर्हिषि यज्ञे स्थित्वा यष्टव्यं हविरादाय। मादयध्वं माद्यध्वं तृप्यध्वं हृष्यध्वं च ॥ ५३ ॥

देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम्।
आदिद्दामानꣳ सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥ ५४॥
(मा० ३३। ५४)

वैश्वदेवी [3]त्रिष्टुप्। वामदेवः [ऋषिः]। देवेभ्यो हि। हि यस्मात्। देवेभ्यो यज्ञियेभ्यः यज्ञसम्बन्धिभ्यो देवेभ्यः। प्रथमं [4]पूर्वं। अमृतत्वम् अमृतरूपम्। उत्तमं श्रेष्ठतमम्। सुवसि [5]प्रसुवसि [6]अनुजानासि। आत् इत् हे सवितः, अनन्तरं हि यजमानेन दीयमानं स्वकीयं भागमुपस्थितम्। वि ऊर्णुषे। 'ऊर्णुञ् आच्छादने' [१०३९ अदादिः]। ऊर्णुषे विस्तारयसि। अनूचीना जीविता मानुषेभ्यः। अनूचीना अवाचीना रश्मिना सर्वमानुषपालकेन रश्मिना। जीविता जीवितानि सर्वमानुषहेतुभूतानि हविःपरिणामलक्षणानि[7] अन्नानि। मानुषेभ्यः सुवसि अनुजानासि। तथा [8]च—"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥" [मनु० ३।७६] इति [9]स्मृतेः। तस्मात् त्वामेव वयं स्तुम इति शेषः ॥५४॥

समाप्तं सार्वमेधिक कर्म ॥

इदानीं द्वावनुवाकौ [व्याख्येयौ]। पुरोरुचां मन्त्राणां गणाननारभ्याधीतान्[10] सर्वानादित्य-याज्ञवल्क्यौ ददृशतुः, [11]आपितृमेधात्। अतस्तेषां मन्त्राणामृषिरादित्यो याज्ञवल्क्यश्च।

---

१ 'अस्मिन् बर्हिषि' नास्ति—ख०। २ 'बर्हिषि' नास्ति—ख०। ३ 'जगती' इति—सर्वा०महीं०च। ४ पूर्वे—क-ख-ग०। ५ प्रसव—क-ग०, प्रसुव—ख०। ६ अनुजानीहि—क-ख-ग०। ७ परिमाण—क-ग०। ८ 'च' नास्ति—क०। ९ श्रुतेः—क-ग०। १० 'अनारभ्याधीतान्' इत्यत्र—"अपेतो यन्तु पणयः" [३५। १] इत्ययमध्यायः पितृमेधसम्बन्धात् पितृमेधः। 'प्र वायुम्' इत्यारभ्य 'अपेतो यन्तु' इत्येतस्मात् प्राङ्मन्त्रगणोऽनारभ्याधीतः। कञ्चन कर्मविशेषमारभ्योपक्रम्याधीत आरभ्याधीतः, तथाभूतो न सोऽनारभ्याधीतः श्रौतकर्मविशेषे कुत्राप्यविनियुक्त इत्यर्थः।" इति—ग०टि०। ११ 'आपितृमेधात्' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चदशर्चः पुरोरुग्गणः । द्वे तु प्रतीकोक्ते । पाठस्तु—

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारꣳ रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ५५ ॥
(मा० ३३ । ५५)

वायुदेवत्या त्रिष्टुप् । ऋषिश्च ऋजीषवः । अत्र प्रथमं चतुर्थपादमारभ्य व्याख्यायते । कविः कविमियक्षसि प्रयज्यो । प्रकर्षेण यजनशीलः प्रयज्युः, [1]तस्य संबोधनं [2]हे प्रयज्यो हे यजमान । त्वं कविः । कविः क्रान्तदर्शनः । अत एव कविं क्रान्तदर्शिनं कंचिद्देवम् । इयक्षसि । यजेः सन्येतद्रूपम् । यजसि । अतस्त्वां प्रति ब्रवीमि । प्रवायुमिति । वायुं यज । [3]अच्छाभिमुख्येन यज । यद्वा अच्छ व्यत्ययः । अच्छा निर्मला । बृहती [4]महती । मनीषा बुद्धिः । देवं यज्ञम् । तव बुद्धिरस्ति चेद् वायुं यज । कथंभूतमिति ? बृहद्रयिं महद्धनम् । विश्ववारं विश्वैः सर्वैर्वरणीयं विश्ववारम् । रथप्रां शश्वत्त्वै रथं पूरयितारम् । 'प्रा पूरणे' [१०६१ अदादिः] । रथप्राम् । वायुं यजेति सम्बन्धः । द्युतद्यामा नियुतः पत्यमानः । यो वायुरेवंगुणः—द्युतद्यामा द्युता [5]अतिप्रकाशेनादित्यादीन् यमयति नियमयतीति द्युतद्यामा वायुः । वायुपाशबद्धा एव ह्यादित्यादयः प्रचरन्तीति प्रसिद्धम् । नियुतः । व्यत्ययः । नियुता स्ववाहनेनाश्वेन । पत्यमानः आगम्यमानः । कविरित्येवंगुणो वायुः । तं वायुं यजेति सम्बन्धः ॥ ५५ ॥

इन्द्रवायू इमे सुता उप प्रयोभिरागतम् ।
इन्दवो वामुशन्ति हि ॥५६॥ (मा० ३३।५६)

व्याख्यातोऽयं[6] मन्त्रः [७ । ७] ॥ ५५ ॥

मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताचीꣳ साधन्ता ॥ ५७ ॥ (मा० ३३।५७)

---

१ 'तस्य' नास्ति—ख० । २ 'हे' नास्ति—ख० । ३ 'अच्छाभिमुख्येन यज । यद्वा' नास्ति—ख० । ४ 'महती' नास्ति—क-ग० । ५ अतिप्रकाशयन्नादित्यादीन्—ख० । ६ 'अयम्' नास्ति-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रदेवत्या गायत्री। मधुच्छन्दा ऋषिः। मित्रं पूतदक्षं पूतस्य शुद्धस्य प्राणिन उद्धरणे दक्षं मित्रम्। हुवे आह्वयामि। वरुण च रिशादसम्। [1]रिशतिर्हिंसार्थः। [2]'दसु उपक्षये' [१२१३ दिवादिः]। रिश्यंते हिंस्यत इति रिशा हिंसा, तां हिंसां दस्यति उपक्षिणोतीति रिशादाः, तं रिशादसम्। वरुणं हुवे। कथंभूतौ मित्रावरुणौ ? धियं घृताचीम्। धीरिति कर्मनाम [निघ० २।१]। घृतेनाञ्चतीति [3]घृताची, तां घृताचीम्। द्रव्यान्तराणां घृतमुपलक्षणम्। घृतादिभिः साध्यं कर्म। [4]साधन्ता कर्मणां सफलतां साधयन्तौ। मित्रावरुणौ हुवे इति सम्बन्धः ॥ ५७ ॥

दस्रा॑ युवाक॑वः सुता नास॑त्या वृक्तब॑र्हिषः। आया॑तꣳ रुद्रवर्तनी।
तं प्रत्नथायं वेनश्चोद॑यत् ॥ ५८ ॥ (मा० ३३।५८)

अश्विदेवत्या गायत्री। 'तं प्रत्नथा' [७।११], 'अयं वेनश्चोदयत्' [७।१५] इति द्वे प्रतीकोक्ते। मधुच्छन्दा ऋषिः। द्वयोरश्विनोरेकस्य [5]दस्र इति नाम, अपरस्य नासत्य इति नाम। अथाप्येकं नाम उभौ ब्रूते। दस्रा दस्रौ। युवाकवः युवाम् अश्विनौ [6]पिबतमापिबतामिति कामयमानाः सोमाः युवाकवः। सुताः अभिषुताः। वृक्तबर्हिषः विविक्तबर्हिषः। एतान् सोमान् प्रति। नासत्या नासत्यौ। आयातं रुद्रवर्तनी। रुत्या ज्ञानेन संसारकरणं (?) द्रावयतीति रुद्रः, तस्य [7]वर्तनिर्मार्गो ययोरश्विनोस्तौ रुद्रवर्तनी, तत्संबोधनं हे रुद्रवर्तनी अश्विनौ। सोमान् प्रति। आयातम् आगच्छतम्। [8]'तं प्रत्नथा' [७।११], 'अयं वेनश्चोदयत्' [७।१५] इति [8]प्रतीकोक्तौ ॥ ५८ ॥

विदद्यदी॑ सरमा॑ रुग्णमद्रेर्महि॒ पाथः॑ पूर्व्यꣳ सध्र्य॑क्कः।
अग्रं॑ नयत्सुपद्यक्षराणामच्छा रवं॑ प्रथमा जान॑ती गा॑त् ॥ ५९ ॥
(मा० ३३।५९)

---

१ 'रिश हिंसायाम्' [१४२१ तुदादिः]। २ दक्ष–क०, दस–ख-ग०। ३ 'घृताची ताम्' नास्ति–क०। ४ 'साधन्ता' इति द्विवारं पठितः–ख०। ५ 'दस्रः' इत्यत्र–"हे दस्रौ दर्शनीयौ। हे नासत्यौ नासत्यावित्यर्थः" इति–ग० टि०। ६ 'पिबतमा' नास्ति–ख०। ७ "सरणिः पद्धतिः पद्या वर्तन्येकपदीति च" [२।१।१५] इत्यमरः। ८ प्रत्नथे प्रतीकोक्ते–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐन्द्री त्रिष्टुप्। कुशिकः। इह वाक् प्रकटा भवति यदि सरमा वाक्। वेदत्रयलक्षणा वाक् सरमेत्युच्यते। सरणं सरः, तं मिनोति अनुमिनोतीति सरमा। रुग्णमद्रेः। 'रुजो भङ्गे' [१४१७ तुदादिः]। अद्रेः सोमाभिप्रवक्तुः पाषाणस्य भग्नं रूपम्। यदि सरमा [1]विदत् यदि जानीयात्। सा सम्पूर्णा करोति (?)। महि महत्। पाथः सोमलक्षणं रसम्। पूर्व्यं पूर्वेषु मैत्रावरुणादिग्रहेषु गृहीतं पूर्व्यम्। सध्र्यक् सह अञ्चतीति सध्र्यक् कः समीचीनं कुर्यात्। किं च, अग्रं नयत्सुपदी। शोभनादीनि पदानि यस्या वाचः सा सुपदी। अग्रं नयत् जगदग्रभूतं पारमार्थिकं पारमैश्वर्यात्मकं वस्तु नयत् नयन्ती प्रापयन्ती [2]स्वशरणान् प्रापयन्ती सुपदी सरमा। अक्षराणाम् अकारादीनां [3]वर्णानाम्। अच्छा रवं पदवाक्यादीनां वाग्जालरूपेणाऽऽस्थितं रवं शब्दम् अच्छ आप्तरूपेणावस्थातुम्। जानती पश्यन्ती वाक् प्रथमा सूक्ष्मा अनपायिनी वाक्। गात् 'गा गाने' [११०६ जुहो०] अगात्। नानास्वरादिरूपेण प्रकटरूपिणी अभूत्। [4]तथा च--"वैखरी वर्णनिष्पत्तिर्मध्यमाऽश्रुतिगोचरा। द्योतितार्था तु पश्यन्ती सूक्ष्मा वागनपायिनी॥" [5]इति। तथा च शाखान्तरीया आहुः—[6]"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥" [ऋ० १।१६४।४५] [7]इति। [8]"चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा [9]ये मेधाविनो गुहायां त्रीणि निहितानि[10] नार्थं वेदयन्ते। गुहा गूहतेः। तुरीयं त्वरतेः। कतमानि तानि चत्वारि पदानि? ओंकारो महाव्याहृतयश्चेत्यार्षम्। नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः। मन्त्रः कल्पो ब्राह्मणं चतुर्थी [11]व्यावहारिकीति याज्ञिकाः। ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः। सर्पाणां वाग् वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके। पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादाः। अथापि ब्राह्मणं भवति–'सा वै वाक् सृष्टा चतुर्द्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्यां साग्नौ सा रथन्तरे। यान्तरिक्षे सा वायौ सा वामदेव्ये। या

---

१ विदत् अविदत्–क-ग०। २ 'स्वशरणात् प्रापयन्ती' इति द्विवारं पठितः–क०। ३ 'नाम्। अच्छा रवं······प्रथमा सूक्ष्मा' इत्येतावानंशो वारद्वयं पठितः–क-ख०। ४ 'तथा च' इत्यस्य स्थाने 'उत्तमा च' इति–क-ग०। ५ 'इति' नास्ति–क-ख-ग०। ६ "चत्वारि····वदन्ति" नास्ति–ख-ग०। ७ 'इति' नास्ति–क-ख-ग०। ८ चत्वारि वाक् चत्वारि वाचः–ख-ग०। ९ ये मनीषिणो ये मेधाविनः–ख-ग०। १० 'निहितानि' इत्यस्याग्रे 'पदानि' इत्यधिकम्–ख०, 'तानि पदानि' इत्यधिकम्–ग०। ११ व्यावहारिकी चेति–ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवि सादित्ये सा बृहति सा स्तनयित्नौ । अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति-[1]'या च देवानां या च मनुष्याणाम्' [मैत्रा०सं० १।११।५] [2]इति" [निरु० प० १३।९] ॥ ५९ ॥

नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६० ॥

(मा० ३३।६०)

वैश्वानरदेवत्या त्रिष्टुप् । विश्वामित्र ऋषिः । स्पशशब्दः प्राणिवचनः । अस्माद् वैश्वानराद् अग्नेश्च आभ्याम् अन्यं पुर एतारम् । पुरः अग्रत एतारम् आगच्छन्तं परमात्मानम् । स्पशमिति प्राणिन उच्यन्ते । एकवचनमविवक्षितम् । प्राणिनः । नहि अविदन् । नहीति निषेधवचनः [निरु० ३।३] । नैव जानन्ति । अग्निं वैश्वानरमेव जानन्ति न तु वैश्वानरादीनामपि साक्षिभूतं परमात्मानं सर्वान्तर्यामिणं प्राणिनो जानन्तीत्यर्थः । वस्तुत एवं विचारिते वैश्वानर एव सर्वेषामीश्वर इत्याह—एमेनमवृधन्निति । आ ईम् एनम् अमर्त्यं मर्त्यानां विरोधिनमेनं सर्वेषामपरोक्षरूपम् । 'इण् गतौ' [१०४५ अदादिः] । ज्ञानात्मकं वैश्वानरम् । क्षैत्रजित्याय महाभूतादिधृत्यै । क्षेत्रं शरीरं तत्सम्बन्धि क्षैत्रं सर्वानर्थमूलोऽहङ्कारः, तस्य जितिर्जयः, तस्यै क्षैत्रजित्यै । छान्दसं पदम् । देवाः सात्त्विकाः । अमृताः मरणधर्मरहिता देवाः । [3]आ अवृधन् सर्वोपायपरित्यागेनात्मत्वेनावर्धयन्निति[4] ॥ ६० ॥

उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
ता नो मृळात ईदृशे ॥ ६१ ॥ (मा० ३३।६१)

[5]इन्द्रदेवत्या गायत्री । भरद्वाज ऋषिः । उग्रा उग्रौ उद्गृहीते इत्युग्रौ [6]अनुग्रहकारिणौ । इन्द्राग्नी । मृध इति संग्रामनाम [निघ० २।१७] । मृधः संग्रामस्य । विघ-

---

१ 'या च देवानां या च मनुष्याणाम्' नास्ति—ख-ग० । २ 'इति' इत्यस्यानन्तरम् 'अथैषाक्षरस्य' इति दृश्यते कपुस्तके । स तु निरु०प०दशमकण्डिकायाः प्रारम्भिकोंऽशः । ३ आ अर्वावृधन्—क-ग० । ४ आत्मनावधारयन्निति—क०, आत्मत्वेनावधारयन्निति—ग० । ५ 'ऐन्द्राग्नी' इति—सर्वा०मही०च । ६ 'अनुग्रहकारिणौ' नास्ति-ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निना । हन्तेर्घत्वम् । विघनिना विघातनिमित्तत्वेन । इन्द्राग्नी हवामहे । ता नो मृळात ईदृश [1]इति । ता तौ इन्द्राग्नी । नः अस्मान् । ईदृशे युद्धकर्मणि । मृळातः मृडयतः ॥ ६१ ॥

उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवाँ २ इयक्षते ॥ ६२ ॥ (मा० ३३।६२)

सौमी गायत्री । ऋषिर्देवलोऽसितः[2] । उपास्मै गायत । हे नरः, ऋत्विजः । अस्मै पवमानाय महापवित्ररूपाय । इन्दवे सोमाय । उपगायत उपगानं कुरुत । देवान् अभि इयक्षते । यष्टुमिच्छतीति इयक्षते ॥ ६२ ॥

ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥६३॥
(मा० ३३।६३)

ऐन्द्री त्रिष्टुप् । ऋषिर्विश्वामित्रः । हे मघवन् इन्द्र । अहिहत्ये सर्पहननाय । ये त्वा त्वाम् । अवर्धयन् । श्रीमहाभारते प्रसिद्धम् । [हे] हरिवः अश्ववन् । शाम्बरे शम्बरस्य वध-निमित्तम् । ये [3]त्वामवर्धयन् । ये गविष्टौ । छान्दसं पदम् । गवामिष्टं गविष्टमिति प्राप्ते गविष्टुरिति, तस्मिन् गविष्टौ । त्वां येऽवर्धयन् । ये त्वा नूनमनुमदन्ति विप्राः । ये विप्राः मेधाविनः । त्वा त्वाम् । अनुमदन्ति तर्पयन्ति [5]हर्षयन्ति । त एते सर्वेऽभिवर्धमानमिन्द्रं त्वामनु-वर्धन्तेऽनुमदन्ति च विप्राः । सोमं सगणो मरुद्भिः । हे इन्द्र; मरुद्भिर्नाम देवैः [6]सह सगण-स्त्वं सोमं पिब ॥ ६३ ॥

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ६४ ॥
(मा० ३३।६४)

---

१ 'इति' नास्ति-ग० । २ 'देवलोऽसितो वा' इति–सर्वा०, 'देवलदृष्टा' इति–मही० । ३ त्वा ख० । ४ ये गविष्टौ–ख० । ५ हृष्यन्ति–क-ख-ग० । ६ सहगणस्त्वम्–क० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐन्द्री त्रिष्टुप्[१]। सर्वप्राणिनां जन्मसु अनुग्राहकत्वेन तिष्ठति जनिष्ठाः। उग्रः सर्वानुग्राहकः। मन्द्रः मदनः। ओजिष्ठः ओजस्वितमः। बहुलाभिमानः स्वकीयेषु भृत्यादिवर्गेषु बहुलविधाभिमानः। य एवंविध इन्द्रस्तमिन्द्रं यक्षसे। तुराय त्वराय भक्तानुग्रहं प्रति त्वरमाणाय। सहसे बलाय। मरुतश्चित्। मरुतो नाम देवता [२]अप्यवर्धयन् इन्द्रमवर्धयन्। किं च, माता यद्वीरं दधनद्धनिष्ठा। यद् माता देवमाता यं वीरं स्वपुत्रं दधनत्। [३]नकारश्छान्दसः, व्यत्ययश्च। दधाति पोषयति। माता देवानाम् अदितिः। वीरं स्वपुत्रं यद् यमिन्द्रं दधनद् दधाति। धनिष्ठा। व्यत्ययः। धनिनः स्त्री धनवति स्वस्वामिनि तिष्ठतीति धनिष्ठा। स्वपत्नीनामदेवमाता (?)। यं वीरं दधाति तमिन्द्रं मरुतोऽवर्द्धयन्निति सम्बन्धः॥ ६४॥

आ तू न॑ इन्द्र वृत्रहन्न॒स्माक॑म॒र्धमा ग॑हि।
म॒हान्म॒हीभि॑रू॒तिभि॑ः॥ ६५॥ (मा० ३३।६५)

[४]ऐन्द्री गायत्री। ऋषिर्नृमेधाः। त्रयो निपाता आ तू न[५] इति छन्दःपरिपूरकाः[६]। यद्वा आ आसमन्तात्। [७]तू एव। नः अस्मान्। हे इन्द्र हे वृत्रहन्। अस्माकम् अर्धम् अस्मदीयं पक्षम्। आगहि आगच्छ। आगत्य च महान् त्वम्। महीमिरूतिभिः अवनैः। नः अव। [८]अस्मानवन्नेव आ आसमन्तात् पालयेति शेषः॥ ६५॥

त्वमि॑न्द्र प्र॒तूर्ति॑ष्व॒भि विश्वा॑ असि॒ स्पृध॑ः।
अ॒श॒स्ति॒हा ज॑नि॒ता वि॑श्व॒तूर॑सि॒ त्वं॑ तू॒र्य॑ तरुष्य॒तः॥६६॥ (मा० ३३।६६)

ऐन्द्री [९]बृहती। ऋषिर्नृमेधाः। हे इन्द्र, प्रतूर्तिषु प्रत्वरमाणेषु शत्रुषु निमित्तभूतेषु। अभि आभिमुख्येनागतेषु सत्सु। विश्वाः सर्वाः। स्पृधः संग्रामान्। त्वमेव जेतासीत्यध्याहारः।

---

१ 'ऋषिर्गौरीवितिः' इति–सर्वा०, 'गौरिवीतिः' इति–मही० २ 'अपि' नास्ति–ख०। ३ तकारः–क०। ४ 'ऐन्द्री गायत्री। ऋषिर्नृमेधाः।' नास्ति–ख०। ५ 'आ तू न' इत्यस्याग्रे 'इन्द्र' इति पदम्–क-ख-ग० दृश्यते, तदनावश्यकम्। ६ 'परिपूरकाः' इत्यत्र–"कर्मपूर्तिपूरकाः" इति–ग टि०। ७ तु·क-ग०, उ·ख०। ८ अस्मानव–ख०। ९ 'पथ्याबृहती' इति–सर्वा मही च, 'बृहती' इत्येवेति–उवटः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं च, अशस्तिहा । अशस्तिरप्रशस्तिरिति, तं हन्तीति अशस्तिहा सर्वदोषघातकोऽसि । जनिता विश्वतूः । विश्वभरणः सर्वभारतं [?] जनितासि । अतो ब्रवीमि–त्वं तूर्य तरुष्यतः । शत्रून् त्वमेव । तूर्य [1]जहि मारय ॥ ६६ ॥

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६७ ॥
(मा० ३३।६७)

इन्द्रदेवत्या सतोबृहती । ऋषिर्नृमेधाः । [2]चतुर्थः पादः प्रथमं व्याख्यायते । वृत्रं यदिन्द्र तूर्वसि । हे इन्द्र, यद् यस्मात् त्वं वृत्रं तूर्वसि । [3]तूर्वतिर्हिंसाकर्मा । तूर्वसि हिंसि । तस्मात्कारणात् । विश्वास्ते स्पृधः श्नथयन्त मन्यवे । अत्र व्यत्ययः । मन्योरिति श्रीरुद्रात्मकस्य । ते तव । विश्वाः सर्वाः । स्पृधः संग्रामाः । स्वयमेव [4][हे] भगवन्, श्नथयन्त श्लथयन्ते शिथिला भवन्ति । अनु ते । [5]यस्य ते तव । तुरयन्तं त्वरामुत्पादयन्तं प्रोत्साहमाश्रयस्य कारयन्तम् । शुष्मं बलम् । लिङ्गमविवक्षितम् । क्षोणी । क्षोणीति द्यावापृथिवी [निघ० ३।३०] । ते द्यावापृथिव्यौ । अनु ईयतुः अनुगच्छताम् । शिशुं न मातरा शिशुमिव [6]पुत्रमिव । मातरा मातापितरौ पुत्रमनुगच्छत इव अन्वीयतुरिति ॥ ६७ ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥ ६८ ॥
(मा० ३३।६८)

[7]अयं मन्त्रो व्याख्यातः [८।३] ॥ ६८ ॥

---

१ 'जहि' नास्ति–ख० । २ चतुर्थपादः–ख-ग० ।
३ 'उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः' [५६९-७३ भ्वादिः] ।
४ भगवान्–क०, भवान्–ख-ग० । ५ अस्य–ख० ।
६ 'पुत्रमिव' नास्ति–ख० । ७ 'अयम्' नास्ति–ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ६९ ॥

(मा० ३३।६९)

सवितृदेवत्या जगती । ऋषिर्भरद्वाजः । हे श्रीभगवन् सवितः, अदब्धेभिः अनुपहिंसितैः । शिवेभिः शान्तरूपैः । पायुभिः पालनैः । अद्य अस्मिन्नहनि । [1]गय इति गृहनाम [निघ० ३।४] । नः अस्माकम् । गयं गृहम् । परिपाहि सर्वतः परिपालय । हिरण्यजिह्वः [2]अग्निजिह्वः सत्यवाक् । सुविताय [3]सुप्रसूताय । कर्मणा नव्यसे नवीनो भवसि । सर्वथा नः अस्मान् रक्ष । मा किः [4]कश्चित् । अघशंसः अघं पापं शंसतीत्यघशंसः पापशंसनः[4] । व्यत्ययः । ईशत ईष्ट । अघशंसनः कश्चिदपि अस्माकं मा ईष्टेत्यभिप्रायः ॥ ६९ ॥

प्रवीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ ७० ॥

(मा० ३३।७०)

पञ्चदशर्चः पुरोरुग्गणः । द्वे च प्रतीकोक्ते । प्र वीरयेति वायुदेवत्या त्रिष्टुप् । [5]वसिष्ठः । हे पत्नीयजमानौ, प्र वीरया । छान्दसं पदम् । वीरान् याययन्तीति वीरयाः सोमाः, वायोः सम्बन्धिनः सोमाः । स्वभावतः शुचयः शुद्धाः । मधुमन्तः मधुमत्स्वादुरसोपेताः । सुतासः सुता अभिषुताः सन्तः । अध्वर्युभिः प्रदद्रिरे विदीर्णाः । 'दॄ विदारणे' [१४९४ क्र्यादिः] । प्रचूर्णीकृताः । एवं पत्नीयजमानौ संबोध्य चेदानीं वायुं संबोधयति—वह वायो नियुत इति । हे वायो, नियुतः । व्यत्ययः । नियुता अश्वेन करणभूतेन याहि । अच्छ प्राप्तुं सोमं प्राप्तुम् । पिब । सुतस्य अभिषुतस्य । अन्धसः सोमलक्षणान्नस्य सोमस्य स्वभागं पिब । मदाय तृप्त्यै मदजननार्थं वा ॥ ७० ॥

---

१ गयमिति—क-ग० । २ 'अग्निजिह्वः' नास्ति—ख० । ३ प्रसवपुत्राय—क-ग० । ४ 'अघं पापं शंसतीत्यघशंसः पापशंसनः, अघशंसः कश्चित्' इत्येवं विपर्यस्तः पाठः—क०, खपुस्तके तु—'अघशंसः' इत्येतावानेव पाठः । ५ 'वसिष्ठः । हे पत्नी' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाव उपावतावतं मही यज्ञस्य रप्सुदा ।
उभा कर्णा हिरण्यया ॥ ७१ ॥ (मा० ३३।७१)

व्याख्यातोऽयं[1] मन्त्रः [३२।१६] ॥ ७१ ॥

काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे ।
रिशादसा सधस्थ आ ॥ ७२ ॥ (मा० ३३।७२)

[2]अश्विदेवत्या गायत्री । काव्ययोराजानेषु क्रत्वा दक्षस्येति । उत्साहवतो यजमानस्य दुरोणे । दुरोण इति गृहनाम [निघ० ३।४; निरु० ४।५] । यज्ञगृहे । सधस्थे सहस्थाने । काव्ययोः कविना सहितयोरग्न्योः । आजानेषु आजन्मभूमिषु उत्पत्तिस्थानेषु । क्रत्वा । [3]क्रतुरिति कर्मनाम [निघ० २।१] । क्रत्वा कर्मणा अग्निहोत्रादिकया क्रियया संपादितं [4]स्वं भागम् । रिशादसा रिशादसौ परहिंसाक्षयकारिणौ अश्विनौ पिबतमिति शेषः ॥ ७२ ॥

दैव्या अध्वर्यू आ गतꣳ रथेन सूर्यत्वचा ।
मध्वा यज्ञꣳ समञ्जाथे । तं प्रत्नथायं वेनश्चोदयत् ॥ ७३ ॥

(मा० ३३।७३)

व्याख्यातोऽयं[5] मन्त्रः [३२।३३] ॥ ७३ ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ७४ ॥

(मा० ३३।७४)

---

१ 'अयम्' नास्ति-ख-ग० । २ मित्रावरुणदेवत्या गायत्री । ऋषिर्दक्षः-सर्वा०मही०च ।
३ क्रत्वेति-क-ख-ग० । ४ स्वभागम्-ख० ।
५ 'अयम्' नास्ति-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]लिङ्गोक्तदेवत्या त्रिष्टुप्[2] । आग्रयणोऽनया गृह्यते । तदभिप्रायेण [3]प्रतीर्यते । तिरश्चीनो विततो रश्मिरेषाम् । एषां सोमानाम् अन्तरा [4]दशापवित्रलक्षणो रश्मिः । तिरश्चीन इति स च विततः प्रसारितः । उद्गातृभिरस्मिन्दशापवित्रे सोमः प्रक्षिप्तः, तस्माद् दशापवित्रा-दधःस्वित् अधश्च । उपरिस्वित् उपरि स्थिते उपरि च । सोम [5]आसीत् सोमस्तिष्ठति । किं च, सोमस्तु जगदुत्पत्त्यादिबीजमतो रेत इत्युच्यते । रेतसः सोमस्य धाः धारयितारः रेतोधाः, रेतसो धारकाश्चमसद्रोणकलशादय आसन् । महिमानश्च आसन् । सोमस्य कलशाः सोमस्य महि-मानः । किं च , स्वधा अवस्तात् । स्वकीयान् दधाति पोषयतीति स्वधा । अवस्तात् अधस्तात् । [6]शुक्रो द्रोणकलश इत्येतदुक्तं भवति । प्रयतिः परस्ताद् उपरिष्टाद् आधवनीयादुपरिष्टाद् [7]निग्राभ्यास्ताः सिञ्चति दशापवित्रे यजमान [8]इत्येतदुक्तं भवति ॥ ७४ ॥

आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परिणीयते कविरत्यो न वाजसातये चनोहितः ॥ ७५ ॥

(मा० ३३।७५)

वैश्वानर उच्यते । वैश्वानरदेवत्या जगती[9] । आ रोदसी अपृणत् । रोदसी द्यावा-पृथिव्यौ । स वैश्वानर आ अपृणत् आपूरयति । आ स्वः [10]स्वःस्थानमारभ्य आ स्वः आदित्य-पर्यन्तमापृणद्[11] [12]आपूरयति । महज्जातं यन्महद् मह इत्युपलक्षणं सर्वजगज्जातमापृणद्[13] आपूरयति। एनमपसोऽधारयन् । [14]यं वैश्वानरमेनमपसः[15] [16]अपस्विनः कर्मवन्तः। अधारयन् । स कविः । अध्वराय यज्ञाय । परिणीयते । क इव ? अत्यो न अत्य इव । अत्य इत्यश्वनाम

---

१ भावबृत्तदेवत्या–सर्वा०मही०च । २ परमेष्ठी प्रजापतिर्ऋषिः–सर्वा०, प्रजापतिर्ऋषिः–मही० । ३ प्रतार्यते–ख०, प्रधार्यते–उवटः । ४ दशापवित्रलक्षणे–क-ख-ग० । ५ 'सोम आसीत् इत्यत्र–"इति स्तुतिः" इति–ग०टि० । ६ 'शुक्रो द्रोणकलशः' इत्यत्र–"द्रोणकलशे वर्तमानः सोमः शुक्रसंज्ञः" इति–ग०टि० । ७ निग्राभाः–ख०, ग्राभाः–क-ग० । ८ इत्युक्तम्–ख० । ९ ऋषिर्विश्वामित्रः–सर्वा० मही० च । १० भुवःस्थानम्–क-ग० । ११ अपृणत्–क-ग० । १२ पूरयति–क० । १३ अपृणत्–क० । १४ यो वैश्वानराय–ख०, यं वैश्वानरायेनमपसः–क० । १५ 'एनमपसः·····सो अध्वराय' नास्ति–ख० । १६ आश्विनकर्मवन्त–क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[निघ० १।१४] । अश्व इव वाजसातये अन्नसंभजनाय । चनोहितः अन्नाय [1]हितोऽश्वो यथा प्रणीयते । यद्वा सो अध्वराय परिणीयत इति । चन इति पश्यतिकर्मा (?) । तस्मै हितं निहितम् (?) अन्नाय इति वा चनोहितः । तथा स घृतादिभिरतितरां प्राप्यत इति ॥७५॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा ।
आङ्गूषैराविवासतः ॥ ७६ ॥ (मा० ३३।७६)

'उक्थेभिर्वृत्रहन्तमा', 'उप नः' इति [2]चेन्द्राग्निदेवत्यौ गायत्र्यौ । ऋषिः [3]सुहोत्रः । यौ इन्द्राग्नी उक्थेभिर्वृत्रहन्तमा वृत्रहन्तमौ अतिशयेन वृत्रहन्तारौ । या यौ । मन्दाना मन्दानौ मोदमानौ । [4]चित् प्रसिद्धौ यौ इन्द्राग्नी । गिरा ऋग्यजुःसामलक्षणया वाचा मन्दानौ स्तः । [5]यौ आङ्गूषैः स्तोमैः स्तुतौ । आविवासतः श्रोतॄन् संतर्पयतः । अतो वयमपि ता इन्द्राग्नी गिरा चाङ्गूषैः स्तोमैः स्तुमः ॥ ७६ ॥

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये ।
सुमृळीका भवन्तु नः ॥ ७७ ॥ (मा० ३३।७७)

नः अस्माकम् । गिरा स्तुतिलक्षणया वाचा । सूनवः अमृतस्य प्रजापतेः पुत्राः । ये देवाः । नो गिरः । उपशृण्वन्तु उप समीपमागत्य शृण्वन्तु । श्रुत्वा च ते देवाः सुमृळीका भवन्तु । नः अस्माकम् । सुमृळीकाः सुष्ठु सुखयितारो भवन्तु ॥ ७७ ॥

ब्रह्माणि मे मतयः शꣳसुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ७८ ॥

(मा० ३३।७८)

---

१ निहितः—क-ख-ग० ।

२ 'उक्थेभिः' इतीन्द्राग्निदेवत्या, 'उप नः' इति च वैश्वदेवी गायत्री—सर्वा० मही० च ।

३ ऋषिर्वसिष्ठः—सर्वा० मही० च, सुहोत्र ऋषिस्तु 'उप नः' इत्यस्याः—सर्वा० मही० च ।

४ 'चित्' नास्ति—ख० । ५ 'यौ' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]'ब्रह्माणि मे', 'अनुत्तमा ते', 'तदिदास' इपि च तिस्रस्त्रिष्टुभो [2]लिङ्गोक्तदेवत्याः। [3]इन्द्रमरुत्संवादे इन्द्रस्यैतद्वाक्यम्। आद्ययोरगस्त्य ऋषिः, तृतीयस्याथर्वण[4] [5]ऋषिः। ब्रह्मशब्दोऽत्र स्तुतिलक्षणः शब्दराशिवचनः। ब्रह्माणि स्तुतयः। मे मदीयाः मतयः हवींषि च। मतयः धियः। मम सुतासः सुता अभिष्टुताश्च सोमाः। एते सर्वे मम शं सुखम्। [6]इयर्ति मे मम सुखमुद्गमयन्ति। [7]प्रभृतः मया प्रहृतः। अद्रिः सोमाभिषवपाषाणः। मे मम। शं सुखम् उद्गमयतु। हर्यतिः प्रेप्साकर्मा [निघ० २।६]। एते स्तुत्यादयो मम शं प्रतिकामयन्ते। ऋत्विजो मम शम् आशासते। भवन्तो [8]यजमानार्थे मरुतोऽपि प्रार्थयन्ते। उक्था उक्थेषु। व्यत्ययः। इमा इमौ। हरितवर्णावश्वौ च मम शं वहतः। ता नो अच्छ। यान्येवं प्रोक्तानि तानि। इमा इमानि। अच्छ [9]आभिमुख्येनाप्तुं [10]प्राप्तुम्। नः साधनानि हरी वहतः [11]प्रापयतः॥ ७८॥

अनु॑त्तमा ते॑ मघवन्न॒कि॒र्नु न त्वावाँ॑२ अस्ति दे॒वता॒ विदा॑नः।
न जाय॑मानो॒ नश॑ते॒ न जा॒तो यानि॑ करि॒ष्या कृ॑णु॒हि प्र॑वृद्ध॥ ७९॥

(मा० ३३।७९)

एवमिन्द्रेणोक्ता मरुतो देवा इन्द्रं प्रत्याहुः—[12]अनुत्तमा त इति। नु वितर्के क्षिप्रे वा। कुत इति। विदानः त्वं तु विजानानः सर्वज्ञः। अतस्त्वत्सदृशो नास्ति। न जायमानः।

---

१ 'ब्रह्माणि मे' नास्ति–क०। २ इन्द्रमरुद्देवत्ये द्वे, तृतीया माहेन्द्री–सर्वा०मही०च। ३ इन्द्रमरुतां वादे–क-ग०, नास्ति–ख०। ४ आथर्वणो बृहद्दिव ऋषिः–सर्वा०मही० च। ५ 'ऋषिः' नास्ति–ख०। ६ 'इयर्ति' इत्यत्र–"अर्थवशाद्वचनविपरिणामः। 'ऋ गतौ' [१०४८ जुहो०] ह्वादिः। णिचो लोपः। उद्गमयन्ति।" इति–ग० टि०। ७ 'प्रभृतः' इत्यत्र–"हृग्रहोर्भश्छन्दसि" [अष्टा० ३।१।८४ वा०] इति–ग० टि०। 'हृग्रहोर्भश्छन्दसि हस्य' इति वार्तिकस्वरूपम्–उवटभाष्ये। ८ 'यजमानार्थम्' नास्ति–ख०। ९ 'आभिमुख्येन' नास्ति–ख०। १० 'प्राप्तुम्' नास्ति–क०। ११ 'प्रापयतः' इत्यस्यानन्तरम्–"इति मरुद्गणं प्रतीन्द्रस्योक्तिः" इति–ग०टि०। १२ 'अनुत्तमा ते' इत्यत्र–"अनुत्तम्। 'णुद प्रेरणे' [१२८३,१४२७ तुदादिः] अस्य निष्ठाप्रत्यये 'नसत्तनिषत्तानुत्तप्रतूर्त...'[अष्टा० ८।२।६१] इत्यादिना सिद्धिः। अनुत्तम् अप्रच्युतस्वभावं महाभाग्यम्। ते तव। न किः न कश्चित् प्रच्यावकोऽस्य महाभाग्यस्य। किं च, त्वावान् त्वादृशः। मतुप् सादृश्यार्थे। देवता देवः। विदानः जानानः।" इति–ग०टि०। एतच्च व्याख्यानं किञ्चित्पाठभेदेनोवटभाष्येऽपि वर्तते।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कश्चिदपि जायमानो वर्तमानकालसम्बन्धी भूत्वा त्वत्सादृश्यं [न] नशते । नशतिरत्र व्याप्तिकर्मा [निघ० २।१८]। न व्याप्नोति। न जातः। भूतकालसम्बन्धी यः कश्चित्। [न] नशते [न] व्याप्नोति। जनिष्यमाणोऽपि[1] नास्तीति शेषः। यानि करिष्या कृणुहि प्रवृद्ध । किं च, हे प्रवृद्ध हे मघवन् भोगादिभिरतिसमृद्ध। त्वं यानि [2]यानि कर्माणि । कृणुहि करोषि । कृणुहि करिष्यसि वा । तानि तानि कर्माणि कश्चिदपि करिष्या । छान्दसं पदम् । करिष्यति करोति चेति हीन्द्रः स्तूयते ॥७९॥

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥८०॥ (मा० ३३।८०)

तत् इत् एव । आस आसीत् । तदेव भुवनेषु समस्तभूतजातेषु । ज्येष्ठं वृद्धतमं पूर्वेभ्यः पूर्वतमं प्रशस्यतमं वाऽऽसीत् । किं तत् ? यतो जज्ञ उग्रः । उद्गीर्णो वज्रहस्तोऽयम्[3] इन्द्रो यतः कारणविशेषाद् जज्ञे जातः । तदेव ज्येष्ठमासीदिति । त्वेषनृम्णः । त्वेषः त्विट् अनुपमा दीप्तिः, नृम्णं बलम् [4]अनुपमं बलं च [5]यस्येन्द्रस्य स त्वेषनृम्णः । इन्द्रो यतो जज्ञे तदिदासेति सम्बन्धः । किं च, सद्यो जज्ञानो निरिणाति शत्रून् । यदा जज्ञानः जायमानो वर्तते । सद्यः तदानीमेव । शत्रून् निरिणाति निर्गमयति हन्ति च । पुनरपीन्द्रं विशिनष्टि—अनु यं विश्वे मदन्त्यूमा इति ।[6] 'अव रक्षणे' [६०० भ्वादिः]। ऊमाः अवितारो जगद्रक्षका लोकपालादयः । विश्वे देवाः । यम् अनुमदन्ति स इन्द्रो यतो जातस्तदेव भुवनेषु ज्येष्ठम् [7]इति स्तूयते ॥८०॥

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ८१ ॥ (मा० ३३।८१)

'इमा उ त्वा' [8]इति 'यस्यायम्' इति च द्वे बृहत्यौ [9]लिङ्गोक्तदेवत्ये। मेधातिथिर्ऋषिः। यं त्वाम् । पावकवर्णाः अग्निवर्णाः [10]ब्रह्मतेजसा सम्पन्नाः । शुचयः निगमाद्यनुष्ठान-

---

१ 'अपि' नास्ति—क-ग० । २ 'यानि' नास्ति—क-ग० । ३ 'अयम्' नास्ति—क-ग० । ४ 'अनुपमं बलम्' नास्ति—ख०, अनुपमबलम्—ग० । ५ 'यस्य' नास्ति—ख० । ६ अवधातू रक्षणादिषु । ७ 'इति' नास्ति-ख० । ८ 'इति' नास्ति—क० । ९ आदित्यदेवत्ये—सर्वा०मही०च । १० ब्रह्मतेजःसम्पन्नाः—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परतयाऽतिशुद्धाः । विपश्चितः त्रिकालदर्शिनः परमार्थवस्तुतत्त्वज्ञाः । यं स्तोमैरभ्यनूषत । 'णु स्तुतौ' [१०३५ अदादिः] [1]लुङ् । स्तोमैः अभिविशिष्टस्तुतिभिरभिस्तुवन्ति । तं श्रीभगवन्तम्, इन्द्रस्यापि जनकत्वात् । हे पुरूवसो पुरुषु [2]बहुषु सुरनरादिशरीरेष्वन्तर्यामित्वेन च वसतीति वसुः, तत्सम्बोधनं हे पुरूवसो । मम गिरः ऋग्यजुःसामलक्षणा वाचः । ता इमाः प्रतीयमाना गिरः । त्वा त्वाम् । उ एव । त्वामेव । [3]वर्धन्तु [वर्धयन्तु] । सर्वजगदधिष्ठानत्वेन [4]सर्वोपादानत्वेन सर्वात्मकत्वेन च त्वमेव वृद्धतमोऽसि ॥ ८१ ॥

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ८२ ॥
(मा० ३३।८२)

अस्येन्द्रस्य प्रतीयमानो विश्वः प्रपञ्चो वर्णाश्रमादिलक्षण आर्यः । आर्यः स्वामी श्रीभगवानीश्वरः, तत्सम्बन्धी विश्व आर्यः । दासः श्रीभगवदाज्ञया इह यदर्थं वर्णाश्रमादिविहितानुष्ठानं सदा दासवत् करोतीति दासो वर्तते । स परमेश्वरश्च स्वस्य दासभावमापन्नस्य विश्वस्य शेवधिपा भवति । [5]शेवधिर्निधिः । ऋग्यजुःसामादिलक्षणो वेदो वर्णाश्रमिणां निधिः, निधिरिव भवतीति निधिपाः शेवधिपा भवति । किं च, यस्यायं विश्वो यदि दासो न भवेद् योऽसौ श्रीभगवानिन्द्रोऽस्य अरिर्भवति । अरिरिवारिः । अरिः शत्रुः । अद्वैतरूपस्यास्येन्द्रस्य कथमरिभाव इति । तदाह—तिरश्चिदर्ये रुशमे पवीरवीति[6] । [7]पवीरं वाति गच्छति पवीरवास्तस्मिन् । 'वा गतिगन्धनयोः' [१०५० अदादिः] । क्विप् । यद्वा पवीरवच्छब्दस्य ङौ टिलोपः । पवीरमायुधम् [निरु० १२।३०] [8]तद्वति । पवीरविपदं तु छान्दसम् । पवीरवि प्रतनु [9]शासनवच इत्यर्थः (?) । पविर्वज्रः, पवेर्वज्रस्येव रवो यस्येति दीर्घत्वं ह्रस्वत्वं [च] छान्दसम् । तिरश्चित् । 'ऋ गतौ' [१०९८ जुहो०] तस्य रूपम् । रुतेन ज्ञानेनाज्ञानं शमयतीति [10]रुशमः, तस्मिन् रुशमे ज्ञानेनानर्थोपरमकारके । अर्ये स्वामिनि श्रीभगवतीन्द्रस्य रूपे । या चित्

---

१ 'लुङ्' नास्ति—ख० । २ 'बहुषु' नास्ति—क-ग० । ३ वर्धयन्तु—ख० । ४ 'सर्वोपादानत्वेन' नास्ति—ख० । ५ 'निधिर्ना शेवधिः' [१।१।७१] इत्यमरः, 'निधिः शेवधिः' [निरु० २।४] इति यास्कश्च । ६ 'इति' नास्ति क० । ७ 'पवीरं वाति · · · ह्रस्वत्वं [च] छान्दसम्' नास्ति—ख० । ८ इति—क० । ९ शासनवचनः—ग० । १० 'रुशमः' इत्यत्र—"अमप्रत्यय औणादिकः" इति—ग०टि० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्स्वरूपम् । तिरः तिरोधीयते जीवाश्रयाज्ञानेन तिरोहितेव भवति । [1]तुभ्येति छान्दसं भवति । तुभ्यम् इत् एव तुभ्यमेव । रयिः धनम् । स्वकीयत्वेन स्थितं धनं ज्ञानं तस्मै स्वामिने तुभ्यमेव । अज्यते । [2]अजिरत्र ज्ञानार्थः । अज्यते प्रतीयत इति ॥ ८२ ॥

अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ८३ ॥
(मा० ३३।८३)

[3]इन्द्रदेवत्या सतोबृहती । ऋषिर्मेधातिथिः । योऽयं सहस्रम् । योऽयमिन्द्रः सहस्रं सहस्कृतः सहस्रशः सहस्रधा च । [4]ऋषिभिः सहस्कृतः । ऋषिभिर्वसिष्ठादिभिर्ऋगादिमन्त्रैश्च सहस्कृतः । सह [5]इति बलनाम [निघ० २।९] । अतिबलिष्ठतमः कृतः । स च समुद्र इव पप्रथे । 'प्रथ [6]प्रख्याने' [७६५ भ्वादिः] । लोके यथा जलाधारेषु समुद्रः प्रख्याततमस्तथाऽयमिन्द्रोऽपि प्रख्याततमोऽभूत् । सत्यः सोऽस्य श्रीभगवत इन्द्रस्य महिमा माहात्म्यम् । पूर्वत्राभिहितो महिमा सत्यः अबाध्यः, यथा निरूप्यते तथैव नान्यथा भवति । शवः इन्द्रस्य बलं च सत्यमेव । शव इति बलनाम [निघ० २।९] । यज्ञेषु विप्रराज्ये । विप्रा ब्राह्मणा राजान इव स्वतन्त्रा भवन्ति यज्ञेषु । विप्राणां राज्ये देदीप्यमाने विप्रसदसि अहमिन्द्रस्य महिमानं बलं च गृणे अभिगृणामि अभिष्टौमीति ॥ ८३ ॥

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ८४ ॥
(मा० ३३।८४)

व्याख्यातोऽयं[7] मन्त्रः [३२।६९] ॥ ८४ ॥

इति [8]शुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

---

१ 'तुभ्येति' नास्ति—ख० । २ 'अज गतिक्षेपणयोः' [२३० भ्वादिः] । गतेर्ज्ञानगमनप्रापणार्थत्वादत्राजेर्ज्ञानार्थत्वम् । ३ आदित्यदेवत्या—सर्वा० महीः च । ४ 'ऋषिभिः सहस्कृतः' नास्ति—क० । ५ 'इति' नास्ति—ग० । ६ 'प्रख्यापने'—क-ख-ग० । ७ 'अयम्' नास्ति—ख-ग० । ८ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ख-ग० ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रयस्त्रिंशोऽध्यायः

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ १ ॥

(मा० ३४।१)

यज्जाग्रत इत्यस्मिन्नध्याये लैङ्गिको विनियोगः। लिङ्गं च सामर्थ्यम्, अभिधानशक्तिः। [1]यज्जाग्रत इति मनोदेवत्या त्रिष्टुप्। [2]ऋषिर्विवस्वान् याज्ञवल्क्यश्च। शिवसंकल्पः। 'जागृ निद्राक्षये' [१०७२ अदादिः]। जाग्रतः पुरुषस्य यन्मनः। कथंभूतं मनः ? दैवं [3]मनः। [4]देवो विज्ञानात्मा सोऽनेन गृह्यत इति। [5]तद् दैवम् आनन्दाभिव्यक्तिसाधनं सात्त्विकं यत्तद् दैवं मनः। दूरं दूरस्थानमुदैति दूरमुद्गच्छति। "तद्वै दैवं मनो येनानन्द्येव भवति" [शत० ब्रा० १४।४।३।२८] इति श्रुतेः। तदु सुप्तस्य। तद् उ अपि। सुप्तस्य नष्टप्रायां सुप्तिं गतस्य। उकारः समुच्चयार्थः। तच्च मनः सुप्तस्य मे तथैव दूरमेव। एति सुषुप्तिदशायां दूरम्, [6]अज्ञानिनामनवगम्यत्वेनात्मैव दूरशब्दार्थः। स्वकारणभूतमात्मानमप्येति तदा [7]तत्र लिङ्गं भवति। यद्वा सुप्तशब्देन [8]निद्रा विवक्षिता, स्वप्नस्थानमेव दूरस्थानमेति[9]। तच्च मनो दूरंगमं दूरं गच्छतीति अतीतानागतवर्त्तमानव्यवहितविप्रकृष्टादिस्वविषयं प्रति गमनवदिव यत्तन्मनो दूरंगमम्। ज्योतिषां ज्ञानसाधनानां श्रोत्रादीन्द्रियाणां व्यवहारहेतुत्वेन स्वयं ज्योतिषाम्। ज्योतिः साधनम्। एकं स्वयं सजातीयकारणान्तरानपेक्षम्। तन्मे मनः। मम क्षेत्रज्ञस्य सर्वव्यवहारोपायभूतम्। शिवसंकल्पं शिवे श्रीभगवदीश्वरे संकल्प ईश्वरस्वरूपसाक्षात्कारपर्यन्तो यस्य मनसस्तन्मनः शिवसंकल्पमस्तु। श्रीसदाशिवोऽपि तथैव संपादयतीत्यभिप्रायः ॥१॥

---

१ 'यज्जाग्रत इति' नास्ति–क० । २ आपितृमेधाद् वर्तमानानां सर्वेषां मन्त्राणामादित्ययाज्ञवल्क्यावृषी इत्युक्तं प्राक् [३२।५५]। तस्यैवानुवादोऽयम्–'ऋषिर्विवस्वान् याज्ञवल्क्यश्च' इति। अस्य सम्पूर्णस्यैवाध्यायस्यैतावृषी इति तदभिप्रायः। 'यज्जाग्रतः' इति मन्त्रस्य तु शिवसंकल्प ऋषिः। ३ 'मनः' नास्ति–क-ग० । ४ 'देवो विज्ञानात्मा सोऽनेन गृह्यत इति' नास्ति–ख०। ५ 'तद् दैवम्' नास्ति–क-ग० । ६ अगम्यत्वेन–ख० । ७ तत्–ख० । ८ स्वप्नद्रष्टा विवक्षितश्चेत्–ख० । ९ 'एति' इत्यस्य स्थाने 'इति' इति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितुं नु स्तोषं महो धर्माणं तविषीम्।
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्॥ २॥ (मा० ३४।७)

अन्नदेवत्योष्णिक्। ऋषिरगस्त्यः। [1]पितुरित्यन्ननाम [निघ० २।७; निरु० ६।२४]। [2]तविषीति बलनाम [निघ० २।६; निरु० ६।२५]। उत्तरोऽर्द्धर्चः प्रथमं व्याख्येयः। यस्य [3]पितोरन्नस्य। वि ओजसा विशिष्टेन बलेन। त्रितः त्रिषु लोकेषु तनोतीति त्रितः त्रैलोक्यैश्वर्यविस्तारवानिन्द्रः। वृत्रम् असुरं पाप्मानं च। [विपर्वं] विपरिगतोत्साहं वृत्रम्। अर्दयत् मर्द्दितवान्। [4]नु वदन्तम् (?)। पितुम् अन्नम्। कथंभूतम्? महः सर्वेन्द्रियप्रकाशसाधकत्वात् स्वयमपि महस्तेजः, महद्वा। धर्माणं सर्वस्य धारकं पितुमहं स्तोषम् अस्तोषम्। 'ष्टुञ् स्तुतौ' [१०४३ अदादिः]। स्तौमि। तविषीं बलं च। स्तौमीति सम्बन्धः॥ २॥

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि।
क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषः॥ ३॥ (मा० ३४।८)

अनुमतिदेवत्यानुष्टुप्। [5]ऋषिर्गृत्समदः। अनु इत् एव। "कलाहीने सानुमतिः पूर्णे राका निशाकरे" [अमर० १।४।८]। हे अनुमते अपूर्णचन्द्रे। त्वमेव स्वात्मानं शक्रम्। अनुमन्यासै मन्यसे। तर्हि नः अस्माकम्। शं च सुखमेव। कृधि कुरुष्व। किं च, क्रत्वे संकल्पाय संकल्पसिद्धये। दक्षाय [6]'दक्ष वृद्धौ' [६०८ भ्वादिः] अभिवृद्धये च। नः अस्मान्। हिनु [7]'हि गतौ' [१२५८ स्वादिः]। मम गमनाय समर्थनामापादय। प्र ण आयूंषि तारिषः। नः अस्माकम्। आयूंषि देहस्थितिहेतुभूतानि कालावयवलक्षणानि। प्रतारिषः प्रवर्धय विस्तारय॥ ३॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥ ४॥ (मा० ३४।१०)

---

१ पितुमिति क-ख-ग०। २ तविषीमिति—क-ख-ग०। ३ 'पितोः' इत्यस्य स्थाने 'त्रितः'—क-ख-ग०। ४ नुरनर्थकः—उवटः। ५ अस्य मन्त्रस्य न कोऽपि दृश्यते ऋषिः—सर्वा०मही० च। ६ 'दक्ष वृद्धौ शीघ्रार्थे च' इति—धातु०। ७ नु गतौ—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिनीवालीदेवत्यानुष्टुप्। ऋषिर्गृत्समदः। [1]दृष्टचन्द्राऽमावास्या सिनीवाली। अदृष्टचन्द्रा कुहूः। हे सिनीवालि पृथुष्टुके देवपत्नि पृथुस्तुतिमति हे पृथुष्टुके। या केषाञ्चिद्देवानां स्वसा भगिनी असि। अतस्त्वां ब्रवीमि—जुषस्व हव्यमाहुतम्। श्रद्धयाग्नौ हुतं हव्यं हविः सा त्वं जुषस्व। प्रजां देवि। हे देवि, [दिदिड्ढि] 'दिह उपचये' [१०१५ अदादिः]। नः अस्माकम्। प्रजां दिदिड्ढि उपचयं कुरु॥ ४॥

पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥ ५॥ (मा० ३४।११)

सरस्वतीदेवत्यानुष्टुप्। ऋषिर्गृत्समदः.। सस्रोतसः स्रोतोभिः सहिता नद्यः सस्रोतसः। पञ्च नद्यः। [सरस्वतीं] सरस्वतीनामनदीम्। अपि यन्ति अपि गच्छन्ति, सरस्वत्या सहैकतां प्राप्ताः। सरस्वती तु सरस्वती स्वयमेव। सो [सा उ देशे] [2]शुचिदेशे सुदेशे। पञ्चधा पञ्चप्रकाराऽभवत्॥५॥

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः॥ ६॥
(मा० ३४।१२)

'त्वमग्ने', 'त्वं नो अग्ने' इति द्वे [3]अग्निदेवत्ये [4]जगत्यौ। [5]अश्वस्तूप आङ्गिरस ऋषिः। हे श्रीभगवन्नग्ने, त्वं प्रथमः [6]देवानां प्रथमः। अङ्गिराश्च हस्तपादादिकमङ्गमस्यास्तीति अङ्गी शरीरम्, अशितपीतान्नरसेन शरीरं रसीकरोतीति अङ्गिरा अग्निः, मन्त्रद्रष्टृत्वाच्च ऋषिश्च। देवानाम् इन्द्रादीनां देवानाम्। सखा [7]सहनधर्मयुक्तः। शिवः [8]शान्तः। देवोऽभवः[9] जातः। तवैवंगुणवत्त्वात् तव व्रते आज्ञारूपे कर्मणि वर्तमानाः। कवयः क्रान्तदर्शिनः। अभवन्। किं च, त्वत्प्रसादाद् विद्मनापसः। छान्दसं [10]रूपम्। अपस् इति कर्मनाम [निघ० २।१]।

---

१ "सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः" [१।४।९] इत्यमरः। २ 'शुचिदेशे' नास्ति—ख०। ३ अग्निदेवत्ये-सर्वा०मही०च। ४ 'जगत्यौ' नास्ति—क-ग०। ५ हिरण्यस्तूपः—सर्वा०। ६ 'देवानां प्रथमः' नास्ति—क-ग०। ७ सहख्यातधर्मयुक्तः—ख-ग०। ८ ख्यातः—ख०। ९ 'शाम्मदेवोऽभवः' इत्यधिकः पाठः—ख०। १० पदम्—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदितकर्माणः । भ्राजदृष्टयः भ्राजन्त्यो दीप्यमाना दृष्टयो येषां मरुतां ते भ्राजदृष्टयः । वर्ण-लोपश्छान्दसः । मरुतः । अजायन्त संजाताः ॥ ६ ॥

त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥ ७ ॥

(मा० ३४।१३)

हे भगवन्नग्ने हे देव, त्वम् । तव त्वदीयैः । पायुभिः [१]पालनैर्धैर्यावलम्बिभिः । नः अस्माकम् । मघोनः इन्द्रस्य । तन्वः शरीरम् । व्यत्ययः । [२]तनूः शरीराणि रक्ष । यद्वा मघोनः हविर्लक्षणधनवतः । नः अस्मान् रक्ष, मत्सम्बन्धिनीस्तनूश्च रक्ष । हे वन्द्य, तोकस्य अस्माकमपत्यस्य तन्वः । त्राता रक्षितासि । तनये गवाम् । व्यत्ययः । गवादीनां च तनयस्य अपत्यस्य च । अनिमेषं निरन्तरं त्वमेव त्रातासि । एवं तव व्रते आज्ञाकर्मणि वर्तमानः, त्वया रक्षमाणः रक्ष्यमाणोऽहम् । त्वामेव स्तौमीति शेषः ॥ ७ ॥

उत्तनायामवंभरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान ।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥ ८ ॥

(मा० ३४।१४)

आग्नेयी त्रिष्टुप् । ऋषिर्देवश्रवाः[३] । उत्तरार्द्धं [प्रथमं] व्याख्यायते । [४]अरुषस्तूप इति ज्वालासंघातमूर्तिः । [५]रुशदस्य पाजः । अस्य रुशद् दीप्तम् । पाजः बलम् । पाज इति बलनाम [निघ० २।६] । दीप्तिरेवाग्नेर्बलमित्यर्थः । यश्च इळायाः पृथिव्याः । पुत्रः जातः । यश्च वयुने । [६]वयुनमिति [७]प्रज्ञानाम [निघ० ३।६ ; निरु० ५।१५] । वयुने साध्ये । अजनिष्ट जातः ।

---

१ पावनैः—ख० । २ तनुः—ख-ग० । ३ देवश्रवा भारतः—सर्वा० । भारतः भरतपुत्रो देवश्रवा इत्यर्थः । ४ 'अरुषस्तूपः' इत्यत्र—"रुष बन्धने, अहिंसक इत्यर्थः । ष्टूय उच्छ्राये, स्तूपो ज्वालोच्छ्रायः" इति—ग० टि० । 'रुष वधे' इति—मही०, वस्तुतस्तु—'रुष हिंसार्थः' [६९३ भ्वादिः] । 'ष्टु उच्छ्राये' इति—मही०, वस्तुतस्तु—'ष्टुप समुच्छ्राये' [१६७३ चुरादिः] । ५ 'रुशदस्य पाजः' नास्ति—ख० । ६ वयुन इति—क-ख-ग० । ७ प्रजानाम—क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमग्निम् उत्तानायामरण्याम् ऊर्ध्वमुखायामरण्याम् अवभरा । एवं चिकित्वान् एवं जानानो यजमानः । अव अर्वाचीनमुखो मन्थनं कुर्वन्नग्निमरण्याः सकाशात् । हर आहर । ततः सद्यः प्रवीता वृषणं जजान । सद्यः तदानीमेव । [1]वृषणम् इष्टं [2]फलम् । जजान जनयति । इळां सेचयन्तं प्रवीता प्रकर्षेणावगन्ता [3]यजमानस्तमग्निमजनयदित्यग्निरत्र स्तूयते ॥ ८ ॥

इळायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो निधीमह्यग्ने हव्याय वोळ्हवे ॥ ९ ॥ (मा० ३४।१५)

अग्निदेवत्या [4]त्रिष्टुप् । ऋषिर्देवश्रवाः [5] । इळायाः हे श्रीभगवन्नग्ने, पृथिव्याः । नाभा [6]नाभौ अन्तरिक्षस्य मध्ये आदित्यविद्युदात्मना स्थितम् । त्वा त्वाम्[7] । इळायाः पदे भुवः स्थाने । अधि उपरि । हे जातवेदः सर्वज्ञ । वयं यजमानाः । निधीमहि स्थापयामः । हव्याय वोळ्हवे हव्यं वोळ्हुं हव्यग्रहणाय ॥ ९ ॥

प्रमन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १० ॥
(मा० ३४।१६)

[8]'प्रमन्महे', 'प्रवोमहे' इति च द्वे ऐन्द्र्यौ त्रिष्टुभौ । [9]ऋषिरेधो नाम । प्रमन्महे शवसानाय शूषम् । शवसानाय बलमाविष्कुर्वते इन्द्राय । शूषं बलम् । आङ्गूषं सोमं च । प्रमन्महे 'मन ज्ञाने' [११७६ दिवादिः] जानीमः । कथंभूतायेन्द्राय कथंभूतमाङ्गूषमिति[10] गिर्वणसे गिरा संभजनवते इन्द्राय । अङ्गिरस्वत् [11]अङ्गिरसा तुल्यम् अग्निना तुल्यं शूषं प्रमन्महे इति सम्बन्धः । सुवृक्तिभिः स्तुवते । छान्दसं पदम् । सुवृक्तिभिः शोभनवृक्तिभिः वाग्भिः

---

१ 'वृषणम्' इत्यत्र-"सेक्तारम्" इति-ग० टि० । २ 'फलम् । जजान जनयति' नास्ति-ख० । ३ 'अजनयत्' नास्ति-ख० । ४ अनुष्टुप्-सर्वा० मही०च । ५ देववातो भारतः-सर्वा० । भरतपुत्रो देववान इत्यर्थः । ६ 'नाभौ' नास्ति-ख० । ७ 'त्वाम्' नास्ति-ख० । ८ 'प्रमन्महे' नास्ति-क० । ९ नोधा ऋषिः-सर्वा० । १० 'इति' नास्ति-क-ग० । ११ 'अङ्गिरसा तुल्यम्' इत्यस्याग्रे 'अङ्गिरातुल्यम्' इत्यधिकः पाठः-ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्तोता स्तुवते। ऋग्मियाय [1]स्तुत्यत्वेन ऋचां सम्बन्धिने, [2]ऋक्स्तुतिमयाय वा। इन्द्राय इन्द्रार्थं स्तुवते। अर्चामार्कम्। [3]अर्क इति मन्त्रनाम [निघ० ४।२; निरु० ५।४]। मन्त्रम् अर्चामः स्वरादिसम्पन्नमुच्चारयामः। नरे विश्रुताय नरे नरेषु प्रख्याताय। स्तुतिरूपं मन्त्रमुच्चारयाम इति सम्बन्धः ॥ १० ॥

प्र वो॑ म॒हे महि॒ नमो॑ भरध्वमाङ्गू॒ष्यं॑ शवसा॒नाय॒ साम॑।
येना॑ नः॒ पूर्वे॑ पि॒तरः॑ पद॒ज्ञा अर्च॑न्तो॒ अङ्गि॑रसो॒ गा अवि॑न्दन् ॥ ११ ॥

(मा० ३४।१७)

[4]प्र वो मह इति प्रथमाबहुवचनस्थाने छान्दसो वसादेशः। वः यूयम्। महे महते इन्द्राय। महि माहात्म्यम्। नम इत्यन्ननाम [निघ० २।७]। आङ्गूष्यं स्तोमम्। शवसानाय बलार्थमभिरक्षणाय। साम बृहद्रथन्तरादिकम्। पदज्ञाः पदनीयं पदम् आत्मतत्त्वं जानन्तीति पदज्ञाः। अङ्गिरसः। ऋषीणामुपलक्षणम्। गाः गोभूमिविशेषान्। गा इत्यादित्यरश्मीनिति [5]केचित्। इत्थमन्वयः—येन नः अस्माकम्। पूर्वे आद्याः पितरः पितृपितामहादयः, पदज्ञा अङ्गिरस आद्या ऋषयश्च। येनान्नेन येन स्तोमेन येन च साम्ना यं तरन्तो यं यं शंसन्तः स्तुवन्तोऽर्चन्तः। गाः गोभूमिविशेषान् वाग्विशेषान्वा। अविन्दन् लब्धवन्तः। तस्मै [6]महे महते इन्द्रायास्मदीयाः पितरः पितृपुत्रादयः [?]। वः यूयम्। महि माहात्म्ययुक्तम्। [7]नमः हविर्लक्षणमन्नम्। भरध्वं साम च भरध्वम्। स्तोमं कुरुत साम गायत। यद्वा स्तोमं सामयुक्तमन्नं हविराहरध्वमिति ॥ ११ ॥

इ॒च्छन्ति॑ त्वा सो॒म्यासः॒ सखा॑यः सु॒न्वन्ति॒ सोमं॒ दध॑ति॒ प्रयां॑ꣳसि।
तिति॑क्षन्ते अ॒भिश॑स्तिं॒ जना॑ना॒मिन्द्र॒ त्वदा कश्च॒न हि प्र॑के॒तः ॥ १२ ॥

(मा० ३४।१८)

[8]'इच्छन्ति त्वा', 'न ते' इति च द्वे ऐन्द्र्यौ त्रिष्टुभौ। क्रमेण देवश्रवा [9]देवरातश्च

---

१ सूक्ष्मत्वेन–ख०। २ ऋग्जातिमयाय–ख०। ३ अर्कमिति–क-ख-ग०। ४ 'प्र वो महे' इति पदत्रयम्। अत्र 'वः' इत्यस्य व्याख्यानम्–'प्रथमाबहुवचनस्थाने छान्दसो वसादेशः' इति। ५ उवटभाष्यं द्रष्टव्यम्। ६ 'महे' नास्ति–क०। ७ नाम–क-ख-ग०। ८ 'इच्छन्ति त्वा' नास्ति–क०। ९ देववातश्च–सर्वा०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतौ ऋषी। इच्छन्ति त्वा सोम्यासः। [1]सोम्यासः सोम्याः सोमसंपादिनः। सखायः समानस्थानाः। इन्द्र, त्वामिच्छन्ति । केन प्रकारेणेच्छन्ति ? सुन्वन्ति सोमं दधति प्रयांसि । सोमं सुन्वन्ति सोममभिषुण्वन्ति । प्रय इत्यन्ननाम [निघ० २।७] । हविर्लक्षणान्नानि दधति धारयन्ति। तितिक्षन्ते अभिशस्तिं जनानाम्। अभिशस्तिं दुर्वचनं जनापवादम् । तितिक्षन्ते मनोवाक्काय-संयमनवन्तो भूत्वा दुर्वचनं सहन्ते। इन्द्र त्वदा कश्चन हि प्रकेतः । हे भगवन्निन्द्र, एवं त्वामिच्छतां जनानां यजमानानाम् । त्वत् त्वत्तः सकाशात् । प्रकेत इति प्रज्ञानाम [निरु० २।१६] । कश्चन कोऽपि । प्रकेतः ज्ञानविशेषः देवतात्मविशेष आगच्छति। हि प्रसिद्धोऽयमर्थः ॥ १२ ॥

न ते दूरे परमा चिद्रजाꣳस्या तु प्रयाहि हरिवो हरिभ्याम्।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥ १३ ॥
(मा० ३४।१९)

हे हरिवः, हे इन्द्र । ते तव। दूरे अतिव्यवहिते। परमा परमाणि विप्रकृष्टदेशानि। रजांसि स्थानानि। वहिर्न सन्ति हि, गन्तुमशक्यानि न सन्तीत्यर्थः । एवं [2]चेतोऽनुप्रयाहि। हे हरिवः, हरिभ्यां त्वदीयाभ्यामश्वाभ्याम्[3]। आ प्रयाहि। किमर्थमिति ? स्थिराय दृढसौहृदाय। वृष्णे 'वृषु सेचने' [७०६ भ्वादिः] सेक्त्रे। [4]इन्द्राय इन्द्रार्थमेव। सवना सवनानि। कृता कृतानि। इमा इमानि सवनानि कृतानि। किं च, युक्ताः अभिषवकर्मणि युक्ता [5]नियुक्ताः। ग्रावाणश्च नियुक्ताः। समिधाने अग्नौ समिध्यमाने सति आहुतयो होष्यन्ते। अतस्त्वमश्वाभ्यां याहीति[6] ॥ १३ ॥

अषाळ्हं युत्सु पृतनासु पप्रिꣳ स्वर्षामप्सां वृजनस्य गोपाम्।
भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनुमदेम सोम ॥ १४ ॥
(मा० ३४।२०)

---

१ 'सोम्यासः' नास्ति–ग०, 'सोम्यासः सोम्याः' इति नास्ति–ख०। २ चेदनु–ख०।
३ 'अश्वाभ्याम्' नास्ति–क-ग०। ४ 'इन्द्राय' नास्ति–ख०। ५ 'नियुक्ताः' नास्ति–क-ग०।
६ 'इति' नास्ति–क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोमदेवत्यानुष्टुप्[1] । [2]गौतम ऋषिः । हे सोम, युत्सु युद्धेषु । पृतनासु [3]सेनासु । अषाळ्हम् असोढम् असहमानम् अनभिप्लुतम् । 'पृ पालनपूरणयोः' [१०८६ जुहो०] । पालनशीलं [4]पप्रिम् । [5]स्वर्दिवं सनोति संभजते स स्वर्षास्तं स्वर्षां स्वर्गनिवासम् । स्वपूर्वस्य कृतसम्प्रसारणस्य वसतेरपि रूपम् । स्वर्गवासिनाम् । पप्रिं पालनशीलम् । [6]अप्साम् । [7]अपस इति कर्मनाम [निघ० २।१] अप्सां सुकर्मकारिणाम् । [8]वृजनस्य बलस्य । गोपां गोप्तारम् । भरेषुजाम् । भरशब्दः संग्रामवचनः [निघ० २।१७] । भरेषु संग्रामेषु भीरतया [?] जायत इति भरेषुजा । छान्दसो दीर्घः । भरेषुजामिति । जयतेरेतद्रूपं न तु जनेः । भरेषु जेतारम् । सुक्षितिं क्षितिनिवासभूमिम् । सुश्रवसं [9]शोभनं श्रवः कीर्त्तिर्यस्य स सुश्रवाः, तं सुकीर्त्तिम् । [10]श्रव इति यशोनाम [निरु० ११।१०] । कल्याणकर्मत्वेन प्रसिद्धम् । हे सोम, एवं जयन्तं जयं कुर्वन्तम् । त्वां सोमं त्वाम् । अनुमदेम । [11]'मदी हर्षे' [१२०८ दिवादिः] । मदनार्थस्य मदेरेतद्रूपम् ॥ १४ ॥

सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ १५ ॥

(मा० ३४।२१)

सोमदेवत्या त्रिष्टुप् । ऋषिर्गौतमः[12] । यजमानाशीः । सोमो धेनुं [13]नवप्रसूतां गाम् । [14]ददाति ददातु । सोमः । आदरार्थं पुनर्वचनम् । अर्वन्तमाशुम् । सर्वत्र जात्यभिप्रायेणैकवचनम् । ददातु । सोमो वीरं कर्मण्यम् । कर्मसु साधुः कर्मण्यस्तं कर्मण्यं वीरं पुत्रं ददातु । सादन्यं सदनेषु गृहेषु गृहोपलक्षितकृत्येषु साधुः [तं] सादन्यम् । विदथ्यं विदथो यज्ञस्तत्र

---

१ त्रिष्टुप्–सर्वा० मही० च । २ गोतमः–सर्वा । ३ सत्सु-क-ग० । ४ 'पप्रिम्' इत्यत्र–" 'पृ पालनपूरणयोः' [१०८६ जुहो०] इति । पालनशीलं पप्रिम्" इति–ग० टि० । ५ 'स्वर्दिवं ····· स्वर्षास्तम्' नास्ति–ख० । ६ 'अप्साम्' इत्यत्र–"यद्वा अपो जलानि सुनोतीति अप्साः तम्" इति–ग० टि० । ७ अप्स–क-ख० । ८ वृजिनस्य–ख-ग० । ९ 'शोभनम् ····· तम्' नास्ति–ख० । १० सुश्रवः–क-ख-ग० । ११ 'मदी हर्षे' नास्ति–ख० । १२ गोतमः–ख०, सर्वा० च । १३ नवप्रस्वन्तीम्–ख० । १४ 'ददाति' नास्ति–क० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधुस्तम्। सभेयं सभासु साधुः सभेयस्तं सभेयम्। [1]पितृश्रवणं पितुर्नाम शृणोतीति, पितृनाम श्रावयतीति वा। पितृनामप्रख्यापकं पुत्रं पितृश्रवणम्। [2]यद्वा पित्राज्ञाकारिणं विनीतमित्यर्थः। यो यजमानोऽस्मै सोमाय हविर्ददाशद् ददाति तस्मै यजमानाय सोमो धेन्वादिपदार्थान् ददातीति योजना। पितुर्नामप्रख्यापकं पुत्रं यो ददाशत्। [3]'दाशृ दाने' [८८२ भ्वादिः]। दाशतिर्दानार्थः [निरु० ३।७]। ददात्यस्मै यजमानाय तं सोमं स्तुम इति सम्बन्धः ॥ १५ ॥

त्वमि॒मा ओष॑धीः सोम॒ विश्वा॒स्त्वम॒पो अ॑जनय॒स्त्वं गाः।
त्वमा त॑तन्थो॒र्व॑न्तरि॑क्षं॒ त्वं ज्योति॑षा॒ वि तमो॑ ववर्थ ॥ १६ ॥
(मा० ३४।२२)

सोमदेवत्या [4]त्रिष्टुप्। ऋषिर्गौतमः[5]। हे सोम, त्वम् इमाः। विश्वाः सर्वाः [6]प्रकृताः। [7]ओषधीः फलपाकान्ताः। अजनयः जननं कारितवानसि। त्वम् अपः यज्ञसाधनोदकान्यजनयः। देवतात्मकत्वेन सर्वमुपपद्यते। त्वं च गाः यज्ञार्थं स्थितान् पशून् त्वमजनयः। त्वम् उरु पृथु। अन्तरिक्षम्। [8]आ समन्ततः। ततन्थ 'तनु विस्तारे' [१४६४ तनादिः] विस्तारितवानसि। त्वं ज्योतिषा दीप्त्या। वितमः विशेषतमस्तमः संहृत्य। ववर्थ वर्तसे। एवमादित्यात्मना सोम एव स्तूयते ॥ १६ ॥

दे॒वेन॑ नो॒ मन॑सा देव सोम रा॒यो भा॒गꣳ स॑हसावन्न॒भियु॑ध्य।
मा त्वा त॑नदीशि॑षे॒ वी॒र्य॑स्यो॒भये॑भ्यः॒ प्रचि॑कित्स॒ा गवि॑ष्टौ ॥ १७ ॥
(मा० ३४।२३)

सोमदेवत्या [9]त्रिष्टुप्। ऋषिर्गौतमः[10]। हे देव हे सोम, देवेन। तद्धितलोपश्छान्दसः।

---

१ 'पितृश्रवणं ··· पुत्रं पितृश्रवणम्' इत्यस्य स्थाने 'पितृश्रवणं पितुर्नाम श्रावयतीति पितृश्रवणम्' इति–ख०। २ 'यद्वा पित्रा ···· योजना' नास्ति–ख०। ३ 'दाशृ दाने' नास्ति–ख०। ४ विराट्–क-ख-ग०। ५ गोतमः–सर्वा०। ६ प्रकृतीः–क-ग०। ७ "ओषध्यः फलपाकान्ताः" [२।४।६] इत्यमरः। ८ 'आ समन्ततः ······ ववर्थ' नास्ति–ख०। ९ अनुष्टुप्–क-ख-ग०। १० गोतमः–सर्वा०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवेन सात्त्विकेन मनसा । रायः धनस्य । भागम् अभियुध्य । युध्यतिर्गत्यर्थानां मध्ये पठ्यते [निघ० २।१४] । [1]अन्तर्भावितणिजर्थोऽयमत्र गृह्यते । नः अस्मभ्यम् । रायो भागमभियुध्या-भिगमय [2]देहीत्यर्थः । हे सहसावन् । सह इति बलनाम [निघ० २।९] । आकारादेशश्छान्दसः । हे सहस्वन् । मा त्वा तनत् । मा त्वा [3]अतनत् । [4]तनतिः प्रतिषेधार्थः । दानकर्मणि प्रवृत्तं यजमानं त्वां कश्चिदपि मातनत् प्रतिषेधं मा कुर्यात् कुतस्त्वमेवंविधो जात इति । ईश्वरात्मकत्वेन सोमदेवताया अपीश्वरत्वमस्तीत्याह–ईशिषे वीर्यस्य वीरकर्मणस्त्वमीशिषे त्वमेवेश्वरोऽसि । किं च, उभयेभ्यः अन्तरिक्षद्युलोकेभ्य उभयलोकप्राप्त्यर्थं त्वमेव [5]प्रचिकित्स । प्रकृष्टां [6]विचिकित्सां [7]त्वत्प्राप्तिसाधनानुष्ठानं कारयेत्यर्थः । गइष्टौ । अत्र गोशब्देनायं विवक्ष्यते यजमानस्य स्वर्गैषणायां [8]विचिकित्सां कारय । अथान्तरिक्षलोकैषणायां तच्चिकित्सां कारय । अथ मनुष्यलोकैषणायां गविष्टौ मनुष्यलोकसाधनभूतेष्टौ यजमानं प्रवर्तय । अस्य तत्कर्म कर्तुं योग्यतामापादयेत्यर्थः ॥ १७ ॥

अ॒ष्टौ व्य॑ख्यत्क॒कुभः॑ पृथि॒व्यास्त्री धन्व॒ योज॑ना स॒प्त सिन्धू॑न् ।
हि॒र॒ण्या॒क्षः स॑वि॒ता दे॒व आगा॒द्दध॒द्रत्ना॑ दा॒शुषे॒ वार्या॑णि ॥ १८ ॥

(मा० ३४।२४)

[9]'अष्टौ व्यख्यत्', 'हिरण्यपाणिः सविता', 'हिरण्यहस्तो असुरः', 'ये ते' इति चतस्रः सवितृदेवत्याः । [10]द्वितीया जगती, अन्यास्त्रिष्टुभः । ऋषिर्हिरण्यस्तूपः[11] । अष्टौ व्यख्यत् । चतस्रो दिशश्चतस्रः प्रदिशश्चेत्यष्टौ ककुभः पृथिव्याः सम्बन्धिनीः अष्टौ दिशः । यः व्यख्यत् विशेषतः प्रकाशितवान् प्रकाशयति । त्री त्रीणि । धन्वेत्यन्तरिक्षनाम [निघ० १।३; निरु० ५।५] । धन्व धन्वानि । अन्तरिक्षमित्यन्तरिक्षे [12]क्लृप्तानि त्रीणि स्थानानि लक्ष्यन्ते । ग्रहस्थानं

---

[1] ण्यर्थः–ख० । २ 'देहीत्यर्थः' नास्ति–ख० । ३ आतनत्–ग० । ४ तनोतिः ['तनु विस्तारे' १४६४ तनादिः] प्रतिबन्धार्थः–उवटमहीधरौ । ५ विचिकित्साम्–ख०, विचिकित्स–क-ग० । ६ चिकित्साम्–ख-ग० । ७ तत्–ख० । ८ तच्चिकित्साम्–ख० । ९ 'अष्टौ व्यख्यत्' नास्ति–क० । १० तृतीया–क-ख-ग० । ११ आङ्गिरसो हिरण्यस्तूपः–सर्वा० । १२ 'क्लृप्तानि त्रीणि स्थानानि' इत्यस्य स्थाने 'नक्षत्राणि' इति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नक्षत्रस्थानं राशिस्थानं चेति त्रीणि स्थानान्यन्तरिक्षोपलक्षितास्त्रयो लोका अभिधीयन्ते। त्रीन् लोकान् यश्च व्यख्यत्। योजना पृथिव्याः पृथिव्युपलक्षितानि पञ्चाशल्लक्षोत्तरद्वादशकोटियोजनानि यश्च व्यख्यत् प्रकाशयति। तत्रावान्तरविशेषमाह–सप्त सिन्धूनिति[1]। सप्त समुद्रान् व्यख्यत्। [2]सोऽयं हिरण्याक्षः हिरण्यसदृशाक्षः। सविता सर्वप्राणिनामन्तर्यामित्वेन सर्वकार्यप्रतिप्रसवकर्ता सविता। देवः देवनादिगुणविशिष्टः श्रीभगवान् सूर्यः। दधद्रत्ना दाशुषे वार्याणि। दाशुषे दानशीलाय यजमानाय, देवताभ्यो हवींषि दत्तवते यजमानाय। वार्याणि वरणीयानि उत्कृष्टानि रत्नानि। दधत् स्थापयत्। [3]आगादिति आयात्विति सम्बन्धः॥ १८॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥ १९॥

(मा० ३४।२५)

हिरण्मयः पाणिरिति सर्वशरीरस्योपलक्षणम्। हिरण्मयदेहः। अथवा स्वभक्तेभ्यो दातुं हिरण्यपूर्णपाणिः। हिरण्यपाणिः सविता। विचर्षणिः विविधार्थानां द्रष्टा कृताकृतप्रेक्षकश्च। उभे द्यावापृथिवी अन्तः। उभयोर्द्यावापृथिव्योर्मध्ये। ईयते 'ईङ् गतौ' [११४३ दिवादिः] अनुगच्छति प्रतियाति। अमीवां व्याधिम् अपबाधते। अन्धकारलक्षणं रोगं निवर्तयति। अथ यदा, वेति सूर्यमभि। सूर्याभिमुखतयाऽस्तमये गच्छति। तदा कृष्णेन रजसा। अन्धकारलक्षणेन कृष्णवर्णोपलक्षितं यत्तमः [तेन], अस्तमयकाले तेजसा तेजसा सह स्थितं सूर्यम्। [4]अभिवेति [5]अनुगच्छति। अस्तमितेऽनुगच्छतीत्यर्थः। द्यां भूमिं च ऋणोति व्याप्नोति यस्तं यथोक्तगुणं सूर्यमभिष्टुम इति सम्बन्धः॥ १९॥

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ्।
अपसेधन् रक्षसो यातुधानानस्थाद्देवः प्रति दोषं गृणानः॥ २०॥

(मा० ३४।२६)

---

१ 'इति' नास्ति–क०। २ 'सोऽयम्' वारद्वयं पठितः–क०। ३ 'आगादिति' नास्ति–ख०। ४ 'ईयते ···· अभिवेति' नास्ति–ख०। ५ पर्यनुगच्छति–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयोऽर्द्धर्चः पूर्वं व्याख्येयः, सामर्थ्यात्। अपसेधन् रक्षसो यातुधानान्। रक्षसः पुरुषार्थप्रतिबन्धकाननर्थकारिणश्च राक्षसान्। यातुधानांश्च असुखकरान्। यज्ञाद् अपसेधन् [1]यज्ञादपसारयन् निराकुर्वन्। यो देवः। [2]अस्थात् उदस्थाद् उदेति। पुनश्च किं कुर्वन्निति? प्रतिदोषं गृणान इति। श्रुतिस्मृतिविहितधर्मपराङ्मुख[त्व]ाद् यावान् दोषो भवति तावन्तं च दोषं प्रतिगृणानः प्रतिस्तुवन् अप्रशस्तं जातमिति ब्रुवन् गणयंश्च य उदेति। यद्वा दोषा रात्रिः प्रतिदोषं [3]प्रतिरात्रिस्थितं तमः संहरन्नुदेति। सोऽयं [4]हिरण्यहस्तः हिरण्यपूर्णहस्तः दानार्थं हस्ते हिरण्यं यस्य स हिरण्यहस्तस्तथोक्तः। [5]"आरोग्यं भास्करादिच्छेत्" इति व्याधिग्रस्तेन श्रद्धया यो यावदाराधितः सन् तस्मै असून् प्राणान् दीर्घायुष्ययुक्तान् राति ददातीत्यसुरः सविता। सुनीथः नीथा [6]स्तुतिः, शोभना नीथा यस्य स सुनीथः। सुमृळीकः 'मृड सुखने' [१३२८ तुदादिः] साधुसुखयिता। स्ववान् [7]आत्मात्मीयज्ञातिधनवचनः स्वशब्दस्तद्वान् [8]स्ववान्। अर्वाङ् अर्वागञ्चनोऽस्मदभिमुखमागत्य देवो यातु आयात्विति सम्बन्धः ॥ २० ॥

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ २१ ॥
(मा० ३४।२७)

हे श्रीभगवन्सवितः, ते तव। ये पन्थाः व्यत्ययः। पन्थानः मार्गाः। पूर्व्यासः पूर्वेष्वपि कालेषु भवाः, पूर्व्या [9]एव पूर्व्यासः पूर्वप्रसिद्धाः। अरेणवः रेणुवर्जिता अपांसुलाः। सुकृता अन्तरिक्षे। अन्तरिक्षे आकाशे निराधारेऽपि श्रीभगवता सुष्ठु कृताः। तेभिः तैः। पथिभिः

---

१ 'यज्ञात्' नास्ति—क-ग०। २ आस्थात्—ख०। ३ प्रतिरात्री—ख०। ४ 'हिरण्यहस्तः' नास्ति—क०। ५ "आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्। ऐश्वर्यमीश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ॥" इत्येवं सम्पूर्णः श्लोको गौतमधर्मसूत्रे क्रियाकाण्डे १३ कण्डिकायां द्रष्टव्यः। 'ज्ञानं महेश्वरादिच्छेत्' इति तु सुभाषितेषु प्रसिद्धस्तृतीयः पादः। वाररुचनिरुक्तसमुच्चये च— "आरोग्यं भास्करादिच्छेन्मुक्तिमिच्छेज्जनार्दनात्। ईश्वराज्ज्ञानमन्विच्छेच्छ्रियमिच्छेद्धुताशनात् ॥" [१।१५] इत्येवं पठितः। सुभाषितेष्वपि क्वचित् 'श्रियमिच्छेद्धुताशनात्' इति द्वितीयपादत्वेन पठितः। ६ प्रीतिः—ख०। ७ 'आत्मा' नास्ति—क-ग०। ८ 'स्ववान्' नास्ति—ख०। ९ 'एव' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुगेभिः साधुगमनैर्मार्गैर्गच्छतः । नः अस्मान् । हे सवितः हे देव । रत्न [1]अधिब्रूहि च । अधि ऐश्वर्ये [निरु० १।३] ऐश्वर्यभावेन ब्रूहि । वयं तु ते नियोज्याः । त्वं त्वस्माकं स्वामी । तस्माद्धिते कर्मण्यस्मान्नियोजय ॥ २१ ॥

उभा पिबतमश्विनोभा नः शर्म यच्छतम् ।
अविद्रियाभिरूतिभिः ॥ २२ ॥ (मा० ३४।२८)

[2]अश्विदेवत्या गायत्री । [3]ऋषिः [4]प्रस्कण्वः । [5]हे अश्विना, उभा उभौ । अश्विना अश्विनौ । युवां पिबतं सोमं पिबतम् । किं च, उभा उभौ । हे अश्विनौ सोमं पीतवन्तौ । नः अस्माकम् । शर्म सुखम् । यच्छतं प्रयच्छतम् । किं च, अविद्रियाभिः । [6]विदीर्यन्तीति विद्रियाः 'दृ विदारणे' [१४९४ क्र्यादिः] अविदारणीयाभिरनवखण्डिताभिः । ऊतिभिः अवनैः । रक्षतमिति शेषः ॥ २२ ॥

अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे निह्वये वां वृधे च नो भवतं वाजसातौ ॥ २३ ॥
(मा० ३४।२९)

[7]'अप्नस्वतीमश्विना', 'द्युभिरक्तुभिः' इति च द्वे अश्विदेवत्ये त्रिष्टुभौ । ऋषिस्तु कुत्सः । अप्न इति कर्मनाम [निघ० २।१] अप्नस्वतीं कर्मवतीं वाचम् । अस्मे अस्माकम् । कृतं कुरुतम् । नो दस्रा । नः दस्रौ दर्शनीयौ अश्विनौ । वृषणा वृषणौ वर्षितारौ सेक्तारौ । मनीषां च वाक्यवृत्तिहेतुभूतां च बुद्धिं नः कृतम् । अद्यूत्ये 'अद भक्षणे' [१०११ अदादिः] । द्युतमन्नं भक्षणार्थं द्युतमद्युतं [?] तत्र भवोऽद्यूत्यस्तस्मिन्नद्यूत्ये अन्ननिमित्तभूतद्यूत्ये । अवसे अवनाय

१ 'अधिब्रूहि च' इत्यत्र—"अधि अङ्गीकृत्य ब्रूहि एते मदीया इति । यद्वा अधिब्रूहि उपदिशास्माकं यद्धितं पथ्यं तत् । यद्वा अधि अधिकान् वद एते महायाज्ञिका दातार इत्यादि ।" इति—ग०टि० । एतच्च महीधरभाष्यीयम् । २ अश्विनौ—क-ख-ग० । ३ 'ऋषिः' नास्ति—ख० । ४ 'प्रस्कण्वः' नास्ति—क० । ५ 'हे अश्विना' इत्यस्य स्थाने 'सविता' इति—ख० । ६ "विदीर्यन्तीति विद्रियाः" नास्ति— ख० । ७ 'अप्नस्वतीमश्विना' नास्ति—क० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्षणाय । निह्वये वाम् । किं च, अद्मूत्ये 'अद भक्षणे' [१०११ अदादिः] । अद्मत इत्यन्नं तस्मै अदे अन्नभक्षणार्थं द्युतमद्युतं[1] [?] तत्र भवमद्मूत्यं तस्मिन्नद्मूत्ये अन्नभक्षणनिमित्तभूतद्युतकर्मणि निमित्ते । वां युवाम् अश्विनौ । निह्वये नितरामाह्वयामि । कस्मै ? अवसे अवनाय रक्षणाय । वृधे [2]वर्धनं कृत् तस्मै वर्धनाय च । नः अस्माकम् । वाजसातौ संग्रामे । भवतम् अस्मज्जयार्थं भवतमिति शेषः ॥ २३ ॥

द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ २४ ॥

(मा० ३४।३०)

द्युभिः अहोभिः । अक्तुभिः रात्रिभिः । कथंभूतैरिति ? [3]अरिष्टेभिः [4]'रिष हिंसायाम्' [६९४ भ्वादिः] । अरिष्टेभिः । छान्दसं पदम् । व्यत्ययः । अरिष्टेभिः हिंसारहितैः करणभूतैररिष्टैः । सौभगेभिः [5]सुभगत्वनिमित्तभूतैरहोरात्रैः । हे अश्विनौ, अस्मान् परिपातं परिरक्षतम् । 'तन्नो मित्रो [6]वरुणः' इति व्याख्यातो मन्त्रः [३२।४२] ॥ २४ ॥

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ २५ ॥

(मा० ३४।३१)

'आकृष्णेन' इत्ययं मन्त्रोऽपि[7] व्याख्यातः [३२।४३] ॥ २५ ॥

आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः ।
दिवः सदाꣳसि बृहती वितिष्ठस आ त्वेषं वर्तते तमः ॥ २६ ॥

(मा० ३४।३२)

---

१ 'अद्युतम्' नास्ति—क० । २ 'वर्धनं कृत् तस्मै' नास्ति—ख० । ३ 'अरिष्टेभिः ...... व्यत्ययः' नास्ति—क० । ४ 'ऋपिर्हिंसायाम्' इति—ख-ग० । ५ सुभगत्वनिमित्तकरणभूतैः—क-ख-ग० । ६ 'वरुणः' नास्ति—ख-ग० । ७ 'अपि' नास्ति—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]रात्रिदेवत्या पथ्याबृहती। [2]कुशिका भरद्वाजदुहिता ऋषिः। [3]आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः। हे रात्रि, पार्थिवं [4]रजः। रजःशब्दो लोकवचनः [निरु०४।१९]। पार्थिवं रजः भूलोकः। त्वया आ अप्रायि। 'प्रा पूरणे' [१०६१ अदादिः]। त्वया पूरितः। पितुः [5]द्युलोकस्य स्थानमपि त्वया रात्र्या आ अप्रायि। धामभिः प्रकाशैः व्याप्तानि। दिवः सदांसि च सभामण्डलानि च। बृहती महती रात्री त्वं वितिष्ठसे [6]आक्रमसि। अत एव कारणाद् आ त्वेषं वर्तते। दिवः द्युलोकस्य। त्वेषं त्विषं दीप्तिमपि मनुष्यादीनां प्रति। तमः आवर्तते आवृणोति॥ २६॥

उष॒स्तच्चि॒त्रमाभ॑रा॒स्मभ्यं॑ वाजिनीवति।
ये॒न॑ तो॒कं च॒ तन॑यं च॒ धाम॑हे॥ २७॥

(मा० ३४।३३)

उषोदेवत्या [7]परोष्णिक्। ऋषिर्गोतमः[8]। हे उषः हे वाजिनीवति हे अन्नवति उषोदेवते। तदन्नं चित्रं चायनीयं दर्शनीयम्। अस्मभ्यम् आभर [9]आहर। येन त्वद्दत्तेनान्नेन। तोकम् [10]अपत्यम्। तनयं पुत्रस्य पुत्रं पौत्रं च। धामहे पोषयामः॥ २७॥

प्रा॒त॒र्जितं॒ भग॑मु॒ग्रꣳ हु॑वेम व॒यं पु॒त्रमदि॑ते॒र्यो वि॑ध॒र्ता।
आ॒ध्रश्चि॒द्यं मन्य॑मानस्तु॒रश्चि॒द्राजा॑ चि॒द्यं भगं॑ भ॒क्षीत्याह॑॥ २८॥
(मा० ३४।३५)

भगदेवत्या त्रिष्टुप्[11]। वसिष्ठ ऋषिः। प्रातर्जितमिति[12]। [13]प्रातर्जयतीति प्रातर्जित् तम्। अदितेः देवमातुः। प्रातः प्रातर्जयन्तं प्रातर्जितं सर्वोत्कर्षेण स्थितम्। भगम् "ऐश्वर्यस्य समग्रस्य

---

१ रात्रीदेवत्या-ख०। २ कशिपा-सर्वा०। ३ 'आरात्रि'···'धामभिः' नास्ति-क०। ४ 'रजः' नास्ति-ख०। ५ 'लोकस्य' इत्येव-ख०। ६ 'आक्रमसि' नास्ति-ख०। ७ उष्णिक्-क-ख-ग०। ८ गोतमः-सर्वा०। ९ 'आहर' नास्ति-ख०। १० 'अपत्यम्' नास्ति-ख०। ११ अनुष्टुप्-क-ख-ग०। १२ 'इति' नास्ति-क-ग०। १३ 'प्रातर्जयतीति प्रातर्जित् तम्' नास्ति-ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग [1]इतीरणा ॥" [विष्णु० ६।५।७४] इति प्रसिद्धार्थो भगशब्दः। स एव सूर्यरूपेण वितत इति भगः। सूर्यं भगम्। उग्रम् अतितेजस्विनं भगम्। वयं यजमानाः। हुवेम आह्वयामः। यो विधर्ता यो भगो जगतो धर्ता धारयिता तं भगमिति। किं च, आध्रश्चिद्यं मन्यमानः। आध्रः 'ध्रै तृप्तौ' [६०७ भ्वादिः अध्रः अतृप्तः बुभुक्षितः। चिद् मन्यमानः। मन्यतिरत्रार्चतिकर्मा [निघ० ३।१४] अर्चयन् पूजयन्। यं देवम्। भक्षीत्याह भजसीत्याह। तं भगमिति सम्बन्धः। किं च, तुरश्चित्। आद्याक्षरलोपश्छान्दसः। तुरः आतुरः व्याधिपीडितः। यदेनं मन्यमानः अर्चयन्। राजा चित् कश्चिद् यं [2]भक्षीत्याह। तं भगं [3]हुवेम इति सम्बन्धः। राजशब्दोऽत्र प्रदर्शनार्थः। "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" [गीता ३।२१] इति स्मृतिश्च ॥ २८ ॥

पूषन् तव व्रते वयं न रिष्येम कदाचन।
स्तोतारस्त इह स्मसि ॥ २९ ॥ (मा० ३४।४१)

पूषदेवत्या गायत्री। ऋषिः सुहोत्रः। हे पूषन्, पुष्यति पुष्णातीति वा पूषा तत्संबोधन हे पूषन्। तव व्रते। [4]व्रतमिति कर्मनाम [निघ० २।१; निरु० १२।३२]। आज्ञाभूते कर्मणि वर्तमाना वयं न रिष्येम। [5]रिष्यतिर्हिंसार्थः। कदाचन कदाचिदपि। न रिष्येम न विनश्येम। स्तोतारस्त इह स्मसि। इह यज्ञे। तत्रैव च स्तोतारः। स्मसि। इकारश्छान्दसः। वयं स्तोतारः स्मः ॥ २९ ॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम्।
स नो रासच्छुरुधश्चन्द्राग्रा धियं धियꣳ सीषधाति प्र पूषा ॥ ३० ॥
(मा० ३४।४२)

पूषदेवत्या त्रिष्टुप् [6]। [7]ऋजिष ऋषिः। पथस्पथः परिपतिमिति। व्यत्ययः। परिपतिरिति पथस्पथः मार्गस्य परिपतिम्। वचस्या। छान्दसं पदम्। वचसा [8]दैववाक्येन मन्त्रेण

---

१ 'इतीङ्गना' इति प्रसिद्धं पाठान्तरम्। २ भजसीत्याह–ख०। ३ 'हुवेम' नास्ति–ख०। ४ व्रत इति–क-ख-ग०। ५ 'रिष हिंसायाम्' [१२३२ दिवादिः]। ६ अनुष्टुप्–क-ख-ग०। ७ ऋजिश्वः–सर्वा०, रुहिश्च–ख०। ८ दैववाक्येन–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यः कृतः [1]अभि अभिकृतः अभिमुखीकृतः । कामेन इच्छया चाभिमुखीकृतो यः । अर्कं परमतेजोरूपम् । आनट् । आनडिति व्याप्तिकर्मा [निघ० २।१८] । व्याप्नोति । स पूषा । नः अस्मभ्यम् । शुरुधः । [2]'शुच शोके संतापे च' [१८३ भ्वादिः] । 'रुधिर् आवरणे' [१४३९ रुधादिः] । शुचं रुन्धन्तीति शुग्रुधः शुरुधः । छान्दसो वर्णलोपः । शोकनिवर्तकाः । रायः धनानि । चन्द्राग्राः चन्द्रं सुवर्णं चायनीयं सुवर्णमग्रं येषां रायां रयीणां ते चन्द्राग्रास्तान् शुद्धचन्द्राग्रान् । स पूषा रासत् । रासतिर्दानकर्मा [निघ० ३।२०] । 'रा दाने' [१०५७ अदादिः] । धियं धियं धीः । नः अस्मभ्यम् । स पूषा प्रसीषधाति दधातु । अथवा पथस्पथः मार्गस्य मार्गस्य सर्वमार्गाणाम् । परिपतिम् अधीश्वरम् । कामेन इच्छया योऽभिकृतः ईश्वरप्रसादलब्धेच्छया देवताभिमुखो जातः । वचसा देववचनेन वैदिकमन्त्रेण । सर्वमार्गाधिपतिम् अर्कं परमतेजोरूपम् । आनट् यो व्याप्नोति । परब्रह्मरूपादित्योपासनया सारूप्यमुपगत इत्यभिप्रायः । स पूषा शुरुधश्चन्द्राग्राः क्षुदादिशोकनिवर्तका इष्टप्रापकाश्चन्द्राग्राः । रायः धनानि । [3]रासत् ददातु । किं च, धियं धियं देवतातत्त्वविषया धीः । प्रसीषधाति ददातु ॥ ३० ॥

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।

अतो धर्माणि धारयन् ॥ ३१ ॥ (मा० ३४।४३)

[4]'त्रीणि पदा', 'तद्विप्रासः' इति द्वे वैष्णव्यौ गायत्र्यौ । ऋषिर्मेधातिथिः । अनयोर्मन्त्रयोरेकवाक्यता । त्रीणि पदानि अग्निवायुसूर्याख्यानि[5] । यो विष्णुः यज्ञः । विचक्रमे विक्रान्तवान् पादविक्षेपं कृतवान् । यो गोपाः समस्तस्य जगतो गोपा । स्वयं च अदाभ्यः केनाप्यविहिंस्यः । किं कुर्वन्निति ? अतो धर्माणि । [6]धर्मशब्दोऽत्र कर्मपर्यायः । धर्माणि कर्माणि । धारयन् फलदातृत्वेन यो विष्णुर्विचक्रमे तस्य विष्णोरित्युत्तरत्रान्वयः । अथवा त्रीणि पदानि त्रिलोकान् विचक्रम इति योजनीयो मन्त्रः ॥ ३१ ॥

---

१ 'अभि अभिकृतः' नास्ति–ख० । २ 'शुच शोके' इत्येव–धातु० । ३ नासत्–क-ग०, आसन्–ख० । ४ 'त्रीणि पदा' नास्ति–क० । ५ सूर्याणि–ख० । ६ 'धर्मशब्दः⋯⋯कर्मपर्यायो वा' इति–उव्वटः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्विप्रा॑सो विप॒न्यवो॑ जागृ॒वांस॒ः समि॑न्धते।
विष्णो॒र्यत्प॑र॒मं प॒दम् ॥ ३२ ॥ (मा० ३४।४४)

तस्य विष्णोः श्रीभगवतः। यत्परमं पदम्। [1]सर्वकार्यकारणप्रपञ्चमधःकृत्य स्थितं सर्वोत्कृष्टतमं सत्यज्ञानानन्तानन्दात्मकलक्षणं परमं पदम्। [2]तत्परमं पदम्। विप्रासो विपन्यवो जागृवांसः समिन्धते। विप्राः ब्राह्मणाः। 'प्रा पूरणे' [१०६१ अदादिः]। सर्वेषामपेक्षितकामपूरकाः। विपन्यवः मेधाविनः। जागृवांसः 'जागृ निद्राक्षये' [१०७२ अदादिः] जागरणशीलाः। समिन्धते 'इन्धी दीप्तौ' [१४४६ रुधादिः] आत्मत्वेन दीप्यन्ति अनुभवन्ति। यज्ञपक्षे तु परमं पदं समिन्धते निर्मलीकुर्वन्ति॥ ३२ ॥

घृ॒तव॑ती॒ भुव॑नानामभि॒श्रियो॒र्वी पृ॒थ्वी म॑धु॒दुघे॑ सु॒पेश॑सा।
द्यावा॑पृथि॒वी वरु॑णस्य॒ धर्म॑णा॒ विष्क॑भिते अ॒जरे॒ भूरि॑रेतसा ॥ ३३ ॥
(मा० ३४।४५)

द्यावापृथिवीदेवत्या जगती। [3]विहव्य ऋषिः। भुवनानां भूतजातानाम्। अभिश्रिया सर्वोपरिशोभया। यद्वा भुवनानामभिश्रिया [4]अभ्याश्रयणीयया। उर्वी विस्तीर्णा। पृथ्वी पृथुला। एवंगुणा तु द्यौश्च। एते उभे मधुदुघे मधुदोहनवत्यौ। सुपेशसा सुपेशसे सुरूपवत्यौ। [5]द्यावापृथिवी द्यावापृथिव्यौ। अजरे जरारहिते। भूरिरेतसा भूरितेजसौ बहुविधप्रजोत्पत्तिनिमित्तबीजवत्यौ द्यावापृथिव्यौ। वरुणस्य सर्वैर्वरणीयस्य। धर्मणा धारणशक्त्या। विष्कभिते विष्टब्धे स्थिरीकृते [6]इति ॥ ३३ ॥

ये न॑ः स॒पत्ना॒ अप॒ ते भ॑वन्त्विन्द्रा॒ग्निभ्या॒मव॑ बाधामहे॒ तान्।
वस॑वो रु॒द्रा आ॑दि॒त्या उ॑परि॒स्पृश॑ं मो॒ग्रं चे॒त्तार॑मधिरा॒जम॑क्रन् ॥ ३४ ॥
(मा० ३४।४६)

---

१ करण—ख-ग०। २ 'तत्परमं पदम्' नास्ति—ख०। ३ अस्य मन्त्रस्य भरद्वाज ऋषिः, विहव्य ऋषिस्तु 'ये नः सपत्नाः' इत्यग्रिममन्त्रस्य। द्रष्टव्यम्—सर्वा०। ४ 'अभ्याश्रयणीयया' नास्ति—ख०। ५ 'द्यावापृथिवी' नास्ति—क-ग०। ६ 'इति' नास्ति—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गोक्तदेवत्या त्रिष्टुप्[1]। ये नः अस्माकम्। ये सपत्नाः शत्रवः। अप ते भवन्तु। [2]अपगतवीर्या भवन्तु। [3]इन्द्राग्निभ्यामववाधामहे [4]तान्। तान् अधिकफलान् शत्रून्। इन्द्राग्निभ्यामववाधामहे[5] तान् नाशयामः। वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारम्। उपरि जगदुपरि स्थितं परमं तत्त्वं स्पृशतीत्युपरिस्पृक्, तमुपरिस्पृशम्। उग्रम् उद् अनुगृह्णातीत्युग्रस्तमुग्रम्। चेत्तारं सर्वस्य च ज्ञातारम्। मा माम्। अधिराजम् अधिपतिमीश्वरम्। अक्रन् अकुर्वन् कृतवन्तः ॥ ३४ ॥

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना।
प्रायुस्तारिष्टं नी रपांꣳसि मृक्षतꣳ सेधतं द्वेषो भवतꣳ सचा भुवा ॥ ३५ ॥
(मा० ३४।४७)

अश्विदेवत्या जगती। हिरण्यस्तूप ऋषिः। आ नासत्या हे नासत्यौ। अश्विना अश्विनौ। त्रिभिरेकादशैः त्रयस्त्रिंशद्भिः। देवेभिः देवैः सह। आयातम् आगच्छतम्। आगत्य चेह यज्ञं मधुपेयं मधुमत् पेयं पानीयं सोमं पिबतम्। किं च, प्रायुस्तारिष्टम्। आयुः आयुष्यम्। प्रतारिष्टं विस्तारयतम्। आयुषोऽभिवृद्धिं कुरुतम्। नी रपांसि [6]मृक्षतम्। रप इति पापनाम [निरु० ४।२१]। रपांसि पापानि। मृक्षतम्। [7]'मृक्ष च्छेदने' [?] इत्यस्य रूपम्। निर्मृक्षतम्। [7]'मृक्ष [8]'मृजु सेचने' [?]। पापानि [9]निर्मृज्य प्रक्षाल्य आत्मनः शुद्धिमापादयतम्। सेधतं द्वेषः। द्वेष इति दौर्भाग्ये। [10]'षिध गत्याम्' [४७ भ्वादिः]। सेधतं गमयतम्। सचा भुवा सचा भुवौ। सचा भुवौ भवतम्। सदा सर्वकार्येषु सह युक्तौ भवतम् ॥ ३५ ॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ ३६ ॥
(मा० ३४।४८)

---

१ विहव्य ऋषिः—सर्वा०। २ 'अपगतवीर्या भवन्तु' नास्ति—ख०। ३ 'इन्द्राग्निभ्याम् ... 'शत्रून्' इति वारद्वयं पठितः—क०। ४ 'तान्' नास्ति—ख०। ५ अपवाधामहे—ख०। ६ 'मृक्षतम्' नास्ति—ख०। ७ मृक्षधातुः संघातेऽर्थे पठितः [६६४ भ्वादिः]। ८ 'मृजू शुद्धौ' [१०६६ अदादिः] इति—धातु०, 'मृजूष् शुद्धौ' इति—उवटमहीधरौ। ९ मृज्य—ख-ग०। १० षिधु—क-ख-ग०, उव० मही० च।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मरुद्देवत्या त्रिष्टुप् । ऋषिरगस्त्यः । हे मरुतः, एष स्तोमः विशिष्टस्तुतिः । वः युष्माकं मरुतां भवति । इयं गीः स्तुतिरूपा वाणी । [1]मान्दार्यस्य [2]हृष्टस्वामिकस्य । मान्यस्य मानार्हस्य । कारोः यज्ञस्य कर्तुर्मभेयं गीः प्रिया सत्या च । स्वत एव स्तोमं च गिरं चोपश्रुत्य हे मरुतः, [3]इषा आयासीष्ट । इषा अन्नेन निमित्तभूतेन आगच्छत । किं च, तन्वे तनवे शरीराय शरीरस्थित्यर्थम् । वयाम् । छान्दसो दीर्घः । वयम् । विद्याम लभेम । [4]इषम् । कस्मै इति ? [5]वृजनं बलम् । [6]जीरदानुम् । छान्दसं पदम् । [7]जीवदानाय ॥ ३६ ॥

सहस्तोमाः सहच्छन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन् ॥ ३७ ॥
(मा० ३४।४९)

ऋषिसृष्टिप्रतिपादिका त्रिष्टुप् । [8]ऋषिर्हिरण्यस्तूपः । सहस्तोमाः स्तोमसहिताः । [9]सहच्छन्दसः छन्दःसहिताः । आवृतः आवृच्छब्देन कर्माभिधीयते । तत्कर्म आवर्तयन्तीति आवृतः । श्रद्धासत्यप्रधानानां कर्मणामनुष्ठातार आवृतः । सहप्रमाः प्रमा सम्यगनुभवः, प्रमाभिः सहिताः सहप्रमाः प्रमाणपरीक्षकाः । ऋषयः मन्त्रद्रष्टारः । ते च सप्त—"सप्तर्षयो भरद्वाजः कश्यपो गौतमोऽत्रिकः । विश्वामित्रो जमदग्निर्वसिष्ठः सप्तमः स्मृतः ॥" इति । दैव्याः दिवि भवाः । प्रजापतित्वाभिमानिनो ये त एवास्मिन् सर्गादावभिव्यज्यमानाः । ते पूर्वेषां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमिणामन्येषां च । पन्थां पन्थानम् । अनुदृश्य श्रीभगवदनुगृहीतबुद्ध्याऽनुदृश्य दृष्ट्वा । धीराः धियामेव [10]रमन्त ऋषयः । अन्वालेभिरे अन्वालम्भनं सृष्टवन्तः । अन्वालम्भनं यज्ञादि-सृष्टिरित्यर्थः । कथमिव ? रथ्यो न । नकार उपमार्थीयः [निरु० १।४] रथे भवो रथ्यः सारथिरिव । यथा सारथिः स्वाभिलषितदेशप्राप्त्यर्थमश्वानां रश्मीनालभते संस्पृशत्येवं वर्णाश्रमिणां [11]चान्येषां स्वाभिलषितफलप्राप्त्यर्थं श्रुतिविहितयज्ञादिमार्गान्[12] [13]संस्पृशन्ति [14]संस्मारयन्तीत्यर्थः ॥ ३७ ॥

---

१ 'मान्दार्यस्य' इत्यत्र—"मन्दारः कल्पवृक्षस्तत्तुल्यो मान्दार्यस्तस्य अर्थिकामपूरक-स्येत्यर्थः" इति–ग० टि० । २ हृष्टस्वामिकस्य–ख० । ३ 'इषा' नास्ति–क-ग० । ४ 'इषम्' नास्ति–ख० । ५ 'वृजनं बलम्' नास्ति–ख० । ६ 'जीरदानुम्' इत्यत्र–"जीवयतीति जीरदानुस्तम् । औणादिको रदानुप्रत्ययः ।" इति–ग० टि० । ७ जीवनाय–क० । ८ ऋषिर्यज्ञः प्राजापत्यः–सर्वा० । ९ 'सहच्छन्दसः छन्दःसहिताः' नास्ति–ख० । १० रताः–ख० । ११ 'चान्येषां स्व' नास्ति–ख० । १२ मार्गम्–ख० । १३ संस्पृशति–ख० । १४ संस्मारयति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुष्यं वर्चस्यंॕ रायस्पोषमौद्भिदम् ।
इदंॕ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ॥ ३८ ॥

(मा० ३४।५०)

[1]'आयुष्यं वर्चस्यम्', 'न तद्रक्षांॕसि', 'यदाबध्नन्' इति हिरण्यस्तुतिः । उष्णिक्शक्करी-त्रिष्टुभः । [2]हिरण्यस्तूप ऋषिः । आयुष्यं यदिदं हिरण्यं सुवर्णम् आयुष्यम् आयुषे हितमायुष्यम् । वर्चस्यं वर्चस्तेजः, वर्चसे हितं वर्चस्यम् । रायस्पोषं धनस्य पोषं धनमभिवर्द्धयितुं [3]स्थितम् । औद्भिदं धनस्य [4]स्वर्गस्य वा उद्भिदम् उद्भेदकं [5]प्रकाशकम् । उद्भिनत्तीत्युद्भिद् उद्भिदेवौद्भिदम् । वर्चस्वत् [6]अन्नसंयुक्तं स्वयं वर्चोविशेषयुक्तम् । वर्च इत्यन्ननाम [निघ० २।७] । यदिदं हिरण्यं जैत्रायाविशतात् । उ एव । जैत्राय जयार्थम् । मामेव आविशतात् • मामाविशतु मय्येवावतिष्ठ[ताम्] तु (?) ॥ ३८ ॥

न तद्रक्षांॕसि न पिशाचास्तरन्ति देवानामोजः प्रथमजंॕ ह्येतत् ।
यो बिभर्ति दाक्षायणंॕ हिरण्यंॕ स देवेषु कृणुते दीर्घमायुः
स मनुष्येषु कृणुते दीर्घमायुः ॥ ३९ ॥ (मा० ३४।५१)

[7]तद् हिरण्यम् । रक्षांसि राक्षसाः । न तरन्ति नोल्लङ्घयन्ति [8]न हिंसन्ति । न पिशाचाः पिशिताशना न तरन्ति नोल्लङ्घयन्ति । देवनामोजः प्रथमजं ह्येतत् । एतद्धिरण्यम् । देवानां प्रथमजम् आदित एव निष्पन्नम् [9]ओजः । हि प्रसिद्धं ह्येतत् । यत एवमतो यो बिभर्ति दाक्षायणम् । दाक्षायणमित्यलङ्कारविशेषः । अलङ्काररूपेण स्थितं हिरण्यं [10]यो बिभर्ति धारयति । स हिरण्य-धारी देवेषु मध्ये कृणुते दीर्घमायुः । दीर्घमायुः कृणुते करोति । स तत्रापि चिरकालं जीवतीत्यर्थः । स च मनुष्येषु [11]मध्ये कृणुते दीर्घमायुः । मनुष्याणां मध्येऽतिदीर्घकालं जीवतीत्यर्थः ॥ ३९ ॥

---

१ 'आयुष्यं वर्चस्यम्' नास्ति–क० । २ दक्षः–सर्वा०महो०च । ३ 'स्थितम्' नास्ति–ख० । ४ स्वर्णस्य–ख० । ५ 'प्रकाशकम् ।'' ''औद्भिदम्' नास्ति–ख० । ६ 'अन्नसंयुक्तम्' नास्ति–ख० । ७ 'तद्' नास्ति–ख० । ८ 'न हिंसन्ति' नास्ति–ख० । ९ 'ओजः' इत्यत्र–"हिरण्यं देवानां तेज एव" इति–ग० टि० । १० 'यः' नास्ति–क-ख० । ११ 'मध्ये' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ४० ॥
(मा० ३४।५२)

यद् हिरण्यमलङ्कारम्रूपेण । आवध्नन् आवन्धनं कृतवन्तः । दाक्षायणाः दक्षस्यापत्यं दाक्षायणाः, पुराणेषु प्रसिद्धा आदित्यादयः । यद्धिरण्यमाबध्नन्निति सम्बन्धः । किमर्थमिति ? शतानीकाय शतं शतान्यनीकानि [1]सेना यस्यासौ शतानीकस्तस्मै [2]शतानीकाय एवंरूपफलाय प्रार्थये । सुमनस्यमाना सुमनसोऽहङ्कारायमाणा दाक्षायणा यत आबध्नन्तस्तद्धिरण्यम् । मे मम । शतशारदाय शतं शरदो जीवनायास्मद्देहे[3] आबध्नामि । आयुष्माञ्जरदष्टिः । जरद् जराम् अश्नुत इति जरदष्टिः । [4]यद्वा जरन्ती जरां प्राप्ता अष्टिः शरीरं यस्य सः । आयुष्मान् अहं येन प्रकारेण [5]हिरण्यबन्धनाख्येन । आसं भवेयम् । तथा तदिदमाबध्नामीति सम्बन्धः ॥४०॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात् पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥४१॥
(मा० ३४।५३)

बहुदेवत्या त्रिष्टुप् । ऋपस्तु [6]ऋजीपवः । उत अपि च । नः अस्माकम् । वचांसि । अहिर्बुध्न्यः । पदद्वयमेकीकृत्यैकं नाम भवति । [7]रुद्रविशेषोऽहिर्बुध्न्य इति । अज एकपादि-त्यत्रापि पदद्वयमेकं नाम अजैकपादिति । वचांस्यहिर्बुध्न्यः शृणोतु नः । वचांस्यज एकपाद् देवता शृणोतु । पृथिवीदेवता[8] [9]च वचांसि शृणोतु । समुद्रश्च [10]वचांसि शृणोतु । [10]विश्वेदेवाश्च शृण्वन्तु । किंभूता विश्वेदेवाः ? ऋतावृधः ऋतवृधः सत्यवृधः यज्ञवृधो वा । [11]हुवानाः आहू-यमाना देवा वचांसि शृण्वन्तु । श्रुत्वा च स्तुता मन्त्राः कविशस्ता अवन्तु । मन्त्रा इत्यत्र

---

१ 'सेनाः' नास्ति–ख० । २ 'शतानीकाय' इत्यत्र–"राज्ञो बबन्धुः" इति–श० टि० । ३ 'अस्मद्देहे' नास्ति–ख०, तत्स्थाने–'अन्वारभामहे' इति । ४ 'यद्वा ··· यस्य सः' नास्ति–ख० । ५ 'हिरण्यबन्धनाख्येन' नास्ति–ख० । ६ ऋजिश्वः–सर्वा० । ७ 'रुद्रविशेषः' नास्ति–ख० । ८ 'देवता' नास्ति–ख० । ९ 'च' नास्ति–क-ख० । १० 'विश्वेदेवाश्च ··· विश्वेदेवाः' नास्ति–ख० । ११ 'हुवानाः' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यत्ययः । एवं मन्त्रैः ऋग्भिः स्तुता अहिर्बुध्न्यादयो देवताः । नः मन्त्रैः स्तुताः । [1]यद्वा मेधाविभिः पूजिताः । कविशस्ताश्च कविभिः प्रशस्ताश्च । नः अस्मान् । अवन्तु रक्षन्तु ॥ ४१ ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥ ४२ ॥
(मा० ३४।५४)

आदित्यदेवत्या त्रिष्टुप् । ऋषिः [2]कूर्मः । नः अस्माकम् । या इमाः गिरः वाचः । [3]कथंभूताः ? घृतस्नूः । [4]घृतं स्नुवन्ति प्रस्रवन्ति ता घृतस्नवस्ता घृतस्नूः । तुग्भावश्चार्षः । घृतप्रस्राविणीः । होमार्थं घृतप्रस्रवणवतीर्वाचः । [5]सनात् शब्दश्चिरन्तनकालवचनः [निरु० १२।३६]। सनाद्राजभ्यः चिरराजभ्यः बहुकालप्रवृत्तराजगुणयुक्तेभ्यः[6] आदित्येभ्यो देवताभ्यः । जुह्वाकारेण जुहोमि अभिष्टौमीत्यभिप्रायः । ता वाचः । मित्रः शृणोतु । अर्यमा च भगश्च शृणोतु । नः अस्माकं [7]वाचः । तुविजातो वरुणः । तुविशब्दो बह्वर्थवचनः [निघ० ३।१]। स हि वरुणो बहुशः प्रजायते । दक्षस्तु पुराणेषु प्रसिद्धः । अंशः सूर्यः । इत्येते वाचः शृण्वन्तु । एवं बहुदेवान् यजतेति ॥ ४२ ॥

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥४३॥
(मा० ३४।५५)

'सप्त ऋषयः' इत्यध्यात्मवादिनी जगती । ऋषिरादित्यो याज्ञवल्क्यश्च । [8]सप्त ऋषय इति । सप्त [9]प्राणास्त्वक्चक्षुःश्रवणरसनाघ्राणमनोबुद्धिलक्षणाः, "ऋषयो [10]वाव तेऽग्रेऽसदासीत्तदाहुः[11] के त ऋषय इति प्राणा वा ऋषयः" [शत० ब्रा० ६।१।१।१] इति श्रुतेः । सर्व-

१ 'यद्वा'''पूजिताः' नास्ति–ख० । २ कूर्मो गार्त्समदः–सर्वा० । ३ 'कथंभूताः' इत्यस्याग्रे 'सुप्रज्ञावतः' इत्यधिकम्–ख० । ४ 'घृतं'''तुग्भावश्चार्षः' नास्ति–ख० । ५ सनातन–ख० । ६ 'राजगुणयुक्तेभ्यः' इत्यत्र–"दीप्यमानेभ्यो वा" इति–ग०टि० । ७ वचः–ख० । ८ 'सप्त ऋषय इति' नास्ति–क० । ९ 'त्वक्'''लक्षणाः' नास्ति–ख० । १० 'वाव' इत्यस्य स्थाने 'अथ' इति–क-ख-ग० । ११ 'असदासीत्तदाहुः' इत्यस्य स्थाने 'यदासीत्' इति–क-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहारोपाधिभूतोऽहङ्कारः[1] पञ्चेन्द्रियाणि मनश्चेति सप्त प्राणाः सप्त ऋषयः। शरीरे स्थूलशरीरे सूक्ष्मशरीरे च। प्रतिहिताः श्रीभगवता ईश्वरेण प्रतिहिताः [2]प्रतिष्ठापिता भवन्ति। त एव सप्त ऋषयः शरीरं स्ववृत्तिभी रक्षन्ति। सदमप्रमादम्। छान्दसं पदम्। सदमिति सदा। अप्रमादं प्रमादं यथा न भवति तथाऽप्रमादं स्वयं प्रमादमकुर्वाणा रक्षन्ति। किं च, सप्तापः स्वपतो लोकमीयुः। [3]आपः आप्नुवन्ति व्याप्नुवन्ति देहमित्यापः। व्यापना इत्यर्थः। अप्शब्देनात्र सप्तप्राणानां प्रकृतिभूतानि भूतसूक्ष्माण्यभिधीयन्ते। मनोऽहङ्कारयंश्च द्वे प्रकृती स्त इति सप्ताप इत्युक्तम्। एवं च स्वकार्यसहिताः सप्तापः स्वपतः सुषुप्तिमनुभवतः पुरुषस्य लोकं लोक्यत इति स्वकारणात्मस्वरूपं पुरीतन्नाडीद्वारेण सुषुप्तिस्थानमीयुः। तदापि [4]स्ववृत्तीर्विलाप्य सूक्ष्मरूपेणाभितिष्ठन्त इत्यर्थः। तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ। तत्र तस्यां दशायाम्। अस्वप्नजौ अस्वप्ने स्वप्नादन्यस्यां सुषुप्तौ जायेते प्रादुर्भूते इत्यस्वप्नजे सुषुप्तिकाले स्थितिमन्तौ प्राणापानौ। सत्रसदौ सत्रे कृतावस्थानौ। देवौ प्रकाशहेतुभूतौ। तदानीमपि जागृतः जागरणं कुरुत इति। एवमुक्तेन प्रकारेणाहङ्कारादिव्यतिरिक्तस्तत्साक्षी कूटस्थाधरूपश्चात्मेत्यभिहितं भवति ॥ ४३ ॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ ४४ ॥

(मा० ३४।५६)

[5]'उत्तिष्ठ', 'प्रनूनम्', 'ब्रह्मणस्पते' इति च तिस्रो ब्रह्मणस्पतिदेवत्या ऋचः। आद्ये द्वे बृहत्यौ। तृतीयस्त्रैष्टुभः प्रगाथः। [6]ऋषिर्गृत्समदः। हे ब्रह्मणस्पते, उत्तिष्ठ उत्पतनं कुरुष्व उर्ध्वं तिष्ठ उत्कृष्टभावेनावतिष्ठ [स्व]। यस्मादेवं तस्मात्। देवयन्तः देवान् कामयमाना देवयन्तः। देवयन्तो वयं त्वां ब्रह्मणस्पतिम्। त्वा [7]ईमहे। ईमह इति याच्ञाकर्मसु पठितम् [निघ० ३।१९]। याचामहे। उपप्रयन्तु मरुतः [8]सुदानव इति। कल्याणदाना मरुतः

---

१ संभूतः—क०। २ 'प्रतिष्ठापिताः' नास्ति—ख०। ३ 'आपः····इत्यर्थः' नास्ति—ख०। ४ विश्ववृत्तीः—ख०। ५ 'उत्तिष्ठ' नास्ति—क०। ६ आद्ययोः कण्वो घौरः, अन्त्यस्य च ऋषिर्गृत्समदः—सर्वा०। ७ 'ईमहे' इत्यत्र—"ई [ङ्] गतौ" [११४३ दिवादिः] इति—ग०टि०। ८ 'सुदानवः' इत्यत्र—"शोभनं ददति ते सुदानवः" इति—ग०टि०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम देवाः। उपप्रयन्तु उपगच्छन्तु। हे इन्द्र, प्राशूर्भवा सचा। सह गमनाय [1]प्राशूः दीर्घगामी भव ॥ ४४ ॥

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांꣳसि चक्रिरे ॥ ४५ ॥

(मा० ३४।५७)

अयं ब्रह्मणस्पतिः। उक्थ्यं मन्त्रं नूनं प्रवदति। उक्थः परमात्मा स हीदं सर्वं जगदुत्पादयतीत्युक्थः, तं वक्तुं योग्यो मन्त्र उक्थ्यस्तमुक्थ्यम्। मननं त्रायत इति मन्त्रस्तं मन्त्रम्। प्रवदति उच्चारयति। किं च, यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे। यस्मिन् श्रीभगवति ईश्वरे[2] श्रीभगवदीश्वरस्योदरे विराड्रूपलक्षणे यस्मिन्। इन्द्रो वरुणो मित्रोऽर्यमा चेत्येवमादयो देवाः। ओकांसि स्वनिवासस्थानानि। चक्रिरे कृतवन्तः। अथवा व्यत्ययः। ब्रह्मणस्पत इति मन्त्र इति च। एवं चेदुक्थ्यं ब्रह्मणस्पतिं मन्त्रः प्रवदतीति यस्मिन्निति स एव विशेष्यते। प्राणः पृथिवी यज्ञो वाऽत्र उक्थ्य इत्यभिधीयते। बहुविधश्रुत्यनुसारेण तत्रापि वाक्ययोजना कर्तुं शक्येत्येव ब्रह्मणस्पतिः स्तूयते ॥ ४५ ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः।
य इमा विश्वा विश्वकर्मा यो नः पिताऽन्नपतेऽन्नस्य नो देहि ॥ ४६ ॥

(मा० ३४।५८)

हे ब्रह्मणस्पते, त्वम् अस्य प्रतीयमानस्य स्थावरजङ्गमलक्षणस्य जगतः। यन्ता नियन्ता [3]आज्ञापयिता। सूक्तस्य साधुवचनस्य। तत्त्वमित्यध्याहारः। तत्त्वं बोधि अबोधि बुद्धम्। विज्ञापनार्थं ज्ञात्वा तनयं च जिन्व। जिन्वतिः प्रीतिकर्मा [निघ० ४।३; निरु० ६।२२]। अपत्यानि प्रीणीहि। चशब्दादस्मानपि जिन्व। यद्विश्वं तद्भद्रम्। यद्विश्वं तदिदं भद्रमस्तु

---

१ 'प्राशूः' इत्यत्र—"दीर्घश्छान्दसः" इति—ग० टि०।
२ 'ईश्वरे' इत्यस्याग्रे 'इति' इत्यधिकम्—ग०। ३ 'आज्ञापयिता' नास्ति—क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]मङ्गलात्मकमस्तु । देवाश्च यद् अवन्ति पालयन्ति तत्सर्वं त्वत्प्रसादादेव न स्वतः । अत एव वयं त्वां बृहद् महदर्थयुक्तवचनम् । वदेम ब्रूमः । [2]भवदीयां तां कथामिति । विदथे सुवीराः । विदथे गृहे त्वत्पूजार्थं क्रियमाणे यज्ञे । सुवीराः सुपुत्राः कल्याणरूपसंपन्नाः । अतस्त्वां स्तोष्याम इति शेषः । [3]प्रतीकोक्ताश्चतस्रो ब्रह्मयज्ञादौ ध्येयाः । 'य इमा विश्वा' [१८।१७], 'विश्वकर्मा ह्यजनिष्ट' [१८।३२], 'यो नः पिता जनिता' [१८।२७], 'अन्नपतेऽन्नस्य नो देहि' [१२।८४] इत्येवमादिमन्त्रगणैः श्रीभगवान् ब्रह्मा प्रजापतिः स्तूयत इति ॥ ४६ ॥

इति [4]श्रीशुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे त्रयस्त्रिंशोऽध्यायः[5] ॥ ३३ ॥

---

१ मङ्गलमस्तु—क० । २ भवदीयतां कथमिति ?—क-ख-ग० ।

३ 'प्रतीको.... ध्येयाः' नास्ति—ख०, तत्स्थाने—'य इमा विश्वा विश्वकर्मा यो नः पितान्नपतेऽन्नस्य नो देहीति प्रतीकोक्ताः' इति ।

४ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ख-ग० ।

५ 'अयमध्यायः संपूर्णो ब्रह्मयज्ञार्थकः' इत्यधिकम्—ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुस्त्रिंशोऽध्यायः

'देव सवितः' [३४।१], 'सहस्रशीर्षा' [३५।१] इति च द्वावध्यायौ पुरुषमेधविषयौ श्रीनारायणः पुरुषो ददर्श, अतो नारायणस्यार्षं द्वयोरध्याययोः । "पुरुषो ह नारायणोऽकामयतातितिष्ठेयꣳ सर्वाणि भूतान्यहमेवेदꣳ सर्वꣳ स्यामिति । स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्तमाहरत्तेनायजत तेनेष्ट्वाऽत्यतिष्ठत्सर्वाणि भूतानीदꣳ सर्वमभवदतितिष्ठति सर्वाणि भूतानीदꣳ सर्वं भवति य एवं विद्वान्पुरुषमेधेन यजते यो वैतदेवं वेद ॥ १ ॥ तस्य त्रयोविꣳशतिर्दीक्षा द्वादशोपसदः पञ्च सुत्याः [1]स एष चत्वारिꣳशद्रात्रः सदीक्षोपसत्कश्चत्वारिꣳशदक्षरा विराट् तद्विराजमभिसंपद्यते" [शत० ब्रा० १३।६।१।१-२] इत्यारभ्याह[र्] नियममभिधाय—"ता वा एताश्चतस्रो [2]दशतो भवन्ति, तद्यदेताश्चतस्रो दशतो भवन्त्येषां चैव लोकानामाप्त्यै दिशां च । इममेव लोकं प्रथमया दशताप्नुवन्नन्तरिक्षं द्वितीयया दिवं तृतीयया दिशश्चतुर्थ्या, तथैवैतद्यजमान इममेव लोकं प्रथमया दशताप्नोत्यन्तरिक्षं द्वितीयया दिवं तृतीयया दिशश्चतुर्थ्या । एतावद्वा इदम्" [शत० ब्रा० १३।६।१।३] इत्येतेषां च [3]फलप्राप्तिमप्यभिधायानन्तरम्—"एकादशाग्नीषोमीयाः पशव उपवसथे । तेषाꣳ समानं कर्मैकादश यूपा एकादशाक्षरा" [शत० ब्रा० १३।६।१।४] इति, "ऐकादशिनाः सुत्यासु पशवो भवन्ति" [शत० ब्रा० १३।६।१।५][इति], "यद्वेवैकादशिना भवन्त्येकादशिनी वा इदम्" [शत० ब्रा० १३।६।१।६] इति [च] पशूनां विधानेनाभिधानं विनियोगादींश्च विस्तरेणाभिधायानन्तरम्—"नियुक्तान् पुरुषान् ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति 'सहस्रशीर्षा पुरुषः' [३५।१]" [शत० ब्रा० १३।६।२।१२] इत्यादिनाऽभिष्टूय ततः—"पर्यग्निकृताः पशवो बभूवुरसंज्ञप्ताः ॥ अथ हैनं वागभ्युवाद पुरुष मा सन्तिष्ठिपो यदि सꣳस्थापयिष्यसि पुरुष एव पुरुषमत्स्यतीति तान्पर्यग्निकृतानेवोदसृजत्तद्देवत्या आहुतीरजुहोत्ताभिस्ता देवता अप्रीणात्ता एनं प्रीता अप्रीणन् सर्वैः कामैः ॥ आज्येन जुहोति" [शत० ब्रा० १३।६।२।१२-१४] इति च सुविस्तरतः पुरुषमेधः स्तूयते । तद्विषयावेतौ द्वावध्यायौ । तथा च सूत्रम्—"पुरुषमेधस्त्रयोविंशतिदीक्षः [4]प्रतिष्ठाकामस्य ब्राह्मणराजन्ययोरग्निष्टोमावन्तरेणातिरात्र

---

१ य एष—क-ख-ग० ।

२ 'दशतो''''भवन्त्येषाम्' इत्यस्य स्थाने 'दशतश्चतुर्द्धा विभज्येष्ट्वा' इति पाठः—क-ख-ग० ।

३ फलप्राप्तिरपि—क-ख-ग० ।

४ अतिष्ठाकामस्य—का० श्रौ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]उक्थपक्षो यूपैकादशिनी भवति तावन्तोऽग्निष्ठोमीयाः पशूनुपाकरिष्यन्नतिरात्रेण[२] 'देव सवितः' [३४।१] इति प्रत्यृचं तिस्रो जुहोत्येकादशिनानुपाकृत्य[३] ब्राह्मणादींश्च नियोजनकालेऽष्टाचत्वारिंशतमाद्यानग्निष्ठ इतरेष्वेकादशैकादशद्वितीयोच्छ्रिते शेषान्नियुक्तान् ब्रह्माभिष्टौति होतृकादनुवाकेन। 'सहस्रशीर्षा' [३५।१] इति कपिञ्जलादिवदुत्सृजन्ति ब्राह्मणादीन् स्विष्टकृद्वनस्पत्यन्तरे पुरुषदेवताभ्यो जुहोति सपुरुषमश्वमेधवद्दक्षिणा सर्वस्वं ब्राह्मणस्य प्रतिदेवतं तिस्रस्तिस्रोऽनुबन्ध्याः पञ्चोत्तमायां त्रैधातव्यन्ते समारोह्यात्मन्नग्नीसूर्यमुपस्थाय 'अद्भ्यः संभृतः' [३५।१७] इत्यनुवाकेनानपेक्षमाणोऽरण्यं गत्वा [४]न प्रत्येयाद् ग्रामे वा विवत्सन्नरण्योः" [का० श्रौ० २१।१] इतीममर्थं ब्रवीति।

अथ 'देव सवितः' [३४।१], 'तत्सवितुर्वरेण्यम्' [३४।२], 'विश्वानि देव सवितः' [३४।३] इति सवितारं प्रीणाति। 'तत्सवितुर्वरेण्यम्' [३४।२], 'विश्वानि देव सवितः' [३४।३] इति च सावित्र्यौ गायत्र्यौ। श्यावाश्वो नाम ऋषिराद्यन्त्ययोर्मध्यमायास्तु विश्वामित्रः।

[५]देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥१॥

[६]देव सवितः, प्रसुव। यज्ञं प्रसुव अनुजानीहि। यज्ञपतिं चानुजानीहि। [७]भगाय भाग्यसंपत्त्यादिभ्यः। दिवि भवो दिव्यः। गन्धर्वः सूर्यः। केतपूः बुद्धिशोधकः। केतं नः अस्माकं केतं प्रज्ञानम्। पुनातु। वाचस्पतिर्वाचं नः अस्माकं वाचम्। स्वदतु आस्वादयतु ॥१॥

[८]तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात् ॥ २॥

व्याख्यातो मन्त्रः [३।४३] ॥ २ ॥

---

१ उक्थ्यपृष्ठौ–क-ख-ग०।
२ अतिरात्रे–क-ख-ग०।
३ एकादशिनीमुपाकृत्य–क-ख-ग०।
४ 'न प्रत्येयाद्' इत्यस्य स्थाने 'अप्रत्यथात्'–क-ख-ग०।
५ (मा० ३०।१)।
६ 'देव सवितः'''प्रसुव' नास्ति–क०।
७ 'भगाय' नास्ति–ख०।
८ (मा० ३०।२)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑सुव ।
य॒द्भ॒द्रं त॒न्न॒ आ सु॑व ॥ ३ ॥

हे श्रीभगवन्सवितः, नः अस्माकम् । विश्वानि सर्वाणि । दुरितानि आगतान्यागम्यमानानि वा दुःखकारणानि । परासुव पराङ्मुखानि गमय । निवर्तयेत्यर्थः । यद्भद्रं भन्दनीयं कल्याणं तत् । नः अस्माकम् । आसुव आगमय आप्रापय ॥ ३ ॥

[2]वि॒भ॒क्तार॑ꣳ हवामहे॒ वसो॑श्चि॒त्रस्य॒ राध॑सः ।
स॒वि॒तार॑ꣳ नृ॒चक्ष॑सम् ॥ ४ ॥

सवितृदेवत्या गायत्री । ऋषिर्मेधातिथिः । विभक्तारं वसोः [3]वासयितुर्वसतिहेतुभूतस्य । चित्रस्य विचित्रस्य चायनीयस्य । राधसः धनस्य आयुषश्च । विभक्तारं विभागस्य कर्तारम्, कर्मानुरूपतया कर्तारम्, अस्य कर्मण एतावदेव फलमिति फलपरिणामस्य कर्तारम् । नृचक्षसं नृणामन्तर्यामित्वेन सदा ज्ञातारम् । सवितारं सर्वप्राणिनां प्रतिप्रसवकर्तारम् । हवामहे आह्वयामः ॥ ४ ॥

इत उत्तरं [4]पौरुषमेधिकाः पशवो देवतासम्बन्धाः स्तूयन्ते । "सोऽस्मै [5]प्रीत एतान् पुरुषान् [6]प्रसौति तेन प्रसूतानालभते" [शत० ब्रा० १३।६।२।६]—

[7]ब्रह्म॑णे ब्राह्म॒णं क्ष॒त्राय॑ राज॒न्यं॑ म॒रुद्भ्यो॒ वैश्यं॒ तप॑से शू॒द्रं तम॑से॒ तस्क॑रं नार॒काय॑ वीर॒हणं॑ म् । पा॒प्मने॑ क्ली॒बमा॑क्र॒याया॑ अयो॒गूं कामा॑य पुꣳश्च॒लूमति॑क्रुष्टाय माग॒धम् ॥ ५ ॥

एते पशवो निगमनिरुक्तव्याकरणनिघण्टविशेषैरवगन्तव्याः । [8]"अथ यस्मात्पुरुषमेधो नाम । इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषस्तस्य यदेषु

---

१ (मा० ३०।३) ।
२ (मा० ३०।४) ।
३ सवितुः—ख० ।
४ पुरुषमेधिकाः—क-ग० ।
५ प्रीतये तान्—क-ख-ग० ।
६ स्तौति—क-ग०, प्रस्तौति—ख० ।
७ (मा० ३०।५) ।
८ अतस्तस्माद्—क-ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकेष्वन्नं तदस्यान्नं मेधस्तद्यदस्यैतदन्नं मेधस्तस्मात्पुरुषमेधोऽथो यदस्मिन् मेध्यान्पुरुषानालभते। [शत० ब्रा० १३।६।२।१]......"पुरुषमेधस्यैवाप्त्यै" [शत० ब्रा० १३।७।१।८] इत्यादिना पुरुषशब्दार्थनिर्वचनपूर्वकं तस्योचितान्पशूनाह। तत्र–[1]"तान् वै मध्यमेऽहन्नालभते" [शत० ब्रा० १३।६।२।२] इत्युपक्रम्य "अष्टाचत्वारिꣳशतं मध्यमे यूप आलभते" [शत० ब्रा० १३।६।२।५] इति, "एकादशैकादशेतरेषु" [शत० ब्रा० १३।६।२।६], "अष्टा उत्तमानालभते" [शत० ब्रा० १३।६।२।७] इत्याह पुरुषान् पशून्। अत्र पदान्वयमात्रं प्रदर्श्यते।

[2]ब्रह्मणे ब्राह्मणमिति ब्रह्मदेवत्या [3]अष्टिः। अस्याध्यायस्य पुरुषो नारायण ऋषिः, प्रतिमन्त्रं स एव। ब्रह्मणे देवतायै ब्राह्मणं पशुमालभते। क्षत्राय देवतायै राजन्यं पशुमालभते। मरुद्भ्यो देवताभ्यो वैश्यं पशुमालभते। तपसे देवतायै शूद्रं पशुमालभते। तमसे देवतायै तस्करं पशुमालभते। नारकाय देवतायै वीरहणं पशुमालभते। पाप्मने देवतायै क्लीबं पशुमालभते। आक्रयायै देवताया अयोगूम् अयसो गन्तारं पशुमालभते। कामाय देवतायै पुंश्चलूं पशुमालभते। अतिक्रुष्टाय देवतायै मागधं पशुमालभते ॥ ५ ॥

[4]नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलम्। नर्माय रेभꣳ हसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ॥ ६ ॥

अतिशक्वरी लिङ्गोक्तदेवत्या। नृत्ताय देवतायै सूतं ब्राह्मण्यां क्षत्रियाज्जातः सूतस्तं सूतं पशुम्। गीताय देवतायै शैलूषं नृत्यशिक्षाकारकं पशुमालभते। धर्माय देवतायै सभाचरं सभायां चरतीति तं पशुम्। नरिष्ठायै देवतायै भीमलं भयङ्करं पशुमालभते। नर्माय देवतायै रेभं पशुम्। हसाय देवतायै कारिं करणविशिष्टं पशुम्। आनन्दाय देवतायै स्त्रीषखं पशुम्। प्रमदे देवतायै कुमारीपुत्रम्। मेधायै रथकारं पशुम्। धैर्याय देवतायै तक्षाणं वर्धकिं पशुमालभते ॥ ६ ॥

---

१ "तन्मध्यमे यूपमालभते" [शत० ब्रा० १३।२।२।२] इति–क-ख-ग०।
२ 'ब्रह्मणे ब्राह्मणम्' [३४।५] इति द्वे कण्डिके तपसेऽनुवाकश्च ब्राह्मणम्'' इति–ग० टि०।
३ आष्टिः—ख०।
४ (मा० ३०।६)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]तपसे कौलालं मायायै कर्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्याया इषुकारꣳ हेत्यै धनुष्कारम्। कर्मणे ज्याकारं दिष्टाय रज्जुसर्जं मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥ ७ ॥

लिङ्गोक्तदेवत्या। तपसे देवतायै कौलालं कुलालापत्यं पशुमालभते। मायायै देवतायै कर्मारं कर्मकरणदक्षं पशुम्। रूपाय देवतायै मणिकारम्। शुभे शुभाय देवतायै वपं पशुम्। शरव्यायै देवताया इषुकारं पशुम्। हेत्यै [2]देवतायै धनुष्कारं पशुम्। कर्मणे देवतायै ज्याकारं [3]ज्यायाः कर्तारं पशुम्। दिष्टाय देवतायै रज्जुसर्जं रज्जुकर्तारं [4]पशुम्। मृत्यवे देवतायै मृगयुं मृगग्राहकं पशुम्। अन्तकाय देवतायै श्वनिनं श्वानवन्तं पशुमालभते[5] ॥ ७ ॥

[6]नदीभ्यः पौञ्जिष्टमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यम्। प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यताया अकितवं पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ८ ॥

शाक्वरः प्रगाथो लिङ्गोक्तदेवत्यः। नदीभ्यो देवताभ्यः पौञ्जिष्टं पुञ्जिष्टस्यापत्यं पशुमालभते। ऋक्षीकाभ्यो देवताभ्यो नैषादं निषादापत्यं पशुम्। पुरुषव्याघ्राय देवतायै दुर्मदं पशुम्। गन्धर्वाप्सरोभ्यो देवताभ्यो व्रात्यं सावित्रीपतितं पशुम्। प्रयुग्भ्यो देवताभ्य उन्मत्तं पशुम्। सर्पदेवजनेभ्यो देवताभ्योऽप्रतिपद्वं प्रतिपदर्हितं पशुम्। अयेभ्यो देवताभ्यः कितवं द्यूतकारं पशुम्। ईर्यतायै देवताया अकितवं पशुम्। पिशाचेभ्यो देवताभ्यो विदलकारीं पशुम्। यातुधानेभ्यो देवताभ्यः कण्टकीकारीं पशुमालभते ॥ ८ ॥

[7]संधये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराध्या

---

१ (मा० ३०।७)।
२ 'देवतायै' नास्ति–ख·ग०।
३, 'ज्यायाः कर्तारम्' नास्ति–क·ग०।
४ 'पशुम्' नास्ति–क·ग०।
५ 'आलभते' नास्ति–ख·ग०।
६ (मा· ३०।८)।
७ (मा० ३०।९)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एदिधिषुःपतिं निष्कृत्यै पेशस्कारीᳬं संज्ञानाय स्मरकारीम्। प्रकामोद्यायोपसदं वर्णायानुरुधं बलायोपदाम् ॥ ९ ॥

त्रैष्टुभः प्रगाथो बहुदेवत्यः। संधये देवतायै जारं पशुमालभते। गेहाय देवताया उपपतिं जारं पशुमालभते। आर्त्यै देवतायै परिवित्तं परिवेदनस्य कर्तारं पशुम्। निर्ऋत्यै देवतायै परिविविदानं परिवेदनं कुर्वाणं पशुम्। अराध्यै देवताया एदिधिषुःपतिं [1]पशुम्। निष्कृत्यै देवतायै पेशस्कारीं पशुं [2]कोशकारीं पशुम्। संज्ञानाय देवतायै स्मरकारीं कामकारिणीम्। प्रकामोद्याय देवताया उपसदं पशुम्। वर्णाय देवताया अनुरुधं पशुम्। बलाय देवताया उपदाम् उपददातीत्युपदामालभते ॥ ९ ॥

[3]उत्सादेभ्यः कुब्जं प्रमुदे वामनं द्वार्भ्यः स्रामᳬं स्वप्नायान्धमधर्माय बधिरं पवित्राय भिषजम्। प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया अभिप्रश्निनं मर्यादायै प्रश्नविवाकम् ॥ १० ॥

बहुदेवत्याऽत्यष्टिः। उत्सादेभ्यो देवताभ्यः कुब्जमतिह्रस्वं पशुमालभते[4]। [5]प्रमुदे देवतायै वामनं पशुम्। द्वार्भ्यः स्रामं पशुम्। स्वप्नाय देवताया अन्धं पशुम्। अधर्माय देवतायै बधिरं पशुम्। पवित्राय देवतायै भिषजं वैद्यं पशुम्। प्रज्ञानाय देवतायै नक्षत्रदर्शं नक्षत्राणि दर्शयतीति नक्षत्रदर्शस्तं पशुम्। आशिक्षायै देवतायै प्रश्निनं [6]प्रश्नवन्तं पशुम्। उपशिक्षायै देवताया अभिप्रश्निनं पशुम्। मर्यादायै देवतायै प्रश्नविवाकं [7]प्रश्नविवेचनं पशुमालभते ॥ १० ॥

[8]अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालᳬं वीर्यायाविपालं तेजसेऽजपाल-

---

१ 'पशुम्' नास्ति–क-ग०।
२ 'कोशकारीं पशुम्' नास्ति–ख०।
३ (मा० ३०।१०)।
४ 'आलभते' नास्ति–क-ग०।
५ प्रमदे–क-ख-ग०।
६ 'पशुं प्रश्नवन्तम्' इति विपर्यस्तः पाठः–क-ग०।
७ प्रश्नविवेचकम्–ख०।
८ (मा० ३०।११)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिरायै कीनाशम्। कीलालाय सुराकारं भद्राय गृहपꣳ श्रेयसे वित्तधमाध्यक्षाया-
नुक्षत्तारम् ॥ ११ ॥

अनुष्टुप् प्रगाथो बहुदेवत्यः। अर्मेभ्यो देवताभ्यो हस्तिपं [1]गजपालं पशुमालभते। जवाय देवताया अश्वपम् [2]अश्वपालं पशुम्। पुष्ट्यै देवतायै [3]गोपालं पशुमालभते[4]। वीर्याय देवताया अविपालं पशुम्। तेजसे देवताया अजपालं पशुम्। इरायै देवतायै कीनाशमिति तं पशुम्। कीलालाय देवतायै सुराकारं पशुम्। भद्राय देवतायै गृहपं [5]गृहपालकं पशुम्। श्रेयसे देवतायै वित्तधं वित्तानि निधीयन्ते येन स वित्तधस्तं वित्तधं पशुम्। आध्यक्षाय देवताया अनुक्षत्तारं पशुमालभते ॥ ११ ॥

[6]भार्यै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय
नाकाय परिवेष्टारम्। देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो
लोकेभ्य उपसेक्तारमवऋत्यै वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय
रजयित्रीम् ॥ १२ ।

बृहतीशक्वर्यौ यत्र मीलिते भवतः स बार्हतः प्रगाथो बहुदेवत्यः। भार्यै देवतायै दार्वाहारं दृढाकारं पशुम्। प्रभायै देवताया अग्न्येधम् अग्न्यभिवर्धकं पशुम्। ब्रध्नस्य विष्टपाय देवताया अभिषेक्तारम् अभिषेकस्य कर्तारं पशुम्। वर्षिष्ठाय देवतायै [7]नाकाय देवतायै परिवेष्टारं परिवेषणस्य कर्तारं पशुम्। देवलोकाय देवतायै पेशितारम् अवयवानां कर्तारं पशुम्। मनुष्यलोकाय देवतायै प्रकरितारं प्रकरस्य कर्तारं पशुम्। सर्वेभ्यो लोकेभ्यो देवताभ्य उपसेक्तारम् उपसेचनस्य कर्तारं पशुम्। अवऋत्यै देवतायै वधाय देवताया उपमन्थितारं पशुम्। मेधाय देवतायै वासःपल्पूलीं वाससा पल्पूलनकारिणं पशुम्। प्रकामाय देवतायै रजयित्रीं रञ्जनकारिणं पशुमालभते ॥ १२ ॥

---

१ गजपालकम्—ख-ग०।
२ अश्वपालकम्—ख-ग०।
३ गोपालकम्—ख०।
४ 'आलभते' नास्ति—क-ग०।
५ 'गृहपालकम्' नास्ति—क-ग०।
६ (मा० ३०।१२)।
७ 'नाकाय देवतायै' नास्ति—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारं बलायानुचरं भूम्ने परिष्कन्दम । प्रियाय प्रियवादिनमरिष्ट्या अश्वसादꣳ स्वर्गाय लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥ १३ ॥

त्रिष्टुब्बृहत्यौ यत्र मीलिते स त्रैष्टुभः प्रगाथो बहुदेवत्यः । ऋतये [२]देवतायै स्तेनहृदयं पशुम् । वैरहत्याय देवतायै पिशुनं [३]परवृत्तसूचकं पशुम् । विविक्त्यै देवतायै क्षत्तारं पशुम् । औपद्रष्ट्र्याय देवताया अनुक्षत्तारं पशुम् । बलाय देवताया अनुचरं पुरुषं पशुम् । भूम्ने देवतायै परिष्कन्दं परितः स्कन्दयतीति परिष्कन्दस्तं परिष्कन्दं पशुम् । प्रियाय देवतायै प्रियवादिनं पशुम् । अरिष्ट्यै देवताया अश्वसादम् [४]अश्वनोदकं पशुम् । स्वर्गाय लोकाय देवतायै भागदुघं भागस्य दोहकं पशुम् । वर्षिष्ठाय नाकाय देवतायै परिवेष्टारमालभते ॥१३॥

[५]मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारꣳ शोकायाभिसर्तारं क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनम् । वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीं निर्ऋत्यै कोशकारीं यमायासूम् ॥ १४ ॥

त्रिष्टुबुष्णिहौ यत्र मीलिते भवतः सोऽयं त्रैष्टुभः प्रगाथो बहुदेवत्यः । मन्यवे देवताया अयस्तापम् अयस्तापकरं पशुम् । क्रोधाय देवतायै निसरं नितरां सर्तारं पशुम् । योगाय देवतायै योक्तारं योगस्य कर्तारं [६]पशुम् । शोकाय देवताया अभिसर्तारं पशुम् । क्षेमाय देवतायै विमोक्तारं पशुम् । उत्कूलनिकूलेभ्यो देवताभ्यस्त्रिष्ठिनं त्रिषु स्थानं शीलयते तं पशुम् । वपुषे देवतायै मानस्कृतं मानःकृतं पूजाया अभिमानस्य [७]वा कर्तारम् । शीलाय देवताया आञ्जनी-कारीम् अञ्जनस्य कर्तारं पशुम् । निर्ऋत्यै देवतायै कोशकारीं पशुम् । यमाय देवतायै [८]असूं भिक्षुकं पशुमालभते ॥ १४ ॥

---

१ (मा० ३०।१३) ।
२ 'देवतायै' नास्ति—ख० ।
३ 'पशुं परवृत्तसूचकम्' इति विपर्यस्तः पाठः—क-ग० ।
४ अश्वतोदकम्—क० ।
५ (मा० ३०।१४) ।
६ 'पशुम्' नास्ति—ख-ग० ।
७ 'वा' नास्ति—ख० ।
८ असुम्—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]यमाय यमसूमथर्वभ्योऽवतोकाᳬं संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीम्। वत्सराय विजर्जराᳬं संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्धᳬं साध्येभ्यश्चर्मम्नम् ॥ १५ ॥

यत्र जगत्युष्णिहौ संमीलितौ स्तः स जागतः प्रगाथो नानादेवत्यः। यमाय देवतायै यमसूं यमलप्रसवां पशुमालभते[2]। अथर्वभ्यो देवताभ्योऽवतोकां निकृष्टप्रजां पशुम्। संवत्सराय देवतायै पर्यायिणीं परिगमनशीलं पशुम्। परिवत्सराय देवताया अविजातां पशुम्। इदावत्सराय देवताया अतीत्वरीम् अतित्वरणशीलं पशुम्। इद्वत्सराय देवताया अतिष्कद्वरीं पशुम्। वत्सराय देवतायै विजर्जरां विजर्जरस्वभावाम्। संवत्सराय देवतायै पलिक्नीं बालगर्भिणीं [3]पशुम्। ऋभुभ्यो देवताभ्योऽजिनसन्धम् अजिनस्थानवन्तं पशुम्। साध्येभ्यो देवताभ्यश्चर्मम्नं चर्मवन्तं पशुमालभते ॥ १५ ॥

[4]सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलम्। पाराय मार्गारमवाराय केवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालम्। स्वनेभ्यः पर्णकं गुहाभ्यः किरातᳬं सानुभ्यो जम्भकं पर्वतेभ्यः किंपूरुषम् ॥ १६ ॥

अतिजागतः प्रगाथो बहुदेवत्यः। सरोभ्यो देवताभ्यो धैवरं [5]धीवरस्यापत्यं धैवरं पशुमालभते। उपस्थावराभ्यो देवताभ्यो दाशं कैवर्तं पशुम्। वैशन्ताभ्यो देवताभ्यो बैन्दं बिन्दोरपत्यं पशुम्। नड्वलाभ्यो देवताभ्यः शौष्कलं पशुम्। पाराय देवतायै मार्गारं पशुम्। अवाराय देवतायै केवर्तं कैवर्तस्य पितरं पशुम्। तीर्थेभ्यो देवताभ्य आन्दं पशुम्। विषमेभ्यो देवताभ्यो मैनालं पशुम्। स्वनेभ्यो देवताभ्यः पर्णकं पशुम्। गुहाभ्यो देवताभ्यः किरातं पशुम्। सानुभ्यो देवताभ्यो जम्भकं पशुमालभते[6]। पर्वतेभ्यो देवताभ्यः किंपूरुषं [7]पशुमालभते ॥१६॥

---

१ (मा० ३०।१५)।
२ 'आलभते' नास्ति—क०।
३ 'पशुम्' नास्ति—ख-ग०।
४ (मा० ३०।१६)।
५ धैवरस्यापत्यम्—क-ग०।
६ 'आलभते' नास्ति—क०।
७ 'पशुम्' नास्ति—क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोषाय ग्लाविनं विश्वेभ्यो भूतेभ्यः सिध्मलम् । भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्ध्या अपगल्भꣳ सꣳशराय प्रच्छिदम् ॥१७॥

बार्हतः प्रगाथो नानादेवत्यः । बीभत्सायै देवतायै पौल्कसं पशुमालभते[2] । वर्णाय देवतायै [3]हिरण्यकारं पशुम् । तुलायै देवतायै वाणिजं वणिजोपत्यम् । पश्चादोषाय देवतायै ग्लाविनं पशुम् । विश्वेभ्यो भूतेभ्यो देवताभ्यः सिध्मलं पशुमालभते । भूत्यै देवतायै जागरणं जागरणवन्तम् । अभूत्यै देवतायै स्वपनं स्वपनवन्तं पशुम् । आर्त्यै देवतायै जनवादिनं पशुम् । व्यृद्धयै देवताया अपगल्भं पशुम् । संशराय देवतायै प्रच्छिदं पशुमालभते[4] ॥ १७ ॥

[5]अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातम् । क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥ १८ ॥

[6]जागतः प्रगाथो नानादेवत्यः । अक्षराजाय देवतायै कितवं पशुम् । कृताय देवताया [7]आदिनवदर्शं पशुम् । त्रेतायै देवतायै कल्पिनं पशुम् । द्वापराय देवताया अधिकल्पिनं पशुम् । आस्कन्दाय देवतायै सभास्थाणुम् । मृत्यवे गोव्यच्छं पशुम् । अन्तकाय देवतायै गोघातं गोघातकं पशुम् । [8]क्षुधे देवतायै [9]यो गां भिक्षमाणो याचमानो विकृन्तन्तं छेदनं कुर्वाणं पशुं पुरुषमुपतिष्ठत्युपस्थानं करोति स्वयं [10]बुभुक्षितस्तं [11]क्षुधे देवतायै । दुष्कृताय चरकाचार्यं पशुम् । पाप्मने देवतायै सैलगं [12]पशुं सैलगापत्यं पशुमालभते ॥ १८ ॥

---

१ (मा० ३०।१७) ।
२ 'आलभते' नास्ति—क० ।
३ 'हिरण्यकारं····पश्चादोषाय देवतायै' नास्ति—क० ।
४ 'आलभते' नास्ति—ख-ग० ।
५ (मा० ३०।१८)
६ 'जागतः प्रगाथो नानादेवत्यः' नास्ति—ख० ।
७ आदीनवदर्शनम्—ख० ।
८ क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति यः पुमान् गां विकृन्तन्तं छिन्दन्तम् । भिक्षमाणो याचमान उपतिष्ठते तं याचितारं क्षुधे देव्यै आलभेत—मही० ।
९ यो गां तम्—क-ख० ।
१० बुभुक्षितस्ततस्तस्यै—क-ग० ।
११ 'क्षुधे देवतायै' नास्ति—ख० ।
१२ 'पशुम्' नास्ति—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]प्रतिश्रुत्काया अर्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्बराघातम् । महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्यतोऽरण्याय दावपम् ॥ १९ ॥

बार्हतः प्रगाथो नानादेवत्यः । प्रतिश्रुत्कायै देवताया अर्तनं पशुमालभते[2] । घोषाय देवतायै भषं पशुम् । अन्ताय देवतायै बहुवादिनं पशुम् । अनन्ताय देवतायै मूकं पशुम् । शब्दाय देवताया आडम्बराघातं पशुम् । महसे देवतायै वीणावादं पशुम् । क्रोशाय देवतायै तूणवध्मं पशुम् । अवरस्पराय देवतायै शङ्खध्मं पशुम् । वनाय देवतायै वनपं पशुम् । अन्यतोऽरण्याय देवतायै दावपं पशुमालभते ॥ १९ ॥

[3]नर्माय पुꣳश्चलूꣳ हसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे । वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥ २० ॥

अतिजगती नानादेवत्या । नर्माय देवतायै पुंश्चलूं पशुम् । हसाय देवतायै कारिं करणशीलं पशुम् । यादसे देवतायै शाबल्यां [4]च ग्रामण्यं च गणकं [5]चाभिक्रोशकं [6]चेति तानेतान् पशूनालभते । महसे देवतायै वीणावादं पशुं पाणिघ्नं तूणवध्ममिति [7]च तानेतान् पशूनालभते । नृत्ताय [8]देवताया आनन्दाय देवतायै तलवं पशुमालभते ॥ २० ॥

[9]अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वꣳशनर्तिनं दिवे खलतिꣳ सूर्याय हर्यक्षम् । नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमह्ने शुक्लं पिङ्गाक्षꣳ रात्र्यै कृष्णं पिङ्गाक्षम् ॥ २१ ॥

---

१ (मा० ३०।१९) ।
२ 'आलभते' नास्ति–क० ।
३ (मा० ३०।२०) ।
४ 'च' नास्ति–ख० ।
५ 'चाभिक्रोशकम्' नास्ति–ख०, 'च' नास्ति–ग० ।
६ 'च' नास्ति–ख-ग० ।
७ 'च' नास्ति–ख० ।
८ 'देवतायै' नास्ति–क० ।
९ (मा० ३०।२१)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रैष्टुभः प्रगाथो नानादेवत्यः। अग्नये देवतायै पीवानं पशुमालभते[1]। पृथिव्यै [2]देवतायै पीठसर्पिणं पशुमालभते[3]। वायवे देवतायै चाण्डालं चण्डालकर्माणम्। अन्तरिक्षाय देवतायै वंशनर्तिनं वंशेन महता नर्तनशीलं [4]वंशे नृत्यकारिणम्। दिवे देवतायै खलतिम्। सूर्याय देवतायै हर्यक्षं हरिताक्षं पशुम्। नक्षत्रेभ्यो [5]देवताभ्यः किर्मिरं किर्मिरवर्णकं पशुम्। चन्द्रमसे देवतायै किलासं पशुम्। अह्ने देवतायै शुक्लं पिङ्गाक्षं पशुम्। रात्र्यै देवतायै कृष्णं पिङ्गाक्षं पशुमालभते ॥ २१ ॥

[6]अथैतानष्टौ विरूपानालभतेऽतिशुक्लं चातिकृष्णं चातिदीर्घं चातिह्रस्वं च। अतिस्थूलं चातिकृशं चातिकुल्वं चातिलोमशं चाशूद्रा अब्राह्मणास्ते प्राजापत्याः। मागधः पुंश्चली क्लीबः कितवोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥

[7]सप्तत्युत्तरशतं पशवश्चेति [?] द्विपदपशवः पुरुषमेधे नियुक्ताः। अथेदानीं तिर्यक्पशूनुत्तमान् विरूपानजाख्यानष्टावाह। [8]अथैतानित्यतिशाक्करः प्रगाथो नानादेवत्यः। अथ द्विपादपश्वालम्भनानन्तरम्। एतान् अष्टौ विरूपान् विपरीतरूपान् पशूनालभते। अतिशुक्लम् अतिशुक्लवर्णमजम्। अतिकृष्णम् अतिकृष्णवर्णमजम्। अतिदीर्घमजम्। अतिह्रस्वमजम्। तिस्थूलमजम्। अतिकृशमजम्। अतिकुल्वमजम्। अतिलोमशमजम्। अशूद्राः शूद्रव्यतिरिक्ताः। अब्राह्मणाः ब्राह्मणव्यतिरिक्ताः। एते पशवस्त्वशूद्रा अब्राह्मणा इत्युक्ताः। पूर्वोक्ताः पशवो ब्राह्मणक्षत्रियवैश्यशूद्रात्मका इत्युक्ता भवन्ति। ते प्राजापत्याः सामान्येन प्रजापतिसम्बन्धिनः। मागधः पुंश्चली क्लीबः कितव एते चत्वारोऽप्यशूद्रा अब्राह्मणाश्च न [?] भवन्ति, किन्तु प्राजापत्याः ॥ २२ ॥

इति [9]शुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

---

१ 'आलभते' नास्ति—क०।
२ 'देवतायै' नास्ति—क०।
३ 'आलभते' नास्ति—क०।
४ 'वंशे नृत्यकारिणम्' नास्ति—ख०।
५ 'देवताभ्यः' नास्ति—क०।
६ (मा० ३०।२२)।
७ सप्तत्युत्तरपशवश्चेति—ख०।
८ अथैतानिति शक्करः—ख०।
९ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ख०, काण्ववेदभाष्ये—ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चत्रिंशोऽध्यायः

[1]सहस्रशीर्षेति । [2]ब्रह्मवैवर्तोक्तविधानेन न्यासादिकं कथ्यते—[3]"स्वाङ्गे देवे सविन्यासाः षोडशैवोपकारकाः । होमः पुष्पाञ्जलिर्जप्यं षडावृत्तिरिमे क्रमात् ॥ १ ॥ कर्मणोऽर्द्धं हरेद्दैत्यो विना न्यासं कृतस्य च । तेनान्यथा न कर्तव्यं पूजाहोमजपादिकम् ॥ २ ॥ वामदक्षकरे पाद-जानुष्वपि कटिद्वये । नाभौ हृत्कण्ठबाह्वोश्च वक्त्रे चाक्ष्णोश्च मूर्द्धनि ॥ ३ ॥ स्वाङ्गे देवस्य चाप्येवं विन्यसेत् षोडशैः क्रमात् । आद्ययाऽऽवाहनं कुर्यादासनं तु द्वितीयया ॥ ४ ॥ पाद्यं तृतीयया चार्घ्यं दद्यात्तस्मै तुरीयया । पञ्चम्याऽऽचमनीयं च स्नानं षष्ठ्याथ वाससी ॥ ५ ॥ सप्तम्या चोपवीतं स्यादष्टम्या च पितामह । गन्धं नवम्या पुष्पं तु दशम्यैकादशर्चया ॥ ६ ॥ धूपं दीपं च द्वादश्या त्रयोदश्यान्नमुत्तमम् । पुष्पाञ्जलिं चतुर्दश्या पञ्चदश्या प्रदक्षिणम् ॥ ७ ॥ विसर्जनं तु षोडश्या इति सूक्तार्चनं क्रमात् । [4]आद्यं त्वाचमनं कार्यं स्नाननैवेद्ययोः सदा ॥८॥ षोडशर्चं भवेन्मन्त्रं सूक्तं पुरुषदैवतम् । सर्वदेवात्मकस्यास्य ऋषिर्नारायणः परः ॥ ९ ॥ पुरुषो यो जगद्बीजं वेदसारमयोऽच्युतः । देवता त्रिष्टुभं तस्य छन्दोऽनुष्टुप् चतुष्पदी ॥ १० ॥ पुरुष एवेदमिति यद्बीजं त्रैलोक्यविश्रुतम् । एतावानस्य महिमा इति शक्तिः सनातनी ॥११॥ चतुर्भिश्च चतुर्भिश्च ऋग्भिः प्रतिमुखं यजेत् । वेदमूर्तिश्चतुर्वक्त्रो भुजैरष्टभिरावृतः ॥१२॥ ऋग्वेदास्यो यजुःकुक्षी सामचक्षुस्त्वथर्वहृत् । ऋचः पश्चिमवक्त्रं स्याद्यजुश्चोत्तरमुच्यते ॥ १३ ॥ साम पूर्वं मुखं ज्ञेयमथर्वा दक्षिणं मुखम् । अवयवाश्च [5]भवेयुस्ता वेदशाखा महात्मनः ॥ १४ ॥ हिरण्मयं

---

१ हरिः ॐ सहस्रशीर्षेति–ख०, ॐ सहस्रशीर्षेति–ग०; अत्र–"परमात्मा विज्ञानानन्दादिगुणनिध्यात्मभूतः पुरुषमेधो यज्ञः प्रजापतिर्लोकपालाग्न्यादिवपुः पुरुषोत्पत्तिस्थितिसंहृतीनां हेतुः स्वर्गापवर्गैश्वर्यमोक्षदो ज्ञानकर्मसमुच्चयकारिणः शरीरम्, 'यज्ञो वा अस्यात्मा भवति' [शत० ब्रा० ११।२।२।५] इति श्रुतेः । प्रथमानुवाकेन षोडशर्चेनानुष्टुभेन त्रिष्टुबन्त्येन तथा 'ब्रह्मणे ब्राह्मणम्' इत्याद्यवयवभूतपुरुषद्वारेणावयवी स्तूयते ।" इति–ग० टि० । अत्रत्यशौनकभाष्येण तुलनीयैषा ।

२ ब्रह्मवैवर्तपुराणे नोपलभ्यन्त इमानि श्लोकानि । ऋग्विधानस्य तृतीयाध्याये पुरुषसूक्तस्यास्य विनियोग ईदृश एव दरीदृश्यते किन्तु तत्र श्लोकावलिर्भिन्नैव ।

३ साङ्गे देवे सविन्यासम्–ख० ।

४ आद्यंताचमनम्–क-ख-ग० ।

५ भवेद्यज्ञे–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वपुस्तस्य श्मश्रुकेशौ हिरण्मयौ। पीतवस्त्रपरीधानं श्वेतवस्त्रोत्तरीयकम् ॥ १५ ॥ हारकेयूरमुकुटं कुण्डलाद्यैर्विराजितम्। आयुधानि चतुर्वेदा बाष्कलादिमयाः स्मृताः ॥१६॥ [1]ऋग्वेदादिमया ज्ञेयाः शङ्खचक्रगदाब्जकाः। मुसलासिधनुःपाशा बाष्कलादिमयाः स्मृताः ॥१७॥ शङ्खं शैलं च मुसलं खड्गं दक्षोपरि स्मरेत्। चक्राब्जशार्ङ्गपाशांश्च [2]तथोत्तरकरे स्मरेत् ॥१८॥" [इति।]

अथ—"नियुक्तान् पुरुषान् ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति–[3]'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' [३५।१] [4]इत्येतेन षोडशर्चेन। षोडशकलं वा इदंꣳ [5]"सर्वम्" [शत० ब्रा० १३।६।२।१२] इत्यत्र विनियुक्तेषु पशुषु [6]विराट्पुरुषरूपश्रीनारायणस्वरूपमारोप्य श्रीनारायणस्वरूपदृष्ट्या तेषां स्तुतिः। कार्याणां च कारणानन्यत्वात् कारणरूपेणापि स्तुतिरुपपद्यते। [7]स्तुत्यर्थे विनियुक्तमन्त्रपदानामपि स्वार्थे शक्तिरस्त्येव, स्वार्थे शक्तिमतां पदानां परस्परान्वयेन [8]विवक्षितार्थता चास्त्येव। प्रयोजनवशात् विनियोगबलाचान्यार्थता तेषाम्। सर्वथापि स्वार्थे तात्पर्यावसानमस्त्येव, अन्यथा [9]स्वार्थे प्रकाशस्याप्यभावप्रसङ्गादिति। अथ पदव्याख्या—

[10]सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिꣳ सर्वतं स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

[11]सहस्रशीर्षेति षोडशर्चं सूक्तम्। तत्रानुष्टुभः पञ्चदश, अन्त्या त्रिष्टुप्। श्रीनारायणपुरुष ऋषिः। परमात्मा श्रीनारायणो देवता। शतं सहस्रमनन्तमपरिमितमिति नाम, संख्यानियमस्त्वविवक्षितः। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्ययमेव निर्देशः संख्याया अविवक्षितत्वं सूचयति, शिरश्चक्षुःपादानामेकत्र समसंख्यानुपपत्तेरिति। सहस्राणि शीर्षाणि यस्य सः सहस्रशीर्षा, 'शीर्षंश्छन्दसि' [अष्टा० ६।१।६०] इति शिरःशब्दस्य शीर्षन्नादेशः, अपरिमितशिराः। सर्वप्राणिनां शिरांस्यस्यैव शिरांसि, प्राणिनामानन्त्यात्। प्रायशस्त्वत्रत्या बहवः शब्दा लक्षणया स्वार्थमभिवदन्ति, न मुख्यवृत्त्या। सर्वावयवानां प्रधानभूतशिरसस्तु

---

१ सप्तदशतमः श्लोको नास्ति–क०।
२ 'तथा' इत्यस्य स्थाने 'तान्' इति–ख०।
३ सहस्रशीर्षेत्यनेन–क०।
४ इत्यनेन–ख-ग०।
५ 'सर्वम्' इत्यस्याग्रे 'प्रजापतिः' इत्यधिकम्–क-ख-ग०, एष चात्र शत० ब्रा० न दृश्यते।
६ 'रूप' नास्ति–क-ग०।
७ स्तुत्यन्तेन–क-ख-ग०।
८ विवक्षितार्थे–क-ख-ग०।
९ स्वार्थे प्रकाशस्याप्यर्थे प्रकारस्यापि–क-ग०।
१० (मा० ३१।१)।
११ 'सहस्रशीर्षेति' नास्ति–क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमं तावद्ब्रह्णम्, सर्वेषां प्रधानभूतस्य सत्यज्ञानानन्तानन्दभावलक्षणस्य परब्रह्मणः परिग्रहार्थं तस्य चात्मत्वेनानन्यशेषत्वेन प्राधान्यादिति। अस्य च स्वरूपावगमस्तु तटस्थलक्षणया स्वरूपलक्षणया च भवति, नान्यथेति तद्द्वयं क्रमेण दर्शयति—'सहस्रशीर्षा पुरुषः' इति। ब्रह्माण्डलक्षणे पुरि शेत इति पुरुषः। तथा च [1]श्रुतिर्नामनिर्वचनं करोति—[2]"अथ यस्मात्पुरुषमेधो नाम। इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषस्तस्य[3] यदेषु लोकेष्वन्नं तदस्यान्नं मेधस्तद्यदस्यैतदन्नं मेधस्तस्मात्पुरुषमेधोऽथो यदस्मिन् मेध्यान्पुरुषानालभते। तस्माद्वेव पुरुषमेधः" [शत० ब्रा० १३।६।२।१] इति, "इदꣳ सर्वं पुरुषमेधः सर्वस्याप्त्यै सर्वस्यावरुध्यै" [शत० ब्रा० १३।६।२।१२] इति [च]। सर्वजगदभिपूरयिता च पुरुषः। सहस्राक्षः, ज्ञानेन्द्रियाणामुपलक्षणम्। सहस्राण्यक्षीणि यस्य [4]स सहस्राक्षः अनन्ताक्षः। सहस्रपात् सहस्राणि पादा यस्य स सहस्रपात्, सर्वकर्मेन्द्रियाणामुपलक्षणम् अपरिमितपादः। [5]यः [6]सर्वैः प्राणिशिरोऽक्ष्यादिभिः कार्यभूतैरेव तैः कारणेन स्थितोऽपि श्रीभगवान् "तदनन्यत्वमारम्भणशब्दादिभ्यः" [ब्र० सू० २।१।१४] इति[7] न्यायाद् अनन्यत्वेन स्वयं सहस्रशीर्षेत्यादिशब्दैरभिहितः। सोऽयं भूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलमिति[8]। भूमिं भूम्युपलक्षितं सर्वं कार्यकारणजातम्। सर्वतः सर्वप्रकारेण अन्तर्बहिरपि स्पृत्वा 'स्पृश संस्पर्शने' [१४२३ तुदा०] सर्वतः संस्पृश्य, सर्वत आवृत्य, कारणत्वेनान्तर्बहिरपि संव्याप्य। अत्यतिष्ठद्दशाङ्गुलम् अतिक्रान्तवान्, कार्यप्रपञ्चमतिक्रम्यावर्ततेत्यर्थः। तस्य [9]परिमाणशून्यस्यापि परमेश्वरस्य जिज्ञासूनां सुखप्रतिपत्त्यर्थं किञ्चित्परिमाणं परिकल्प्यैवं शिरोऽप्यवशिष्टमंशं कल्पयति—दशाङ्गुलमिति। द्वादशाङ्गुला वितस्तिः। तत्र द्वादशाङ्गुलमितरूपेणैव[10] वर्तमानस्य परमेश्वरस्वरूपस्याङ्गुलिद्वयांशो जगदभूत्[11]। अवशिष्टं निष्प्रपञ्चरूपं सदित्याह—दशाङ्गुलमिति। दशाङ्गुलयो यत्र तद्वस्तु सद्ब्रह्मेति। एवमेव श्रीवेदव्यासोऽपि मन्त्रं व्याचष्टे—"तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति"

---

१ श्रुतिश्चतुर्भिर्नामभिर्निर्देशम्—क०, श्रुतिश्चतुर्भिर्नामभिर्नामनिर्देशम्—ग०।
२ 'अथ····नाम' नास्ति—ख०।
३ 'तस्य यदेषु···सर्वस्यावरुध्यै' नास्ति—ख०।
४ 'स' नास्ति—ख०।
५ 'यः' नास्ति—ख०।
६ सर्वपाणिशिरो—ख०।
७ इत्थम्—क-ग०।
८ 'इति' नास्ति—क०।
९ परिणाम—क-ख-ग०।
१० एवम्—क-ग०।
११ जगदस्तु—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[भाग० २।६।१६] इति। तद्द्वादशाङ्गुलयो वितस्तिरिति कुर्वता तेन परमेश्वरेण [1]परब्रह्मणाऽङ्गुलिद्वयमात्रपरिमितरूपेणेदं सर्वं जगत् तिर्यगूर्ध्वमधोऽन्तर्बहिश्च सन्निष्प्रपञ्चरूपेणाभिवर्तत इत्यर्थः। अत्यतिष्ठद्दशाङ्गुलमित्यत्र दशाङ्गुलिप्रदेशनिरूपणं तूपासनार्थम्, न तु वस्तुतत्त्वनिरूपणमिति। यथावस्तुकथनमेवात्र स्तुतिरिति व्यपदिश्यते। परमार्थवस्तुतत्त्वनिरूपकमिदं सूक्तं परमकृपया स्तुतिव्याजेन क्रतुप्रकरणं प्रविशति, अन्यार्थत्वेन वेममर्थं ज्ञात्वा कृतकृत्या भवेयुरिति ॥ १ ॥

[2]पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

इदं प्रत्यक्षादिभिः प्रमाणैः साक्षिणा च परिदृश्यमानमिदं सर्वं जगत्। पुरुष एव नान्यत्। स्वकारणसत्ताप्रतीतिव्यतिरेकेण कार्यस्य पृथक्सत्ताप्रतिपत्त्यभावान्नान्यदित्यर्थः। तच्च विवृणोति—यद्भूतं यच्च भाव्यम्। यद् भूतं निष्पन्नम्। यच्च अतिक्रान्तं स्थितं वा भवतु। यच्च भाव्यं भविष्यत्। इदमित्यनेनैव [3]वर्तमानमित्यभिहितम्। एवं कालत्रयसंबन्धि यदिदं सर्वं पुरुष एव। किं च, उतामृतत्वस्येशानो यदन्नेनातिरोहति। उत अपि। अमृतत्वस्य मोक्षस्यापि स एवेश्वरः, यः सर्वजगदधिष्ठानभूतो यः सर्वजगत्कारणभूतो यस्तु स्वयं निष्प्रपञ्चरूपः। ईशानः ईश्वरः, स्वयमेव मोक्षप्रद इत्यर्थः। यदन्नेन यद् वस्तु अन्नेन व्रीह्यादिलक्षणेनातिशयेनातिरोहति। 'रुह बीजजन्मनि' [८५९ भ्वादिः] उत्पद्यते, उत्पद्य स्थितिं च प्राप्नोति। तस्यापीशानः, एवंविधस्य मोक्षस्य च स एवेश्वर इत्यापाततः प्रतीयमानोऽर्थः। अतिरोहति। श्रीवेदव्यासस्त्विमं मन्त्रमित्थं व्याचष्टे—"सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात्" [भाग० २।६।१७] इति। "जगद्वाचित्वात्" [ब्र० सू० १।४।१६] इत्यधिकरणन्यायेन मृत्युं गतं मर्त्यमिति योग्यं [4]मर्त्यनाम आदायान्नशब्दो मूर्तिमत्सर्वं कार्यजातमभिधत्ते, अतस्त्वन्नेनोपलक्षितं सर्वं कार्यजातं यद् यः [5]स्वतः सिद्धः। [6]अत्यगात् अतिरोहति अतिक्रामति अभिगच्छति। स एवामृतस्येति। अमृतमिति क्षेमाभययोरुपलक्षणम्।

---

१ ब्रह्मणा—क०।
२ (मा० ३१।२)।
३ वर्तमानमभिहितम्—ख०।
४ 'मर्त्यनाम' इत्यत्र "तद्धर्मम्" इति—ग० टि०।
५ सर्वतः—क०।
६ 'अत्यगात्' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अमृतं क्षेममभयम्" [भाग० २।६।१९] इति निष्प्रपञ्चरूपस्य ब्रह्मणस्त्रयाणां पादानां नामानि। अमृतस्यानन्दरूपस्य मोक्षस्य मोक्षरूपस्य। अभयस्य [1]अद्वैतरूपस्येशित्वममृतत्वस्येश[2] ईश्वर इति। एवं तटस्थस्वरूपलक्षणाभ्यां परमेश्वरत्वं निरूपितम् ॥ २ ॥

[3]एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

अतीतानागतवर्तमानकालसंबद्धं[4] यदिदं किञ्चित्प्राणिजातं तस्यैव रूपमित्येतावानस्य महिमा माहात्म्यमस्य। भूतिः प्रभाव ऐश्वर्यशक्तिरिति पर्यायः। अतः अस्माद् एवंभूतान्महिम्नः। ज्यायान् महत्तरः अधिकतरस्त्वयं पुरुषः। सामान्यत एवैतदुक्त्वाऽथ तदेव विशिनष्टि-पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि। अस्य [5]प्रमाणनिरपेक्षितया सर्वेषामपरोक्षभूतस्यास्य। विश्वा विश्वानि सर्वाणि। भूतानि भूतजातानि अतीतानागतवर्तमानकालसंबन्धीनि। पादः एकपादः एको भागः। अंशो भागः पाद इत्यनर्थान्तरम्। अस्यावशिष्टास्त्रयः पादाः कुत्रेति तदाह–त्रिपादस्यामृतं दिवीति। अमृतं क्षेमम् अभयमिति त्रयः पादा यस्य स त्रिपादिति। ऋग्यजुःसामात्मक आदित्यमण्डले। यद्वा स्वस्वरूपमनुभवतां द्युतिसाधनभूतविशिष्टान्तःकरणे वर्तत इति सर्वतः पूर्णस्यापि तत्राभिव्यक्तिविशेषोपपत्तेरिति। श्रीशुकोऽपीमं मन्त्रमित्थं व्याचष्टे–"महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः। पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः" [भाग० २।६।१८] इति। अथवा, अस्य पुरुषस्य। महिमा कार्यकारणरूपो महिमा। एतावान् एतावत्परिमितः। अतः अस्मात्। पुरुषः निरुपाधिकः पुरुषः पूर्णरूपः। ज्यायान् महत्तरः। [6]कथमिति ? पादोऽस्येति। समानमन्यत् ॥ ३ ॥

[7]त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥ ४ ॥

पूर्वोक्तस्त्रिपात् "ज्योतिश्चरणाभिधानात्" [ब्र० सू० १।१।२४] इत्यधिकरणसिद्धो द्युसंबन्धित्वेन त्रिपात् पादत्रयात्मकः परब्रह्मलक्षणः पुरुषः। ऊर्ध्व उदैत्। ऊर्ध्वः कार्यप्रपञ्चाद्

---

१ अद्वैतरूपलक्षण–ख०, अद्वैतलक्षण–ग० टि०। २ ईशान–ख०। ३ (मा० ३१।३)।
४ सम्बन्धम्–क-ग०। ५ परिमाण–क-ग०। ६ क इति–क-ग०, मह इति–ख०।
७ (मा० ३१।४)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपरि द्युस्थाने, ऊर्ध्वः सर्वोत्कृष्टः । उदैत् अतिशयेन दीप्यते । निवृत्तिमार्गनिष्ठानामुपास्यत्वेन निष्प्रपञ्चरूपस्तत्र प्रतीयते । पादोऽस्येहाभवत्पुनः । इह ब्रह्माण्डे प्रपञ्चपुरुषलक्षणः पादः । [1]अग्रगामीत्युपास्यत्वेन [2]तत्फलरूपेण च पुनरभवत् । ततो विष्वङ् व्यक्रामत् । यस्मात् स्वयमुपास्यरूपोऽतस्ततस्तस्मात् कारणात् साशनानशने [3]विद्याविद्ये विद्याविद्याप्रयुक्ते [स्तुती]। स्तुतिमार्गैरग्निहोत्रादिलक्षणा स्तुतिरेका साशना हविरादिप्रयुक्ता [अविद्यात्मिका]। देवयान-लक्षणाऽनशना विद्यात्मिकाऽन्या । एवं द्वे स्तुती साशनानशने अभि अतिव्याप्य । विष्वङ् विषु सर्वतः अञ्चतीति विष्वङ्, पुनः सर्वगामी सर्वगः सन् व्यक्रामत् आक्रान्तवान् । कर्मसु तत्साध्यफलसाधनमार्गेषु तत्फलेषु च व्याप्तवान्, "सृती विचक्रमे विष्वङ् साशनानशने उभे । यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥" [भाग० २।६।२०] इति श्रीवेदव्यास-व्याख्यानात् । यद्वा, त्रिपादूर्ध्वं उदैदिति । सर्गस्थितिप्रलयहेतुभूतास्त्रयः पादा यस्य स ऊर्ध्वः उत्कृष्टः सन् उपसंहारकाले सर्वजगदुपसंहृत्य ऊर्ध्वमुदैत् [4]उद्गत्य प्रकाशते । सर्गकाले प्राप्ते इह जगति अभवत् । [5]जगत् सृष्ट्वा क्षेत्रज्ञरूपेणान्तर्यामिरूपेण च तज्जगत्यभवत् । स्थितिकाले च ततो विष्वङ् व्यक्रामत् [6]समहरत् । साशनानशने अभीति । ततः स्थितिहेतुभूतैर्नानावतारैः स्थितिविरोधिनो राक्षसान् संहरन् सुमार्गं प्रदर्शयन् तत्सर्वमाक्रान्तवान् ॥ ४ ॥

[7]ततो॑ वि॒राळ॑जायत वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५ ॥

इत उत्तरं सृष्टिविशेषोऽभिधीयते । समस्तजगदुत्पत्तिकारणत्वेन यः परमात्मा नारायणः पुरुषो निर्दिष्टस्ततस्तस्मात्परमात्मरूपात् श्रीनारायणात्पुरुषात् विराड् ब्रह्माण्डलक्षणं शरीर-मजायत । अत्रैवं [8]तत्त्वाभिधानक्रमं तत्संप्रदायविदो निरूपयन्ति - आदौ तावत्सत्यज्ञानानन्ता-नन्दात्मलक्षणं[9] [10]यत्परं ब्रह्म तदेव विक्षेपाच्छादनशक्तिमताऽज्ञानेन जीवोऽयमसावीश्वर-स्तद्ब्रह्मेत्येवं विभागमापन्नं सल्लीलार्थं विक्षेपप्रधानां मायाशक्तिं च स्वीकृत्याच्छादनशक्ति-प्रधानायामविद्यायां प्रतिबिम्बितानां जीवानां संसारव्यवहारोपाधिभूतानहङ्कारादीन् पदार्थान्

१ अग्रयायीति–ख०। २ उत्पन्नरूपेण–क·ख०। ३ 'विद्याविद्ये' नास्ति–क०,विद्याविद्याविद्युक्ते–ख०। ४ 'उद्गत्य' नास्ति–क·ग० । ५ 'जगत्' नास्ति–क·ग० । ६ 'समहरत्' नास्ति–ख० । ७ (मा० ३१।५) । ८ 'तत्त्वाभिधानक्रमम्' नास्ति–ख० । ९ आनन्दात्मकलक्षणम्–क० । १० यत्परब्रह्म–क·ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लीलया सिसृक्षुर्वशीकृतमाय ईश्वरः सर्वकार्यनिर्वोढां स्वशक्तिं मायामैक्षत् — "बहु स्यां प्रजायेय" [छा० ६।२।३] इति। एवमीश्वरनिरीक्षणविषयभूता मायात्मिका प्रकृतिस्तदानीमेव ईश्वरनिरीक्षणलक्षणकार्यात्मना विवर्तते। स चाद्यो विकारो महानित्युच्यते। स चेश्वराद् [जायमानः] अहङ्कारो हैरण्यगर्भी बुद्धिरित्युच्यते, "बहु स्यां प्रजायेय" [छा० ६।२।३] इत्युत्तमपुरुषेण प्रतीयमानत्वाद् एवंविधोऽहमेवंविधानर्थान् स्रक्ष्यामीति ब्रुवन् ईश्वरादुपादानभूतात् सत्त्वरजस्तमोमयोऽहङ्कारो जायते। स चाहङ्कारो जीवव्यवहारोपाधिर्जातः। एवं परब्रह्मणो मायाशक्तिमतो जगत्सिसृक्षोर्निरीक्षितुरीश्वराद् आकाशादीनि पञ्च महाभूतानि जायन्ते। तदा स एव श्रीभगवानीश्वरः सर्वज्ञो नारशब्दवाच्यः। स च स्वांशभूतानां नारशब्दवाच्यानां जीवानां परमार्थतस्त्वयनभावमापद्यमानः स्वयमीश्वरः श्रीनारायण इत्यभिधीयते। स एव पुनरीश्वरो नारायणः स्वसृष्टेषु नारशब्दवाच्येषु महाभूतेषु स्वलीलायतनभूतेषु लीलया विहरन् नारायण इत्यभिधीयते। य एवंभूतः श्रीभगवान्नारायण एव—"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इति। "त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः" इति [च] अभिहितः। तस्माद्यथोक्तगुणविशिष्टाद् भूतसूक्ष्मरूपमापन्नात् श्रीभगवतो नारायणादीश्वराद् विराड् ब्रह्माण्डलक्षणं शरीरमजायत। विराजो अधि विराजम् अधिरुह्य विराट्शरीरं संव्याप्य विराडहमस्मीति विराट्शब्दाभिमानी पुरुषः [1]अजायत। स पुरुषो जातः अभिव्यक्तः सन् अत्यरिच्यत। [2]'विचिर् पृथग्भावे' ? [१४४३ रुधा०] ब्रह्माण्डं संव्याप्य ततो व्यतिरिक्तस्त्रिपाद्ब्रह्मात्मनाऽवर्ततेत्यर्थः। तत्रापि विशेषमाह—पश्चाद्भूमिमिति। भूम्युपलक्षितमण्डाद्बहिःस्थितं जलादिमहदहङ्कारकार्यजातं संव्याप्यात्यरिच्यत। केवलं बहिरेवावर्ततेति न, अपि त्वन्तरपीत्याह—अथो पुर इति। अतो यस्मादेवंभूतस्तस्मात्। पुरः शरीराणि सुरनरतिर्यगादीन्यपि क्षेत्रज्ञरूपेणान्तर्यामिरूपेण च संव्याप्यात्यरिच्यत। एवं समस्तजगदाकारेण श्रीभगवानेक एव प्रतीयत [3]इति। अथ तस्माद्धिरण्यगर्भाद् विराड् अजायत। विराट् पुरुषविधः। विराजो अधि पूरुष इति [4]स्वायंभुवो मनुरिति। स च अत्यरिच्यत [5]पुत्रपौत्रादिभिरयमधिको जात इति व्याचष्टे ॥ ५ ॥

---

१ 'अजायत स पुरुषो' नास्ति—ख०। २ विचिर—क-ख-ग०, 'रिच वियोजनसंपर्चनयोः' [१८१७ चुरादिः] इति साधीयान् पाठः। ३ 'इति' नास्ति—क०। ४ स्वयंभुवः—क-ग०। ५ पुत्रपौत्रप्रपौत्रादिभिः—ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथेदानीं विराड्रूपाच्छ्रीभगवतो जातान् यज्ञसाधनभूतद्रव्यपशुविशेषदेशकालविशेष-ऋग्यजुःसामादितत्तत्फलादिपदार्थान् ब्रवीति—

[1]तस्मा॑द्य॒ज्ञात् स॑र्व॒हुतः॒ संभृ॑तं पृषदा॒ज्यम् ।
प॒शूँस्ताँश्च॑क्रे वाय॒व्या॑नार॒ण्या ग्रा॒म्याश्च॒ ये ॥ ६ ॥

तस्मात्पूर्वोक्ताद्यज्ञाद्विराड्रूपाद् विष्णोरुपादानभूतात् । सर्वहुतः यज्ञः सर्वाण्यस्मिन् हूयन्त इति सर्वहुतः यज्ञः । अजायतेति संबन्धः । यद्वा व्यत्ययः । चिद्रूपः श्रीभगवानेव ब्रह्माण्डान्तर्वर्तिसर्वपदार्थानां सिसृक्षुः स्वयं चतुर्वदनविशिष्टरूपमास्थाय स्रष्टृरूपेण स्थितः सुरनरतिर्यगादिसृष्टिं विराजोऽवयवैरेव करोति । तस्माद्विराजो मुखाद्यज्ञं पुरुषमेधादिलक्षणं यज्ञं [2]ब्रह्मा चक्रे कृतवान् । ततस्तु सर्वहुतः । व्यत्ययः । सर्वहुतं सर्वमस्मिन् हूयत इति सर्वहुतः अग्निस्तं सर्वहुतमग्निं विराजो मुखाच्चक्रे । संभृतं संभरणं हविषां संभरणं चक्रे, हविषां सामान्यतो निर्देशः । पुनश्च विशेष्यते—पृषदाज्यं चक्रे । दधिमिश्रितम् आज्यं पृषदाज्यं [3]च ब्रह्मा चक्रे । तान् वायव्यान् वायुदेवत्यान् पशूँश्चक्रे ब्रह्मा कृतवान् । आरण्याश्च ग्राम्याश्च ये । ये ग्राम्याः पशवो ये चारण्याश्च पशवस्तानुभयविधान् पशूँश्चक्रे ॥ ६ ॥

[4]तस्मा॑द्य॒ज्ञात् स॑र्व॒हुत॒ ऋचः॒ सामा॑नि जज्ञिरे ।
छन्दां॑सि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥ ७ ॥

तस्माद्यज्ञाच्चिद्रूपाद् विष्णोरुपादानात् सर्वहुतः । अग्निनानात्वाभिप्रायेण यज्ञनानात्वाभिप्रायेण पुनर्वचनम् । तथा हि पुराणेष्वेषां प्रतिमुखमुत्पत्तिस्मरणात् । तथा च तस्माद्यज्ञात् । ऋचः नियतपादपदबद्धा ऋचः । जज्ञिरे आविर्भूताः । सामानि च गीतप्रधानानि जज्ञिरे । छन्दांसि गायत्र्यादीनि च जज्ञिरे । तस्माद्विराजो विष्णोरेव यजुः प्रश्लिष्टपठितं यजुः । अजायत जातमाविर्भूतम् ॥ ७ ॥

[5]तस्मा॒दश्वा॑ अजायन्त॒ ये के च॑ोभ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ताऽअ॑जा॒वयः॑ ॥ ८ ॥

---

१ (मा० ३१।६) । २ 'ब्रह्मा' नास्ति—क० । ३ 'च' नास्ति—क० ।
४ (मा० ३१।७) । ५ (मा० ३१।८) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद्विराजः अश्वाः अजायन्त । ये के च उभयादतः । उभयतो दन्ताः, ये के च [1]उभयदतः प्रसिद्धास्तेऽप्यजायन्त । गावो ह जज्ञिरे, तस्माद्विराजः गावो ह जज्ञिरे । तस्माद् विराजः छागाः अजाः, अवयश्च दीर्घोर्णाश्च जाताः ॥ ८ ॥

[2]तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥

किं [3]बहुनोक्तेन, अग्रतः जातं [4]प्रथमजं तं पुरुषं विराड्रूपं यज्ञं विष्णुं बर्हिषि यज्ञे यागे नानासाधनादिरूपेण स्थितं [5]विष्णुं देवा ऋषयश्च प्रौक्षन् । 'उक्ष सेचने' [६५७ भ्वादिः] प्रोक्षणस्य संस्कारं कृतवन्तः । तेन प्रोक्षितेन यज्ञेन विराड्रूपेण करणभूतेन साध्या देवाः ये ऋषयश्च तेऽयजन्त । श्रीभगवन्तं विष्णुम् अयजन्त यजनं कृतवन्तः ॥ ९ ॥

इदानीं पुरुषमेधयाजिनः[6] फलपरिणामभूतविराड्रूपाणि पृच्छति—

[7]यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥ १० ॥

यत् यदा । पुरुषं विराड्रूपं पुरुषम् । व्यदधुः पुरुषविधं चक्रुः । [8]पुरुषा कारतायामवयव-विशेषान् पृच्छति—कतिधा व्यकल्पयन्निति[9] । कतिधा कतिप्रकारेण । व्यकल्पयन् अव-यवकल्पनां कृतवन्तः । तत्रापि कल्प्यमानस्यास्य पुरुषस्य किं मुखम् आसीत् । किं बाहू कौ [10]वा बाहू स्तः । किं पादौ उच्येते ॥ १० ॥

एवं पृष्टे सति श्रुतिः स्वयमेवोत्तरमाह—

[11]ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ ११ ॥

अस्य विराड्रूपस्य । ब्राह्मणः मुखमासीत् । राजन्यः क्षत्रियः विराड्रूपस्य बाहू कृतः । ऊरू तदस्य यद्वैश्यः। यद् अस्य वैश्यः। [12]तत् सः । अस्य विराजः पद्भ्यां शूद्रो अजायत ।

---

१ उभयादतः—क-ग० । २ (मा० ३१।९) । ३ बहूक्तेन—क-ग० । ४ 'प्रथमजं तम्' इत्यस्य स्थाने 'प्रथमजातम्' इति—ख० । ५ विष्णुः—क-ख-ग० । ६ याजिनि—क-ग० । ७ (मा० ३१।१०) । ८ पुरुषाकारतया—क-ग० । ९ 'इति' नास्ति—क० । १० 'वा' नास्ति—ख० । ११ (मा० ३१।११) । १२ 'तत् सः अस्य······वा अस्य' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्तदनुसारेण वा अस्य विराजो मुखमेव ब्राह्मण आसीत् । बाहू राजन्यः कृतः । श्रीभगवतः अस्य ऊरू तौ वैश्यः कृत इति[१] ॥ ११ ॥

यत्पुरुषं व्यदधुरित्यस्योत्तरमाह—

[२]चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

अस्य [३]विराजः । मनसः चन्द्रमा जातः । चक्षोः चक्षुषः । सूर्यः अजायत । श्रोत्रात् श्रोत्राकाशात् । वायुः [४]प्राणश्च अजायत । अस्य मुखाद् अग्निरजायत ॥ १२ ॥

अथ लोकसृष्टिमाह—

[५]नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ॥ १३ ॥

अस्य विराजः पुरुषस्य । नाभ्याः सकाशात् । अन्तरिक्षमुत्पन्नमासीत् । [६]शीर्ष्णः शिरसः [७]द्यौः द्युलोकः । समवर्तत समजायत । पद्भ्यां भूमिः समवर्तत । दिशः अस्य विराजः श्रोत्रात् दिशः आसन् । तथा तेन प्रकारेण [८]पुरुषाः लोकान् अकल्पयन् ॥ १३ ॥

[९]यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥

यत् यदा । पुरुषेण हविषा पुरुषावयवरूपेण हविषा । देवाः प्रजापतेः प्राणरूपाः । यज्ञमतन्वत यज्ञविस्तारं कृतवन्तः । पुरुषस्यावयवा एव यज्ञस्य विस्तृताः संभारा आसन् । तैरेव यज्ञं कृतवन्त इत्यभिप्रायः । यस्मिन् काले यज्ञमतन्वत । स वसन्त आसीत् । यो वसन्तः सोऽस्य यज्ञस्य आज्यमासीत् । ग्रीष्म ऋतुरस्य यज्ञस्य इध्म आसीत् । शरद् अस्य हविरासीत् ॥ १४ ॥

---

१ 'इति' नास्ति–क० । २ (मा० ३१।१२) । ३ 'विराजः' नास्ति–क० । ४ प्राणाश्च अजायन्त–ख० । ५ (मा० ३१।१३) । ६ 'शीर्ष्णः' नास्ति–ख० । ७ द्यौर्लोकः–क-ग० । ८ पुरुषलोकान् व्यकल्पयन्–ख० । ९ (मा० ३१।१४) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञं स्तौति—

[1]सप्तास्यासन्परिधयस्त्रिःसप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम्॥ १५॥

सप्त समुद्राः परिधय आसन्। सप्त छन्दांसि सप्त संस्थाः प्रकृतय आसन्। [2]त्रिःसप्त सप्तकास्त्रयो वर्गाः। त्रिः तिस्रः। समिधः समिन्धना आसन्। देवा यद् यदा। यज्ञं तन्वानाः यज्ञान् विस्तारयन्तः। पुरुषं पशुमबध्नन् पशुत्वेन बन्धनमकुर्वन्। तदाऽस्य यज्ञस्य समुद्राः परिधय आसन्निति संबन्धः॥ १५॥

निगमयति—

[3]यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ १६॥

त्रिष्टुप्। इदानीं साध्यानां यज्ञफलमुच्यते। यज्ञेन हविर्भूतेन। देवा यज्ञमयजन्त। तानि धर्माणि प्रथमान्यासन्। यज्ञात्मकस्य कर्मणः सूक्ष्मरूपाणि तानि कर्माणि, फलस्य पूर्वरूपाणि वा यानि, तानि प्रथमानि कर्मसाध्यफलेभ्यः पूर्वरूपाणि तानि धर्माणि [4]हविषां सूक्ष्मरूपाणि वाऽऽसन्। ते ह ते ऋषयः। महिमानः देवाः। सचन्त नाकम्। [5]कं सुखम्, अकमसुखं न विद्यते यत्र स स्वर्गो नाकः, तं नाकं स्वर्गं सुखविशेषम्। सचन्त सेवितवन्तः। कुत्रेति तदाह—यत्र पूर्वे साध्याः सन्ति देवाः। यत्र [6]स्वर्गे स्थानविशेषे। पूर्वे पुरातना ऋषयो देवाः [7]प्रजापतेः प्राणा एव साध्या देवाः स्वर्गसुखमनुभवन्तस्तिष्ठन्ति। तं नाकं महिमानो देवा ऋषयश्च सचन्तेति। एवमेव मन्त्रं श्रुतिर्व्याचष्टे—"यान्वै तान् सप्त पुरुषानेकं पुरुषमकुर्वन्। स प्रजापतिरभवत्। स प्रजा असृजत स प्रजाः सृष्ट्वोर्ध्व उदक्रामत्। स एतं लोकमगच्छद्यत्रैष एतत्तपति नो ह तर्ह्यन्य एतस्मादत्र यज्ञिय आस तं देवा यज्ञेनैव यष्टुमभ्रियन्त॥१॥ तस्मादेतदृषिणाभ्यनूक्तम्—'यज्ञेन यज्ञमयजन्त देवाः' इति। यज्ञेन हि तं यज्ञमयजन्त देवाः। 'तानि धर्माणि प्रथमान्यासन्' इति ते हि धर्माः प्रथमेऽक्रियन्त। 'ते ह नाकं महिमानः सचन्त' इति स्वर्गो वै लोको नाको

---

१ (मा० ३१।१५)। २ त्रिःसप्तकाः–ख०। ३ (मा० ३१।१६)। ४ हविषा–क-ग०। ५ 'कम्' नास्ति–क-ग०। ६ स्वर्गस्थविशेषेषु–क-ग०, स्वर्गस्था विशेषे–ख०। ७ 'प्रजापतेः' ... 'देवाः' नास्ति–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवा महिमानस्ते देवाः स्वर्गं लोकं सचन्त ये तं यज्ञमयजन्नित्येतत् ॥२॥ 'यत्र पूर्वे साध्याः सन्ति देवाः' इति। प्राणा वै साध्या देवास्त एतमग्र एवमसाधयन्" [शत० ब्रा० १०।२।२।१–३] इत्यादिका। 'यत्र पूर्वे साध्याः सन्ति देवाः' इति [1]यज्ञे ऋषीणां प्रवाहस्य नित्यतां दर्शयति ॥ १६ ॥

उत्तरनारायणेनादित्यमुपतिष्ठत इत्याह—

[2]अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

उत्तरनारायणेनादित्यमुपतिष्ठते। [3]षड् ऋच उत्तरनारायणमन्त्राः। तत्राद्यास्तिस्रस्त्रिष्टुभः, ततो द्वे अनुष्टुभौ, अन्त्या त्रिष्टुप्। "उत्तरनारायणेनादित्यमुपस्थायानपेक्षमाणोऽरण्यमभिप्रेयात्" [शत० ब्रा० १३।६।२।२०] इति श्रीनारायणदेवत्या मन्त्रा आदित्योपस्थाने विनियुक्ताः। [4]पूर्वकल्पान्तरीयेषु पुरुषमेधयज्ञादिभावमापन्नः परम्पराकोटिसंचारीति श्रूयते[?]। यः अद्भ्यः [5]उदकस्य सकाशात् [6]संभृतः। पृथिव्यै पृथिव्याः सकाशाच्च [6]संभृत इति। पृथिव्युदकग्रहणं पञ्चमहाभूतानामुपलक्षणम्, "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" [ब्र० सू० ३।१।१] इत्यधिकरणसिद्धत्वात्। अग्रे प्रथमम्। यः भूतपञ्चकात्संभृतः, 'भृञ् भरणे' [८९८ भ्वादिः]। पुण्यसंस्कारानुरञ्जितभूतपञ्चकपरिवेष्टित इत्यर्थः। एवं संभृतः सन् पश्चाद् रसाच्च विश्वकर्मणः समवर्तत। रसो रागस्तस्माद्रसात्। विश्वानि सर्वाणि कर्माणि यस्य स विश्वकर्मा सविता, तस्माद्विश्वकर्मणः। रसात् सर्वजगत्कर्तुरीश्वरस्य रागादीश्वरेच्छया। समवर्तत समभवत्। सूक्ष्मशरीरावस्थितस्य उत्पद्यमानसूक्ष्मदेहस्य त्वष्टा श्रीभगवानादित्यः। यद् रूपं विदधत् कालात्मकः सविता विशिष्टं रूपं कुर्वन्। एति आगच्छति। तन्मर्त्यस्य पूर्वं मनुष्यस्य सतः। देवत्वम्। व्यत्ययः। देवत्वेन। [7]आजानम्, जननम् उत्पत्तिः। एवं[8] तस्य जन्माभवदित्यादित्यः स्तूयते ॥ १७ ॥

---

१ 'यज्ञे' नास्ति–ख०। २ (मा० ३१।१७)। ३ 'षड् ऋचः' नास्ति–ख०।
४ पूर्वकल्पे पुरुषमेधयाजी आदित्यरूपं प्राप्तः स्तूयते–इति मही०, पूर्वकल्पान्तरीयेषु पुरुषगन्धर्वाग्न्यादिभावमापन्नः परापरसंचारीति श्रूयते–ख०।
५ उदकात्–क-ग०। ६ संभूतः–ख-ग०। ७ आजानन्–ग०। ८ उत्पत्तिरेवैतस्य–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥

एवं प्रतीयमानं पुरुषम् । पुरि शेत इति पुरुषस्तम् । अनेन प्राप्तं परिच्छेदं व्यावर्तयति—[2]महान्तमिति । महान्तमपरिच्छिन्नमनन्तम् । आदित्यवर्णमादित्यस्य वर्ण इव वर्णो यस्य स आदित्यवर्णः, स्वयंप्रकाश इत्यर्थः । तमसः परस्तात् । अज्ञानान्धकारादुपरि स्वतेजसाऽज्ञानान्धकारमधःकृत्य वर्तमानमेतं महान्तमादित्यान्तःस्थं पूर्णं पुरुषमेतं साक्षादपरोक्षरूपम् । अहं शोधिततत्त्वंपदार्थोऽहम् । वेद जानामि । एतं पुरुषं [3]महान्तमादित्यवर्णं पुरुषं वेद, आदित्यवर्णं महान्तं पुरुषमेतं पुरुषं वेदेत्येवं व्यतिहारेणाहं वेद जानामि । सर्ववेदान्तैस्तात्पर्येण प्रतिपाद्यार्थमाह—तमेव विदित्वातिमृत्युमेति । 'सहस्रशीर्षा' [३५।१] इत्यादिना योऽभिहितः परमेश्वरस्तमेव विदित्वा नान्यं तं विदित्वैव । मृत्युं मृत्युयुक्तं संसारम् । अत्येति अतिक्रामति न कर्मणा। अथ तमेव तं विदित्वैव मृत्युमत्येति । मृत्युमतिक्रम्य एति स्वस्वरूपं प्राप्नोति । परब्रह्म एति गच्छति इत्युपचारः । पक्षान्तरशङ्कां [4]निरस्यति—[5]नान्यः पन्था विद्यतेऽयनाय । अयनाय गमनाय स्वस्वरूपप्राप्तये । अन्यः पन्था मार्गो न विद्यते ॥ १८ ॥

[6]प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥

प्रकर्षेण जायन्त इति प्रजाः, तासां पतिः । गर्भे अन्तः [7]सर्वप्राणिनामुदरमध्येऽन्तर्यामिरूपेण यश्चरति । स च स्वस्वरूपेणाजायमानो देहादेर्जन्मन्यपि स्वयं जन्मशून्योऽप्युपाधिवशात् । बहुधा बहुप्रकारेण विजायते । यद्वा 'अज[8]गतिविक्षेपणयोः' [२३० भ्वादिः] [9]इति । स्वमायया सर्वानजायमानो विक्षेपयन् संमोहयन् स्वयं बहुधा विजायत इति । तस्य बहुधा वर्तमानस्यापि प्रजापतेः । योनिं स्थानं स्वरूपं च । धीराः सम्यग्ज्ञानिनः । परिपश्यन्ति

---

१ (मा० ३१।१८) । २ 'महान्तमिति' नास्ति—ग० । ३ आदित्यवर्णं महान्तम्—ग० ।
४ निवारयति—ख० । ५ 'नान्यः पन्था ······ न विद्यते' इत्यस्य स्थाने 'नेति । अन्यः पन्था मार्गः । न विद्यतेऽयनाय गमनाय स्वरूपप्राप्तये' इति—क-ग० । ६ (मा० ३१।१९) ।
७ 'सर्वप्राणिनामुदर' नास्ति—ख० । ८ गतिक्षेपणयोः—धातु० । ९ 'इति' नास्ति—क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

साक्षात्कुर्वन्ति । तस्मिन् प्रजापतौ । हि एव स्वकारणभूत एव । विश्वा विश्वानि । भुवनानि भूतानि । तस्थुः तिष्ठन्ति ।। १९ ।।

[1]यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।। २० ।।

देवेभ्यः अर्थाय । आतपति आतपं करोति प्रकाशयति [2]प्रकाश्यते च । यो देवानां पुरोहितः । यश्च देवानामग्रतः स्थित्वा हितमाचरति । पूर्वो यो देवेभ्यः । यश्च देवेभ्यः पूर्वः सर्वदेवाग्रणीर्जातः । तस्मै ब्राह्मये रुचाय नमः । ब्रह्मणो योग्यं ब्राह्मं तस्मै [3]ब्राह्मये । रुचाय रोचमानाय दीप्यमानायादित्याय नमः ।। २० ।।

[4]रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ।। २१ ।।

रुचं रोचमानम् । ब्राह्मं ब्रह्मावयवभूतम् । '[ब्राह्मोऽ] जातौ' [६।४।१७१] इत्यणि टिलोपे च ब्राह्ममिति भवति । रुचं ब्राह्मं देदीप्यमानं ब्राह्मं ब्राह्मणजातिम् । जनयन्त उत्पादयन्तो देवाः । अग्रे प्रथमम् । तत् तदिदमेवाब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । यस्त्वा एवम् । त्वा रुचं ब्राह्मं ब्राह्मणजातिं त्वाम् । एवं पूर्वोक्तप्रकारेण, [5]परब्रह्मैव ब्राह्मणजातिरिति यो ब्राह्मणो विद्यात् । तस्य ब्राह्मणस्य । वशे देवा [6]असन् अभवन् भवन्ति । परब्रह्मवशवर्तिनो देवास्तदंशभूतस्यापि वशवर्तिनो भवन्तीत्यर्थः ।। २१ ।।

[7]श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ।। २२ ।।

श्रीश्च लक्ष्मीश्च ते सवितुस्तव पत्न्यौ । यया [8]आश्रयणीयो [9]भवति सा श्रीः । आदित्यो यया तु लक्ष्यते सा लक्ष्मीः । श्रीः [10]शोभानुरूपा । लक्ष्मीः दीप्तिलक्षणचिद्रूपिणी । उभे ते पत्न्यौ

---

१ (मा० ३१।२०)। २ 'प्रकाश्यते' नास्ति–ख० । ३ "ब्रह्मणोऽपत्यं ब्राह्मिः, इञि टिलोपः" इति–मही० । ४ (मा० ३१।२१)। ५ परं ब्रह्मैव–ग० । ६ आसन्–ख-ग० । ७ (मा० ३१।२२)। ८ आश्चर्याणि–ख० । ९ भवन्ति–ख० । १० शोभानुरूपिणी–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भार्ये। ते के ? [1]अहोरात्रे ये पत्नीत्वेन कल्पिते। पार्श्वे उभयपार्श्ववर्तिन्यौ ते। नक्षत्राणि अश्विन्यादीनि तव रूपम्। अश्विनौ द्यावापृथिव्यौ। तव व्यात्तं [2]मुखम्, [3]मुखमिव। एवंरूपं त्वामिदमहं याचे–इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाणेति[4]। एतत्पदद्वयमपि इषुधातोः [१५२६ क्र्यादिः] रूपम्। विकरणव्यत्ययश्च। इष्णन् इच्छन् कर्मफलमिच्छन्। [5]इदमिषाण इदं फलमिच्छ। किं तदिति? अमुं म इषाण। अमुं लोकं मे मदीयत्वेन। इषाण इच्छ। सर्वलोकं मे मदीयत्वेन। इषाण इच्छ। आत्मत्वेन वा इषाण। अहमेवेदं सर्वमिति सर्वात्मभावमेवेच्छेति। एवमादित्यः स्तूयते ॥ २२ ॥

[6]तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म तदापस्तत्प्रजापतिः ॥ २३ ॥

"अप्तोर्यामः सप्तममहर्भवति" इत्युपक्रम्य–"सर्वं जुहोति""सर्वस्याप्त्यै सर्वस्यावरुध्यै" [शत० ब्रा० १३।७।१।६] इति, तत्रायमनुवाको विनियुक्तः। "ब्रह्म वै स्वयम्भु तपोऽतप्यत" [शत० ब्रा० १३।७।१।१] इत्यभिधानात् सर्वमेधिकोऽयमनुवाकः। अस्यानुवाकस्य ब्रह्मा ऋषिः। आत्मदेवत्यः। सप्तमेऽहनि सर्वहोमे विनियुक्तः। तत्राद्ये द्वे ऋचावनुष्टुभौ। तदेवाग्निः अग्न्यादीनां यद् ब्रह्म अधिष्ठानं तदुपादानकारणं च, तदेव अयं प्रतीयमानोऽग्निः। तदेव तद् ब्रह्मैव आदित्योऽपि। तदेव वायुरपि। तदेव चन्द्रमाः। तदेव शुक्रम्। शुक्रं शुद्धं रागादिदोषप्रयुक्तिरहितं यत् शुक्रं तद् ब्रह्मैव। तद् ब्रह्म। ऋग्यजुःसामलक्षणं ब्रह्म [7]वेदः, ब्रह्म अपि तदेव ब्रह्मैव[8]। आपः [9]तदेव। तत् प्रजापतिः तदेव तद् ब्रह्मैव ॥ २३ ॥

[10]सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ॥ २४ ॥

[11]पुरुषादधि। अधीति सकाशवचनः। पुरुषात् सकाशात्। सर्वे निमेषाः परमाणुत्रुटिलक्षणाश्च। निमेषादयः कालावयवविशेषाः। सर्वे जज्ञिरे जाताः। विद्युतः [12]विद्युत्पर्जन्यादयः।

---

१ 'अहोरात्रे ये' इत्यस्य स्थाने 'अहोरात्र्यौ' इति–ख०। २ 'मुखम्' नास्ति–ख०। ३ मुखमीत–ख०। ४ 'इति' नास्ति–क०। ५ 'इदमिषाण इदं फलमिच्छ' नास्ति–क·ग०। ६ (मा० ३२।१)। ७ वेदम्–क०, देवम्–ख०। ८ ब्रह्म च–ख०। ९ 'तदेव' नास्ति–क·ख०। १० (मा० ३२।२)। ११ 'पुरुषादधि' नास्ति–क०, पुरुषादधीति–ख·ग०। १२ विद्युत्पर्जन्याश्च–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषादधि जज्ञिरे । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभदिति[1] । एनं साक्षादपरोक्षरूपं पुरुषं सर्वस्यापि जनकं [2]सन्तं सर्वसाक्षिणम् । न परिजग्रभत् न परिगृह्णाति । एवमूर्ध्वमूर्ध्वभागम् । न किञ्चिदपि प्रमाणं परिजग्रभत् न परिगृह्णाति न [3]स्पृशति न ज्ञापयतीत्यर्थः । तिर्यञ्चं पार्श्व-भागं न परिजग्रभत् । [4]मध्ये मध्यं न परिजग्रभत् । [अ]प्रसिद्धरूपतया प्रत्यक्ष[ऽ]गोचरत्वात्, स एव व्याप्तिग्रहणशून्यतयाऽनुमानस्याविषयत्वात्, अत एव पदपदार्थसंगतिग्रहण[ऽ]योगा-च्छब्द[स्य] प्रवृत्तिनिमित्त[5]दृष्टजात्यादेरभाव[व]त्त्वेन [च] अगोचरः पुरुषः । "स एष नेति नेत्यात्मा [अगृह्यो] नहि गृह्यते" [बृहदा० ३।९।२६] इत्यादिश्रुतेश्च ॥ २४ ॥

[6]न तस्य॑ प्रति॒मा अ॑स्ति॒ यस्य॒ नाम॑ म॒हद्यशः॑ ।
हि॒र॒ण्य॒ग॒र्भ इ॒त्ये॒षः ॥ २५ ॥

गायत्री आत्मदेवत्या । तस्य [7]पुरुषस्य प्रतिमा नास्ति । प्रतिमा प्रतिमानं [8]प्रतिमाभूतं किञ्चिदप्येतत्सदृशं नास्ति न दृश्यते । यस्य परमेश्वरस्य महद् यशः कीर्तिः । नाम [9]नमतीति नाम । महद्यश एव यस्य नाम तस्य प्रतिमा नास्तीति । हिरण्यगर्भ इत्येषः । परमात्मैव हिरण्यगर्भ इति वेदान्तवादिनो वदन्ति ॥ २५ ॥

[10]ए॒षो ह॑ दे॒वः प्र॒दिशोऽनु॒ सर्वाः॒ पूर्वो॑ ह जा॒तः स उ॒ गर्भे॑ अ॒न्तः ।
स ए॒व जा॒तः स ज॑नि॒ष्यमा॑णः प्र॒त्यङ् जना॑स्तिष्ठति स॒र्वतो॑मुखः ।
यस्मा॒न्न जा॒त इ॒त्ये॒षः ॥२६॥

[11]आत्मदेवत्या त्रिष्टुप् । एषो ह देवः । ह एष एव देवनादिगुणयुक्तो देवः । दिशः प्रदिशश्च सर्वा व्याप्यानुवर्तते तिर्यगूर्ध्वमधश्चेति । पूर्वो ह जातः । पूर्वः सर्वेभ्य उत्पत्ति-मद्भ्यः पदार्थेभ्यश्च पूर्व एव । करणत्वेन कारणत्वेन च यद्यदुद्भाव्यते तस्मादपि पूर्व एव । जातः सिद्ध इत्यर्थः । स्वभावतस्त्वेवंरूपोऽपि लीलया स उ स एव । गर्भे अन्तः । मातुरु-दरेऽन्तः स्थितः सन्नवतिष्ठते । स एव लीलया जातः स एव [च] जनिष्यमाण इति व्यपदिश्यते, द्वितीयस्याभावादेव । प्रत्यङ् जनाः । व्यत्ययः । जनानां प्रत्यङ् प्रत्यगात्मा भूत्वाभितिष्ठतीति ।

---

१ 'इति' नास्ति—ख-ग० । २ 'सन्तम्' नास्ति—ख० । ३ स्पृशति—क-ग० ।
४ 'मध्ये' नास्ति—ख० । ५ 'दृष्ट' इत्यस्य स्थाने 'षष्टि' इति—ख-ग०, 'इष्ट' इति—क० ।
६ (मा० ३२।३) । ७ परमपुरुषस्य—ख-ग० । ८ 'प्रतिमाभूतम्' नास्ति—ख० ।
९ नमयतीति—ग० । १० (मा० ३२।४) । ११ 'आत्मदेवत्या' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव सर्वतोमुखः । [1]तथा च गीतायाम्—"सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति" [गीता १३।१३] इत्यभिधीयते । यस्मान्न जात इति । यस्मात् परमेश्वरात् । जातोऽन्यो नास्त्येव वस्तुतः । अपि तु इत्येष इति । एवंरूपेण एष एव प्रतीयते नान्य इति ॥ २६ ॥

[2]वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीळम् ।

तस्मिन्निदꣳ सं च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु ॥२७॥

आत्मदेवत्या त्रिष्टुप् । वेनः कश्चिन्मेधावी श्रीहरिगुरुकारुण्यसंपन्नः । तद् ब्रह्मस्वरूपम् । पश्यत् पश्यति । निहितं गुहा । छान्दसो विभक्तिलोपः । गुहायां निहितम् । सर्वगृहगुहायां निहितमिव स्थितं दुर्दर्शमिव स्थितमपि तदेवं पश्यति । किं तदिति तदाह–यत्र विश्वं भवत्येकनीडम् । यत्र यस्मिन् स्वरूपे । इदं विश्वं सर्वविकारजातमेकनीडम् एकनिलयं पक्षिणामाश्रयस्थानमिव स्थितं विश्वं यत्र भवति प्रतिष्ठितं भवति । तस्मिन्निदं तस्मिन्नेव परमात्मनि । इदं विकारजातमपि चोपसंहारकाले समेति । समित्येकीभावे [निरु० १।३] । स्वकारणेनैकतामाप्नोति । सर्गकाले प्राप्ते पुनर्व्येति च उदेति । तस्मात् कारणात् स ईश्वरः । ओतः शरीरादिभावेन ओतः, जीवभावेन प्रोतश्च । पटतन्तुवदोतप्रोतभावेन प्रजासु विभूः यः स्वयम्भूर्वर्तत इति परमात्मा निरूप्यते स्तूयते च ॥ २७ ॥

[3]प्र तद्वोचेदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत् ।

त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥२८॥

आत्मदेवत्या त्रिष्टुप् । हिरण्यगर्भः प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वः । नु क्षिप्रम् । विद्वान् पण्डितः । शाश्वतं तदात्मतत्त्वमेव । नु क्षिप्रमेव[4] । प्रवोचेत् प्रब्रूयात् । धाम विभृतं गुहा सत् । तदात्मतत्त्वम् । गुहा गुहायामन्तःकर[ण? णे] । धाम प्रकाशरूपम् । विभृतं वि[वृ?द्ध]तम् । अन्तर्यामिरूपेण[5] लीलया विहरदासीत् । किं च, त्रीणि पदानि । निहिता निहितानि । गुहा गुहायामिव बहिरपि । अस्य [6]आवृतस्य परमात्मनः । त्रीणि पदानि निहितानि । त्रयः प[ा]दा बहिरपि निहिता अस्य । सर्गस्थितिलयाः, त्रयो

---

१ 'तथा च गीतायाम्' नास्ति—ख-ग० । २ (मा० ३२।८) । ३ (मा० ३२।९) ।
४ 'एव' नास्ति—ख० । ५ अन्तर्यामिरूपया—क-ग० । ६ अमृतस्य—उव० मही० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदाः, त्रयो लोकाश्च । त्रिशब्दो भूयसामुपलक्षणम् । भूयांसो हि गुणाः श्रूयन्ते सत्यकामादयः, जाग्रदादयो ह्यवस्थाश्च । यस्तानि त्रीणि पदानि[1] जानाति स आत्मा पितुः सर्वस्य जनको ब्रह्मा तस्य ब्रह्मणश्च पितुः पिता श्रीमहाविष्णुः । पिता सत् [2]भगवतस्तदात्मतत्त्वं प्रब्रूयादिति संबन्धः ॥ २८ ॥

[3]स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥ २९ ॥

आत्मदेवत्या त्रिष्टुप् । स एव ऋषिः । स परमात्मा ईश्वरः । नः अस्माकम् । बन्धुः बध्नात्यनुबध्नातीति निरुपाधिको बन्धुः । नः जनिता जनयिता । स च नः विधाता धारकः पोषकश्च । धामानि नः अस्माकम् । धामानि स्थानानि नामानि जन्मानि च । स एव वेद जानाति । विश्वानि भुवनान्यपि स एव वेद । यत्र देवाः । यत्र यस्मिन् वस्तुस्वरूपे । अमृतं मोक्षरूपम् । आनशानाः सम्यग्ज्ञानेन व्याप्नुवाना देवाः । द्योतनात्मके तृतीये त्रिपादलक्षणे ब्रह्मस्वरूपे । धामन् धामनि स्थाने । देवा अध्यैरयन्त अधिभावेन प्राप्तवन्त इति ॥ २९ ॥

[4]परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश ॥ ३० ॥

आत्मदेवत्या त्रिष्टुप् । परीत्य 'इण् गतौ' [१०४५ अदा०] । परीत्य भूतानि । भवन्तीति भूतानि । सर्वाणि भूतानि परीत्य परिज्ञाय, भूतानां तत्त्वं सम्यक्परीक्ष्य । परीत्य लोकान् । "लोकस्तु भुवने जने" [अमर० ३।३।२] । परिज्ञाय पर्यालोच्य । परीत्य सर्वाः प्रदिशो दिशश्च । सर्वा दिशः प्रदिशश्च [5]विदिशश्च परीत्य तत्र तत्रानुगतं यद्वस्तुतत्त्वं तत्सम्यङ्निरीक्ष्य अवधाय निश्चित्य । स्थितो विद्वान् पुनरपि—उपस्थाय प्रथमजामृतस्य । सत्यस्य ब्रह्मणः । प्रथमजां निःश्वासवत् समुद्गतां वाचम् ऋग्यजुःसामलक्षणां महावाक्यस्वरूपिणीम् । उपस्थाय संप्रा[र्थ्याप्य]। अत्रोपस्थानं नाम वाक्यस्थपदानां शक्तिविवेकद्वारेण वाक्यतात्पर्यावधारणम् । एवं वाक्यतात्पर्यं निश्चित्य वाक्यार्थज्ञानेन आत्मना स्वरूपेण केवलचिदानन्दमात्ररूपेण । आत्मानं

---

१ स आत्मा जानाति—क-ख-ग० । २ भगवता तदा—ख० । ३ (मा० ३२।१०) ।
४ (मा० ३२।११) । ५ दिशश्च—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वस्वरूपभूतं ब्रह्म । अभिसंविवेश अभिसंविशति । सर्वोपाधिपरित्यागेन स्वस्वरूपमेव प्राप्त इव भवतीत्यर्थः ॥ ३० ॥

[1]परि॒ द्यावा॑पृथि॒वी स॒द्य इ॒त्वा परि॑ लो॒कान्परि॑ दि॒शः परि॒ स्वः॑ ।
ऋ॒तस्य॒ तन्तुं॒ वित॑तं वि॒चृत्य॒ तद॑पश्य॒त्तद॑भव॒त्तदा॑सीत् ॥ ३१ ॥

आत्मदेवत्या त्रिष्टुप् । स्वस्वरूपप्राप्तिप्रकारं पुनर्विविनक्ति—[2]परि द्यावापृथिवीति । द्यावापृथिव्यौ [परि] इत्वा परीत्य परिज्ञाय तत्संप्राप्य च । एवं लोकान् [3]परीत्य दिशः [3]परीत्य । स्वः [4]स्वर्गलोकं स्वः आदित्यं च [5]परीत्य परिदृष्ट्वा स्वोपाधिपरित्यागेनादित्यस्वरूपेण च सच्चिदानन्दस्वरूपेण संप्राप्य । ऋतस्य यज्ञादेः । तन्तुम् अदृष्टरूपम् [6]अनेकभोगोपहेतुम् । विततं विस्तृतम् अनेकजन्मार्जितं च । सम्यग्ज्ञानेन विचृत्य विच्छिद्य परिसमाप्य उपसंहृत्य ज्ञानाग्निना दग्ध्वेत्यर्थः । तद्ब्रह्म अपश्यत् साक्षात्करोति । तदभवत् । ब्रह्मात्मभेदनिर्वचनेन स्वयं तद्ब्रह्माभवत् । तदासीत् । आसीद् अहङ्काराज्ञानयोर्निःशेषनिवृत्त्या ब्रह्मैवासीदित्यनुवादः ॥ ३१ ॥

मेधाफलमिदं श्रुत्वा कश्चिन्मेधाकामो मेधां याचते द्वाभ्याम्—

[7]सद॑स॒स्पति॒मद्भु॑तं प्रि॒यमिन्द्र॑स्य॒ काम्य॑म् ।
स॒निं मे॒धाम॑यासिषꣳ स्वाहा॑ ॥ ३२ ॥

सदसस्पतिदेवत्या गायत्री । सदसस्पतिं ([8]यज्ञसदसः पतिं यज्ञगृहस्य पतिम् । अद्भुतमत्यभिनवमाहात्म्यमचिन्त्यशक्तिम् । प्रियमात्मरूपम् । इन्द्रस्य काम्यं कामसंयुक्तं कामनार्हं कमनीयम् । एवंगुणविशिष्टं सदसस्पतिम् । सनिं दानम् । सामान्येन दाननिर्देशः । मेधां च । [मेधा] धारणावती धीः, तां मेधाम् । अयासिषं याचे । द्विकर्मकोऽयं धातुः । सदसस्पतिं याचे, मेधां याच इति । स्वाहेति होमार्थः ॥ ३२ ॥

[9]यां मे॒धां दे॑वग॒णाः पि॒तर॑श्चोपास॑ते ।
तया॒ माम॒द्य मे॒धया॑ग्ने मे॒धावि॑नं कुरु॒ स्वाहा॑ ॥ ३३ ॥

---

१ (मा० ३२।१२) । २ 'परि द्यावापृथिवीति' नास्ति—क० । ३ परित्वा—ख० ।
४ स्वर्गं लोकम्—ख० । ५ परित्वा—क-ख-ग० । ६ अनेकभोगाय हेतुम्—क-ग० । ७ (मा०३२।१३) ।
८ 'यज्ञसदसः पतिम्' इत्यारभ्याध्यायसमाप्तिपर्यन्तं कोष्ठकान्तर्गतः पाठः खपुस्तके नास्ति, तत्र ९६–१०१ संख्यकानां पत्राणां त्रुटितत्वात् । ९ (मा० ३२।१४) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आग्नेय्यनुष्टुप्, यजुरन्ता । मेधाकामोऽनया मेधां याचते । हे श्रीभगवन्नग्ने, मेधां देवगणा उपासते प्रार्थयन्ते । पितरश्च उपासते । तया मेधया । अद्य अस्मिन्नहनि । मां मेधाविनं कुरु । स्वाहेति होमार्थः ॥ ३३ ॥

श्रीकामोऽनेन मन्त्रेण श्रियं याचते—

[1]इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ ३४ ॥

श्रीदेवत्याऽनुष्टुप्[2], यजुरन्ता । इदं ब्रह्म ब्राह्मणजातिः, क्षत्रं च क्षत्रियजातिश्चेत्येते उभे ब्रह्मक्षत्रे । मे मदीयाम् । श्रियमश्नुतामुपजीवताम् । अत एव मयि देवाः देवनादिगुण-युक्ता देवाः । उत्तमामुत्कृष्टां विच्छेदरहिताम् । श्रियं धनधान्यादिसम्पदम् । दधतु स्थापयन्तु । तस्यै श्रियै देवतायै तुभ्यम् । स्वाहेति होमार्थः ॥ ३४ ॥

'अपेतः' [३५।३५–५५] इत्यनुवाकः [3]पितृदेवत्यः । आदित्य[स्या]र्षं देवानां वा । पलाशशाखया [4]व्युदूहति [का० श्रौ० २१।३।३१; शत० ब्रा० १३।८।२।३]—

[5]अपेतो यन्तु पणयोऽसुम्ना देवपीयवः ।
अस्य लोकः सुतावतः ॥ ३५ ॥

पितृदेवत्या गायत्री । अप इतः पणयः । इतः अस्मात् श्मशानस्थानलक्षणात् स्थानात् । पणयः असुराः । अपयन्तु अपगच्छन्तु । पुनश्च कथंभूता पणयः ? असुम्नाः । सुम्नं सुखं न विद्यते येषां तेऽसुम्ना असुखकराश्च । देवपीयवः । पीयतिर्हिंसाकर्मा [निरु० ४।२५] । देवान् पीयन्ति घ्नन्ती[ति] देवपीयवः देवानां हिंसितारः पणय इतोऽपयन्तु । किमिति ? अस्य लोकः सुतावतः । सुतवतः लोकस्थानं सुतवतः सोमाभिषवं कृतवतः सोमयाजिनोऽस्य यजमानस्यायं लोकः, न तु युष्माकमिति ॥ ३५ ॥

दक्षिणां शाखां निरस्य [ति?]····परिश्रयति [का० श्रौ० २१।३।३२]—

[6]द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥ ३६ ॥

---

१ (मा० ३२।१६) । २ त्रिष्टुप्–क-ग० । ३ 'पित्र्यः' इति गपुस्तकस्थः पाठः, "पितृदेवत्यः" इति च तस्यार्थस्तत्रैव टिप्पण्याम् । ४ व्यूहति–क-ग० । ५ (मा० ३५।१) । ६ द्युभिरिति मन्त्रो माध्यन्दिनसंहितायामपेत इति मन्त्रस्यैवान्तिमो भागः, काण्वसंहितायां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितृदेवत्या [1]गायत्री । द्युभिः । द्युशब्देन श्रुतौ ऋतवोऽभिधीयन्ते । द्युभिः ऋतुभिः । अहोभिः प्रसिद्धैः । अक्तुभिः रात्रिभिः । व्यक्तं स्पष्टम् । [क्षि क्षये ?] । अवस्यन्त्यस्मिन्निति अवसीयत इति वा अवसानं शवसंस्कारस्थानम् । अस्मै यजमानाय । यमो ददातु ॥ ३६ ॥

[2]सविता ते शरीरेभ्यः पृथिव्याँ लोकमिच्छतु ।
तस्मै युज्यन्तामुस्रियाः ॥ ३७ ॥

पितृदेवत्या गायत्री । सविता ते तव यजमानस्य तव । शरीरेभ्यः । व्यत्ययः । शरीराणाम् । अस्यां पृथिव्याम् । लोकं स्थानम् । सविता इच्छतु सविता अनुजानातु । तस्मै क्षेत्राय शरीराय । संस्कारार्थं युज्यन्ताम् । तस्मै सवित्रा अनुज्ञातक्षेत्राय क्षेत्रगमनाय । उस्रियाः रश्मिसंबन्धिनोऽनड्वाहः । युज्यन्तां नियुज्यन्ताम् ॥ ३७ ॥

सीताः कृषति [का० श्रौ० २१।४।१]—

[3]वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा ।
विमुच्यन्तामुस्रियाः ॥ ३८ ॥

पितृदेवत्या गायत्री । पुनातिरत्र विदारणार्थः । वायुः पुनातु विदारयतु । अग्नेर्भ्राजसा सूर्यस्य वर्चसा दीप्त्या । सविता पुनातु विदारयतु । विमुच्यन्तामुस्रियाः अनड्वाहः । विमुच्यन्तां विमोक्षणं क्रियन्ताम् ॥ ३८ ॥

[4]सर्वौषधं वपति [का० श्रौ० २१।४।४]—

[5]अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ३९ ॥

[6]अयं मन्त्रो व्याख्यातः [१२।८०] ॥ ३९ ॥

च परवर्तिनः सविता त इति मन्त्रस्यादिमोंऽशः । अत्रानन्दबोधेन त्वेष पृथगेव व्याख्यातः ।
१ परं यजुः—सर्वा० । २ (मा० ३५।२) । ३ (मा० ३५।३) ।
४ सर्वौषधिं वाचयति—क-ग० । ५ (मा० ३५।४) । ६ 'अयम्' नास्ति—ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीराणि निवपति [का० श्रौ०२१।४।५]—

[1]सविता ते शरीराणि मातुरुपस्थ आवपतु। तस्मै पृथिवि शं भव।
प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ ॥ ४० ॥

पितृदेवत्या गायत्री। शरीराणि शरीरोपलक्षितानि [2]अस्थीनि। मातुः पृथिव्याः। उपस्थे उत्सङ्गे। सविता ते तव। आवपतु स्थापयतु। तस्मै पृथिवि। तस्मै अस्थिरूपाय यजमानाय। शं सुखं सुखरूपिणी भव। [3]प्रजापतौ त्वेति यजुः। प्रजापतौ देवतायाम्। उपोदके उदकसमीपे। लोके स्थाने। त्वा अस्थिभूतं त्वाम्। निदधामि स्थापयामि। असौ। असाविति नामग्रहणम् ॥ ४० ॥

[4]परं मृत्यो अनु परेहि पन्थाँ यस्ते अन्य इतरो देवयानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥ ४१ ॥

मृत्युदेवत्या त्रिष्टुप्। परं मृत्यो अनु परा इहि पन्थाम्। पन्थानम्। हे मृत्यो परं पन्थां [5]परानु इहि पराङ्मुखो भूत्वा गच्छ। यस्ते अन्य इतरो देवयानादिति[6] पन्थानं विशिनष्टि। यस्ते त्वदीयोऽयं[7] पन्थाः। तस्माद्देवयानात्। अस्माद्देवयानमार्गादितरः स्वरूपतः पृथक्। अन्यश्च नामतोऽपि पितृयान इति। तं पितृयानं पन्थानं गच्छ। चक्षुष्मते अतिशयेन चक्षुरस्यास्तीति चक्षुष्मान्, तस्मै। शृण्वते श्रवणं कुर्वते। ते तुभ्यं ब्रवीमि। नहि त्वया अदृष्टमश्रुतं विद्यते। मा नः प्रजां रीरिषो मोत वीरान्। नः अस्माकम्। प्रजां त्वं मा रीरिषः मा हिंसीः। उत अपि च। वीरान् पुत्रान् मा रीरिषः। स्नेहविशेषाद्विभज्य वचनम् ॥ ४१ ॥

[8]शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन् ॥ ४२ ॥

पितृदेवत्याऽनुष्टुप्[9]। शं वातः। ते तव एवंविधस्य यजमानस्य। शं वायुः। शं सुखरूपो भूयात्। शं हि ते घृणिः। घृणिः सूर्यः शं भूयात्। शं ते भवन्त्विष्टकाः। अत्र स्थापिताः।

---

१ (मा० ३५।५-६)। २ स्थानानि—क-ग०। ३ 'प्रजापतौ त्वेति' नास्ति—क०।
४ (मा० ३५।७)। ५ अनु परा—उव०। ६ 'इति' नास्ति—क०।
७ 'अयम्' नास्ति—क०। ८ (मा० ३५।८)। ९ त्रिष्टुप्—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते शं भवन्तु। शं ते भवन्त्वग्नयः। शं भवन्तु। पार्थिवासः पृथिवीसंबन्धिनोऽग्नयः। त्वा त्वाम्। मा अभि[शो ? शू]शुचन् तव मा शोकं कुर्युरिति ॥ ४२ ॥

जपति—

[1]कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।
अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥ ४३ ॥

वैश्वदेवी बृहती। ते तुभ्यम्। दिशः शिवतमाः कल्पन्ताम्। आपश्च तुभ्यं शिवाः शिवतमाः शान्ततमाः कल्पन्ताम्। तुभ्यं सिन्धवः नद्यः शिवतमा भवन्तु। अन्तरिक्षं तुभ्यं शिवतमं भवतु। कल्पन्तां ते दिशः सर्वाः। दिशो विदिशश्च शिवतमाः कल्पन्ताम् ॥ ४३ ॥

[2]अश्मन्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः।
अत्रा जहीमोऽशिवा ये असन्छिवान्वयमुत्तरेमाभि वाजान् ॥ ४४ ॥

वैश्वदेवी त्रिष्टुप्। [3]सुचीकः [ऋषिः]। अश्मन्वती। [4]अश्मवतीयं नदी पाषाणवती। रीयते। 'ऋ गतौ' [१४९८ क्र्यादिः] रीयते अस्माभिर्गम्यते। यतो विषमा अतो ब्रूमः। संरभध्वमुत्तरणे यत्नं कुरुध्वम्। अतस्तदुत्तरणार्थमुत्तिष्ठत सखायः अभिमुखा भवत। प्रतरता प्रतरत प्रतारयत वा, प्रतरणं कुरुत कारयतेति वा। किं तद्व्याहर इति। अत्र ये अशिवा अशान्ता [5]असन् अशिवा आसन्। तान् जहीमः त्यजामः। शिवान् वाजान् अन्नविशेषान्। अभि प्रति। उत्तरेम वयमतितरेम ॥ ४४ ॥

अपामार्गैरपमृजते[6] [का० श्रौ० २१।४।२२]—

[7]अपाघमप किल्बिषमप कृत्यामपो रपः।
अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव ॥ ४५ ॥

लिङ्गोक्तदेवत्याऽनुष्टुप्[8]। शुनःशेप ऋषिः। इयं दुःस्वप्ननाशनी। हे अपामार्ग, त्वम्। अघं सामान्यतः। अस्मत् अस्मत्तः। अपसुव अपगमय। अप किल्बिषम् अभक्ष्यभक्षणनिमित्तं पापम्। अस्मत्तः अपसुव अपगमय। अप कृत्यां निन्दितप्रवृत्तिम्। अस्मत् अस्मत्तः। दूरत एव

---

१ (मा० ३५।९)। २ (मा० ३५।१०)। ३ सूचीकः—क-ग०। ४ अश्मवतामियम्—ग०। ५ अस्मासु—क-ग०। ६ अपमृशति—क-ग०। ७ (मा० ३५।११)। ८ त्रिष्टुप्—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपसुव । रप इति पापनाम [निरु० ४।२१] । अपो रपः । पापम् अपसुव अपगमय । [पापं] महापातकोपपातकसंकरीकरणमलिनीकरणप्रकीर्णकादि । केचित्तु [1]चतुर्विधानि पापानि चतुर्भिर्वर्ज्यैरपनुदत्विति [व्याचक्षते] । अप दुःस्व[प्नं ? प्न्यं] दुःस्वप्नप्रयुक्तं दुःस्वप्नफलस्य हेतुभूतं दुरितम् । अस्मत् [अस्मत्तः] । अपसुव अपगमयेति ॥ ४५ ॥

[2]सुमित्रिया न इति स्नाति [का० श्रौ० २१।४।२३]—

[3]सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ ४६ ॥

मन्त्रोऽयं[4] व्याख्यातः [६।२१] ॥ ४६ ॥

अनड्डुत्पुच्छमन्वारभ्य [का० श्रौ० २१।४।२३]—

[5]अनड्वाहमन्वारभामहे स्वस्तये ।
स न इन्द्र इव देवेभ्यो वह्निः संतारणो भव ॥ ४७ ॥

आनडुह्यनुष्टप् । शुनःशेपः । अनड्वाहमन्वारभामहे अनड्डुत्पुच्छमन्वारभामहे, अन्वारम्भणं कुर्मः । कस्मै ? स्वस्तये अविनाशाय । स वह्निः वहनाद्वह्निः अग्निः । नः अस्माकम् । संतारणः संतारकः । भव भवतु । इन्द्र इव देवेभ्यः । इन्द्र इव यथा देवानां सर्वापद्भ्यः संतारको वर्तते, तथाऽग्निरस्माकं संतारणः संतारकः । भव भवतु ॥ ४७ ॥

[6]उत्क्रामन्ति —

[7]उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ४८ ॥

व्याख्यातोऽयं[8] मन्त्रः [२२।६] ॥ ४८ ॥

---

१ चतुर्भिर्वर्ज्यैः कायिकवाचिकमानसपरकृताभिचाररूपैश्चतुर्विधानि पापानि हे अपामार्ग भवान् अपनुदत्विति योजना । २ 'सुमित्रिया न इति स्नाति' नास्ति–क० । ३ (मा० ३५।१२) । ४ 'अयम्' नास्ति–ग० । ५ (मा० ३५।१३) । ६ आगच्छन्ति–का० श्रौ० [२१।४।२३] । ७ (मा० ३५।१४) ८ 'अयम्' नास्ति–ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[[1]अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ ४८ ॥]

जुहोति [का० श्रौ० २१।४।२५]—

[2]आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमान्स्वाहा ॥ ४९ ॥

आग्नेयी त्रिष्टुप्, यजुरन्ता । [3]वैश्वानरः । हे श्रीभगवन्नग्ने, हविषा वृधानः । हविषा वर्धमानः । घृतप्रतीकः घृतमुखः । घृतयोनिः घृतं योनिः कारणं स्थानं यस्य स घृतयोनिः । एधि वर्धस्व । घृतप्रतीको भव । घृतं पीत्वा मधु चारु । मधुमत् स्वादु रुचिकरम् । गव्यं गोभ्यो हितम्, गवां घृतं पीत्वा । पितेव । [पिता] पुत्रं यथाभिरक्षति तथेमान् यजमानान् एवं-दशामापन्नान् रक्षतात् । इत उत्तरकालं सुखं यथा भवति तथाभिरक्षतादिति । स्वाहेति होमार्थः ॥ ४९ ॥

ग्रामश्मशानान्तरे मर्यादालोष्टं निदधाति [का० श्रौ० २१।४।२४]—

[4]इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ ५० ॥

मृत्युदेवत्या त्रिष्टुप् । [5]सङ्कसुक ऋषिः । इमं जीवेभ्यः । इमं लोष्टम् । जीवेभ्यः अर्थाय । [6]परिधिं परिधीयत इति परिधिस्तं लोष्टम् । दधामि स्थापयामि । किमिति ? मैषां नु गात् । एषां नु गात् । अपरः जीवानां मध्ये अपरः अस्मादपि । नु क्षिप्रम् । मा अगात् । पितृलोकमिति [वि?]शेषः । पितृलोकं मा गच्छेत् । अर्थमेतम् एतमर्थं पुरस्कृत्य प्रार्थयामः । शतं जीवन्तु शरदः पुरूचीः । [7]यज्ञाञ्चनाः दानाध्ययनयागाद्यञ्चनवतीः शरदः । सर्वे जीवाः जीवन्तु । अन्तर्मृत्युं दधतां पर्वतेन । मृत्युमन्तर्दधतामन्तर्धानं तिरोधानं कुर्यात् ॥ ५० ॥

---

१ (मा० ३५।१६)। एष मन्त्रोऽग्नानन्दबोधेन नैव स्थापितो न च व्याख्यातः । अस्य व्याख्यानम् [१९।३८] द्रष्टव्यम् । २ (मा० ३५।१७) । ३ वैखानस ऋषिरिति पाठेन भाव्यम् । द्रष्टव्या—सर्वा० ।
४ (मा० ३५।१५) ।   ५ सङ्कुसुक—क-ग० ।   ६ पुधिरे—क-ग० ।
७ 'यज्ञाञ्चनाः' इत्यत्र—"बह्वञ्चनाः" इति पाठान्तरम्—ग० टि० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथैषां [1]परिदां वदन्ति [का० श्रौ० २१।४।२६]—

[2]परीमे गामनेषत पर्यग्निमहृषत ।
देवेष्वक्रत श्रवः क इमाँ२ आदधर्षति ॥ ५१ ॥

ऐन्द्री अनुष्टुप् । [3]भरद्वाज ऋषिः । परि इमे गामनेषत । इमे जीवाः । गां भूमिम् । पर्यनेषत । नयतेर्लुङि सिच एतद्रूपम्[4] । परितोषं गमयन्ति । पर्यग्निमहृषत । परि अग्निं परि अहृषत हवींषि प्रापयन्त । देवेष्वक्रत श्रवः । अकृषत । कीर्तिर्देवेषु ऋत्विक्षु अक्रत । अकृषतेति प्राप्ते सिचो लोपः । [अत्रोधनम् अक्रमः ?] । इमान् जीवान् कृतकृत्यान् । कः को नाम आदधर्षति धर्षणं कः करोति ॥ ५१ ॥

अद्वारेणौपासनं निरस्यति[5] [का० श्रौ० २१।४।२७]—

[6]क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ५२ ॥

आग्नेयी त्रिष्टुप् । [7]दमन ऋषिः । क्रव्यम् आमिषमत्तीति क्रव्यात्, तं क्रव्यादं शवदाहदूतकर्माणमग्निम् । प्रहिणोमि प्रक्षिपामि । यमराज्यं गच्छतु रिप्रवाहः । रिप्रमिति पापनाम [निरु० ४।२१] । रिप्रं पापं वहतीति रिप्रवाहः शवदाहकोऽग्निः । यमराज्यं यमलोकं गच्छतु । इहैवायमितरो जातवेदाः । क्रव्यादग्नेरितरः अन्यः । जातवेदाः सवि[ज्ञः ? द्यः] योऽग्निः [स] इहैव तिष्ठत्विति । स च देवेभ्यो हव्यं वहतु प्रजानन् । देवेभ्यः देवतार्थम् । हविः प्रजानन् देवानां हविर्भागमवगच्छन् । हव्यं वहतु हविर्योग्यं हव्यं प्रापयतु ॥ ५२ ॥

[8]वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके ।
मेदसः कुल्या उप तान्स्रवन्तु सत्या एषामाशिषः सन्तु कामाः स्वाहा ॥५३॥

जातवेदसी[ति?] त्रिष्टुप् । हे जातवेदः, पितृभ्यो वपां वह प्रापय । यत्रैनान् वेत्थ । यत्र यस्मिन्पराकेऽतिदूरदेशे निहितान् एतान् पितॄन् । वेत्थ जानासि । तत्रत्येभ्यः पितृभ्यो हव्यं

१ परिधीन् दधाति—क-ग० । २ (मा० ३५।१८) । ३ भारद्वाजः शिरिम्बिठः—सर्वा० ।
४ अनर्टर्लिटि शिब्येतद् रूपम्—क-ग० । ५ उद्धारणोपासनम्—क-ग० । ६ (मा०३५।१९) ।
७ मदन—क०, मदन—ग० । ८ (मा० ३५।२०) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वहतु। मेदसः कुल्या उप तान् स्रवन्तु। तान् पितॄन् प्रति। मेदसः कुल्याः सरितः। उपस्रवन्तु समीपं गच्छन्तु। सत्या एषाम्। एषां दातॄणां यजमानानाम्। आशिषः अभीष्टस्यार्थस्य आशंसनानि आशिषः। सत्याः अवितथाः। सन्तु भवन्तु। कामाश्च आशिषो मूलभूताः। ते च सत्याः सन्तु। स्वाहा सुहुतमस्तु॥ ५३॥

[1]स्योना पृथिवि नो भवानृक्षरा निवेशनी।
यच्छा नः शर्म सप्रथाः॥ ५४॥

पृथिवीदेवत्या गायत्री। ऋषिर्मेधातिथिः। हे पृथिवि, नः अस्माकम्। स्योना। स्योनमिति सुखनाम [निघ० ३।६; निरु० ८।६] सुखरूपा भव। अनृक्षरा ऋक्षरः कण्टकः न विद्यते ऋक्षरः कण्टको यस्यां सा अनृक्षरा अकण्टका निष्कण्टका। अनृक्षराग्रहणं चौर्यदायादादिनिवृत्त्यर्थम्, तेषामसुखकरत्वात्। निवेशनी नितरां वेशनी, [प्र ?]वेशनं प्रतिष्ठा अस्यास्तीति निवेशनी। सप्रथाः प्रथसा पृथुभावेन सह वर्तत इति सप्रथाः सर्वतो बहुरूपा। शर्म। अस्माकं नः। शरणं गृहम्, "शरणं गृहरक्षित्रोः" [अमर० ३।३।५३] इत्यभिधानात्। यच्छ प्रयच्छ॥ ५४॥

[2]अप नः शोशुचदघम्॥ ५५॥

शोशुचदघम्। व्यत्ययः। नः अस्माकम्। अघं पापजातम्। अपेति परीत्यर्थे। परिशोशुचत् परिशोधय॥ ५५॥

[3]आहुतिं जुहोति [का० श्रौ० २५।७।४०]—

[4]अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः।
असौ स्वर्गाय लोकाय स्वाहा॥ ५६॥

आग्नेय्यनिरुक्ता गायत्री, यजुरन्ता। ऋषिरादित्यः। अस्मात्त्वमधिजातोऽसि। हे भगवन्नग्ने, अस्मात् यजमानात्। [अधिः] अधिकारार्थः। आधानकाले इमं यजमानमधिकृत्य जातोऽसि। ततस्त्वां ब्रवीमि। त्वदयं जायतां पुनः। अयं यजमानः। त्वत् त्वत्तः। पुनर्जायतां

---

१ (मा० ३५।२१)। २ काण्वमाध्यन्दिनसंहितयोः पूर्वमन्त्रस्यैवायमन्तिमोंऽशः, अत्रानन्दबोधेन तु पृथग् व्याख्यातः। ३ 'जुहोति' इत्येव–क-ग०। ४ (मा० ३५।२२)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टकुले समुत्पद्यताम् । असाविति यजमानस्य विशेषनामवचनम् । तद्यथा—एतन्नामायं देवदत्तः । स्वर्गाय लोकाय स्वर्गलोकप्राप्त्यर्थम् । त्वत्तो ह्ययं जातः पुनस्त्वद्वश्यः स्यादित्यभिप्रायः । स्वाहा सुहुतमस्तु ॥ ५६ ॥

[1]अप॑ नः॒ शोशु॑चद॒घम् ॥ ५७ ॥

[2]अयं मन्त्रो व्याख्यातः [३५।५५] ॥ ५७ ॥

अथ पुरुषसूक्तस्नपनं व्याख्यास्यामः । प्रतिष्ठान्ते मासान्ते पुण्यकाले देवाभिमुखे गोमयेनोपलिप्य, पञ्चवर्णैरलंकृत्य तन्दुलैर्व्रीहिभिर्वा, पञ्चविंशतिपदं पञ्चभागीकृत्य, क्षेत्रे विभज्य, [3]स्वलंकृताभ्यो वा कुम्भकलशान् विन्यस्य, यवाक्ष[त?तं] म[ङ्गु?ङ्ग]ल्यान्तरं वा तन्तुना परिवेष्ट्य, अद्भिः प्रक्षाल्य पूरयित्वा [4]च, वस्त्रमावेष्ट्य, [5]सुवर्णं) निक्षिप्य, प्रणवेन त्वर्चां निधाय, [6]प्रागाद्यष्टपदेषु पुष्पोदकक्षीरोदकगन्धोदकाक्षतोदकफलोदककुशोदकरत्नोदकजप्योदकानि स्थापयित्वा, इन्द्रादिप्रादक्षिण्येन षोडशपदेषु शुद्धोदकानि विन्यस्य, एकैकं प्रधानं द्वौ द्वावुपस्थानानि कल्पयेत् । मध्ये श्रियमावाह्य, अर्चयित्वा, [7]ततः पूर्वां दिशमारभ्य शङ्खचक्रगदापद्मानि क्रमेणार्चयित्वा, 'सहस्रशीर्षा' [३५।१] इत्यादिषोडश ऋग्भिः स्नापयित्वा, [8]ततो वैष्णवैः 'अतो देवाः' [ऋग्वे० १।२२।१६] आदिमन्त्रैः सप्तभिः[?]स्नापयित्वा, 'विष्णोर्नुकम्' [५।२४] इति स्नपनं करोति । [9]'सहस्रशीर्षं देवम्' [महाना० ११।१] इति कुम्भतोयेन स्नापयित्वा सर्वोपचारैरर्चयेत् । कुम्भकलशमध्ये हारिद्रचूर्णेन सर्वसंपत्करमिति विज्ञायते ॥

इति [10]शुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

---

१ काण्वसंहितायां पूर्वमन्त्रस्यैवायमन्तिमोंऽशः । माध्यन्दिनसंहितायां तु नैवास्ति ।
२ 'व्याख्यातम्' इत्येव–ग० । ३ सुवासिनीभ्यः कुमारीभ्यो वेति शेषः । ४ 'च' नास्ति–ग० ।
५ १२९ तमपृष्ठस्थकोष्ठकादारभ्यात्रत्यकोष्ठकसमाप्तिपर्यन्तो भाष्यभागः खपुस्तके नास्ति, तत्र ९६–१०१ मितानां षट् पत्राणां त्रुटितत्वात् । ६ प्राणादि–ख० । ७ 'ततः पूर्वां''''पद्मानि' नास्ति–ख० । ८ 'ततः' नास्ति–ख० । ९ सहस्रशीर्षं पुरुषं देवम्–क-ख-ग० ।
१० काण्ववेदमन्त्रभाष्यसंग्रहे–ख०, श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे–ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

षट्त्रिंशोऽध्यायः

[1]ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये।
वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

ऋचं वाचमिति पञ्चाध्यायान् दध्यङ्ङाथर्वणो ददर्श, अग्निकाश्वमेधिकवर्जम्। अतस्तेषां दध्यङ्ङाथर्वण ऋषिः। अग्निका 'उग्रश्च भीमश्च' [३९।६] इत्येवमादयः। 'अग्निᳪ हृदयेन' [३९।७] इत्याश्वमेधिकाः। तेषामग्निकानामाश्वमेधिकानां च ऋषिः प्रजापतिः। [2]तत्राद्योऽध्यायः शान्त्यर्थः। तत्राद्यो [3]वैश्वदेवः। तत्राद्यानि यजूंषि [4]लिङ्गोक्तदेवत्यानि। ऋचं वाचं प्रपद्ये। प्रसिद्धां वाचम्। ऋचम् ऋग्वेदम्। प्रपद्ये जानामि, शरणं प्रपद्य [5]इति वा। [वाचि ऋग्-] दृष्टिः कार्या। यन्मनस्तद्यजुः प्रपद्ये, मनसि यजुर्दृष्टिः कार्या। साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये वागोजः सहौजः। [6]सह ओजः। एतानि बलरूपाणि [7]मयि तिष्ठन्तु। प्राणापानौ। तौ च मे तिष्ठताम् ॥ १ ॥

[8]यन्मे च्छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

बृहस्पतिदेवत्या पङ्क्तिः। यन्मे मम चक्षुषः यच्छिद्रम्, 'छिदिर् अवखण्डने [द्वैधीकरणे]' [१४४१ रुधादिः]। हृदयस्य। हृदयशब्देन बुद्धिरुपलक्ष्यते, बुद्धेर्यच्छिद्रमवखण्डनम् [9]अपूर्णताजातम्। [10]मनसो वाऽतितृण्णम्। मनः सुखादिरूपम्, [11]तस्य अतिविहिंसितं प्रवर्ग्यकरणेन। तत्सर्वं मे चक्षुरादेः प्राप्तं दोषं स बृहस्पतिर्दधातु। छिद्रादिदोषं परिहृत्य पूर्वसंस्थं [12]करोतु।

---

१ (मा० ३६।१)। अध्यायारम्भे-'श्रीकृष्णाय नमः॥ हरिः ॐ' इति-ख०, 'हरिः ॐ' इति-ग०। २ 'तत्राद्योऽध्यायः शान्त्यर्थः' नास्ति-ख०। ३ विश्वेदेवः-क ख०।
४ 'लिङ्गोक्तदेवत्यानि' नास्ति-ख०। ५ इति च वाग्दृष्टिः कार्या-ख०।
६ 'सह ओजः' नास्ति-ख०। ७ 'मयि तिष्ठन्तु' नास्ति-ख०। ८ (मा० ३६।२)।
९ अपूर्वता-ख०। १० 'मनसो वाऽतितृण्णम्' नास्ति-ख०।
११ 'तस्य अतिविहिंसितम्' नास्ति-ख०। १२ 'करोतु' नास्ति-ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शं नो भवतु भुवनस्य यस्पतिः। भुवनस्य भूतजातस्य। यः पतिः [1]अधिपतिः प्रवर्ग्यरूपो यज्ञः स [बृहस्पतिर्दधात्विति। बृहस्पतिरित्यनुषङ्गः?]। नः[2] अस्माकम्। शं भवतु [3]सुखं भवतु ॥ २ ॥

[4]भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात् ॥ ३ ॥

[5]कया नश्चित्र आभुवदूती सदावृधः सखा।
कया शचिष्ठया वृता ॥ ४ ॥

[6]कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः।
दृळ्हा चिदारुजे वसु ॥ ५ ॥

[7]अभी षु णः सखीनामविता जरितॄणाम्।
शतं भवास्यूतिभिः ॥ ६ ॥

[8]एते मन्त्रा व्याख्याताः [३।४३; २६।४४–४६]। अत्र–'शतं भवास्यूतिभिः' इति पाठः। ऊतिभिः [9]अवनैः ॥ ३–६ ॥

[10]कया त्वं न ऊत्याभि प्रमन्दसे वृषन्।
कया स्तोतृभ्य आभर ॥ ७ ॥

इन्द्रदेवत्याऽनिरुक्ता गायत्री। [11]हे वृषन्, सेचक हे इन्द्र। कया ऊत्या केन [12]अवनेन। [13]नः अस्मान्। त्वम् अभिप्रमन्दसे अभिमोदयसि। किं च, केन अवनेन [14]रक्षणेन निमित्तेन। स्तोतृभ्यः तव स्तोतृभ्यः प्रदानाय। आभर [15]आहरसि। [16]अर्थमिति शेषः ॥ ७ ॥

---

१ 'अधिपतिः' नास्ति–ख०। २ "नः बृहस्पत्येवमिष्टानामस्माकम्" इति–ग० टि०। ३ 'सुखं भवतु' नास्ति–ख०। ४ (मा० ३६।३)। ५ (मा० ३६।४)। ६ (मा० ३६।५)। ७ (मा० ३६।६)। ८ 'भूर्भुवः स्वरिति, कया नः, कस्त्वा, अभी षु ण इति च मन्त्रा व्याख्याताः–ख-ग०। ९ सवनैः–ख०। १० (मा० ३६।७)। ११ हे वषट्कार हे इन्द्र–ख०। १२ सवनेन–ख०। १३ 'नः अस्मान्' नास्ति–ख०। १४ रक्षणनिमित्तेन–ख०। १५ 'आहरसि' नास्ति–ख०। १६ 'अर्थम्' नास्ति–क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]इन्द्रो विश्वस्य राजति ।

शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥

ऐन्द्री[2] [त्रि१द्वि]पदा विराट् । विश्वस्य सर्वस्य जगतः । इन्द्रः सर्वाधिपतिः । राजति देदीप्यते ईष्टे वा । तस्य प्रसादात्, शं नो अस्तु । नः अस्माकं सुखमस्तु । किं च, द्विपदे मनुष्येभ्यः । शं सुखमस्तु । व्यत्ययो वा । द्विपदां चतुष्पदां च शमिति । चतुष्पदे पश्वादिभ्यः । शं सुखमस्तु ॥ ८ ॥

[3]शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।

शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥

'शं नो मित्रः' इति, 'शं नो वातः' इति च द्वे अनुष्टुभौ शान्त्याशीर्देवत्यौ । [4]महावीरस्य प्रसादात् । शं नो मित्रः । मित्रो नाम सूर्यः । नः अस्माकम् । शं सुखम् । [5]भवतु अस्तु, सुखरूपोऽस्तु । शं वरुणः । शं सुखरूपोऽस्तु । अर्यमा च नः अस्माकं सुखरूपोऽस्तु । [6]नः अस्माकम् । इन्द्रः सुखरूपोऽस्तु । बृहस्पतिः नः [7]अस्माकं सुखरूपोऽस्तु । नः विष्णुरुरुक्रमः । उरु विस्तीर्णः क्रमः क्रमणं यस्य स उरुक्रमः विष्णुः । शं सुखरूपोऽस्तु ॥ ९ ॥

[8]शं नो वातः पवताᳬ शं नस्तपतु सूर्यः ।

शं नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु ॥ १० ॥

[9]वातः वायुः । शं सुखरूपोऽस्तु, अव्याधिजनकः सन् नः अस्माकं पवतां गच्छतां [10]वहताम् । शं नः अस्माकं सूर्यः शं सुखरूपस्तपतु । शं नः अस्माकं कनिक्रदद् देवः कर्म कुर्वाणः वृष्ट्याख्यं कर्म कुर्वाणः कनिक्रदद्देवः [11]करकाशनिरहितं [12]कं गाङ्गमुदकं वा । देवः पर्यन्यः । अभि अभितः सर्वतः । वर्षतु वृष्टिं करोतु ॥ १० ॥

---

१ (मा० ३६।८) । २ द्रष्टव्या–सर्वा० । ३ (मा० ३६।९) । ४ महः इन्द्रस्य–ख० ।
५ 'भवतु' नास्ति–ख० । ६ 'नः अस्माकम् । इन्द्रः सुखरूपोऽस्तु' नास्ति–ख० ।
७ 'अस्माकम्' नास्ति–ख० । ८ (मा० ३६।१०) ।
९ 'शान्त्याशीर्देवत्या त्रिष्टुप्' इत्यधिकम्–ख० । १० वाहयतु–ख०, वीजयतु–क-ग० ।
११ नरहितम्–ख० । १२ कम् उदकं वा–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]अहानि शं भवन्तु नः

शꣳ रात्रिः प्रतिधीयताम् ॥ ११ ॥

द्विपदा गायत्री, शान्त्याशीर्देवत्या । अहानि दिवसाः । नः अस्माकम् । शं सुखरूपाणि भवन्तु । नः शं रात्रिः प्रतिधीयताम् । नः अस्माकम् । रात्रिः प्रतिधीयतां सुखस्य पोषयित्री स्यात् ॥ ११ ॥

[२]शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।

शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥ १२ ॥

शान्त्याशीर्देवत्या [३]त्रिष्टुप् । इन्द्रश्च अग्निश्च इन्द्राग्नी । नः अस्माकम् । अवोभिः रक्षणैः । शं सुखरूपौ भवताम् । [४]शं न इन्द्रावरुणा रातहव्या । 'रा दाने' [१०५७ अदादिः] रातं दत्तं हव्यं ययोस्तौ रातहव्यौ, इन्द्रावरुणौ रातहव्यौ गृहीतहव्यौ । शं सुखरूपौ भवताम् । इन्द्रापूषणा वाजसातौ अन्नभजननिमित्ते । शं नः सुखरूपौ भवताम् । इन्द्रासोमा सुविताय साधुप्रसवाय । [५]योः पृथग्भावे । पृथक्करणहेतोः, रोगाणां पृथक्करणाय । इन्द्रासोमौ शं सुखरूपौ भवताम् ॥ १२ ॥

[६]शं नो देवीरभिष्टय आपो भवन्तु पीतये ।

शं योरभिस्रवन्तु नः ॥ १३ ॥

शान्त्याशीर्देवत्या गायत्री । नः अस्माकम् । देवीः [७]हे देव्यः आपः । [८]अभिष्टये अभिषेकाय अभीष्टाय वा । शं सुखरूपा भवन्तु । पीतये पानाय [९]च । शं सुखरूपा भवन्तु । शं योरभिस्रवन्तु नः । योः रोगाणां पृथक्करणहेतोः । शं सुखरूपाः सत्य आपः । नः अस्मान् । अभिस्रवन्तु ॥ १३ ॥

[१०]स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ॥ १४ ॥

---

१ काण्वमाध्यन्दिनसंहितयोरुत्तरमन्त्रस्यैवायमादिमो भागः, आनन्दबोधेन तु पृथग् व्याख्यातः । २ (मा० ३६।११)। ३ 'त्रिष्टुप्' नास्ति–ख०। ४ 'शं न इन्द्रावरुणा ···· इन्द्रासोमा' नास्ति–ख०। ५ यासुट्–क-ग०, सुट्–ख० । ६ (मा०३६।१२) । ७ हे आपः देव्यः–क०, 'देव्यः' इत्येव–ख०। ८ अभिष्टये अभीषवे–ख० । ९ वा–क-ख० । १० (मा० ३६।१३) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे॥ १५॥
[2]यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः॥ १६॥
[3]तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः॥ १७॥

[4]चत्वारो मन्त्रा व्याख्याताः [३५।५४; १२।५१–५३]॥ १४–१७॥

[5]द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिः शान्तिरेव शान्तिः॥ १८॥

शान्त्याशीर्देवत्या [6]बृहती। द्यौः द्युलोकरूपा या शान्तिः सा भवतु। [7]अन्तरिक्षमिति। अन्तरिक्षरूपा या शान्तिः सा भवतु। यद्वा, नः अस्माकम्। द्यौरेव शान्तिः शान्तिरूपा भवतु। अन्तरिक्षं च शान्तिः अन्तरिक्षरूपा शान्तिर्भवतु। पृथिवी च शान्तिः शान्तिरूपा नो भवतु। [8]आपः ओषधयः वनस्पतयः। एताः शान्तिरूपाः नो भवन्तु। शान्तिरेव शान्तिः [9]या तु शान्तिस्वरूपिणी देवता सा शान्तिः। सदास्माकं शान्तिरूपा भवतु॥ १८॥

[10]दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे॥ १९॥

---

१ (मा० ३६।१४)। २ (मा० ३६।१५)। ३ (मा० ३६।१६)।
४ स्योना पृथिवीति, आपो हि, यो वः, तस्मा अरमिति चत्वारो मन्त्रा व्याख्याताः–ख-ग०।
५ (मा० ३६।१७)। ६ यजूंषि–सर्वा०। ७ 'अन्तरिक्षमिति' नास्ति–क०।
८ 'आपः···· शान्तिरूपा भवतु' नास्ति–ख०। ९ 'या तु' नास्ति–क०।
१० (मा० ३६।१८)। 'दृते' इति संहितास्थः पाठः, स एव चोवटमहीधराभ्यां व्याख्यातः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मित्रदेवत्या [1]जगती । धृते दृंह मा । धृते मे शरीरे जीविते सति, जरया च जीर्णे सति । दृं हेत्यस्य सामर्थ्यादयमर्थः । हे मित्र, मा मां दृंह मच्छरीरं दृढीकुरु । मित्रस्य मा चक्षुषा । इन्द्रियाभिप्रायेणैकवचनम् । सर्वाणि भूतानि मित्रस्य चक्षुषा । मा माम् । समीक्षन्तां पश्यन्तु । अहमपि मित्रस्य चक्षुषा श्रीभगवतो दृष्ट्या । सर्वाणि भूतानि समीक्षे सम्यक्पश्यामि । मित्रस्य चक्षुषा समीक्षामहे संपश्यामः । आदरार्थमिदं पुनर्वचनम् । अत्रायमभिप्रायः—नहि मित्रः कञ्चन हिनस्ति, नहि मित्रं कश्चिदपि हिनस्ति । मित्रो मित्रस्य हितं पश्यति परम् । एवं सर्वेषु मम मैत्री स्यात् । एवं च द्वेषादयो दोषा मयि न भवन्ति । ततः श्रीभगवदाराधने ममोत्तमाधिकारसिद्धिर्भविष्यतीति ॥ १९ ॥

[2]धृते दृꣳह मा । ज्योक्ते संदृशि जीव्यासं
ज्योक्ते संदृशि जीव्यासम् ॥ २० ॥

[3]गायत्री । यजमानाशीः । धृते मयि जीवति [4]सति शरीरे च जरया जीर्णे सति । हे मित्र, मा मां [5]मच्छरीरम् । दृंह दृढीकुरु । ज्योक्ते संदृशि जीव्यासम् । ज्योगिति चिरन्तनवचनः । ते तव । संदृशि तव [6]संदर्शनरूपे [7]कारुण्यावलोकने सति । ज्योग् अतिबहुकालम् । जीव्यासं जीवेयम् । ज्योक्ते संदृशि जीव्यासम् । आदरार्थमिदं पुनर्वचनम् ॥ २० ॥

[8]नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥२१॥

[9]पूर्वं व्याख्यातः [१८।१२] ॥ २१ ॥

[10]नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २२ ॥

---

१ यजूंषि–सर्वा० । २ (मा० ३६।१९) । 'दृते' इति संहितास्थः पाठः, उवटमहीधरयोश्च । ३ यजूंषि-सर्वा० । ४ 'सति' नास्ति–क-ग० । ५ अस्मच्छरीरम्–क-ग० । ६ 'संदर्शनरूपे' नास्ति–ख० । ७ कारुण्यावलोके–क-ग० । ८ (मा० ३६।२०) । ९ व्याख्यातो मन्त्रः–ख-ग० । १० (मा० ३६।२१) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]बहुदेवत्याऽनुष्टुप्। नमस्ते अस्तु विद्युते। विद्युते [2]विद्युद्रूपाय ते तुभ्यं नमोऽस्तु। नमस्ते स्तनयित्नवे मेघरूपाय ते तुभ्यं नमोऽस्तु। [3]नमस्ते भगवन्नस्तु। हे भगवन् षड्गुणैश्वर्य-निलय, ते तुभ्यं नमोऽस्तु। यतः स्वः। स्वरित्यादित्यनाम [निरु० २।१४; ५।४]। हे श्रीभगवन्नादित्य, यतः यत्र। समीहसे चेष्टसे। तत्र स्वर्गस्थाय तुभ्यं नमोऽस्तु॥ २२॥

[4]यतो यतः समीहसे ततो नो अभयं कुरु।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥ २३॥

आशीर्देवत्या [5]निचृद् गायत्री। यतो यतः समीहसे। यत यस्मान्निमित्ताद् ईहसे तत-स्ततो निमित्तात्। नः अस्माकम्। अभयं कुरु। शं नः कुरु प्रजाभ्यः। नः अस्माकं प्रजाभ्यः अभयं कुरु। नः अस्माकं पशुभ्यश्च अभयं कुरु॥ २३॥

[6]सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ २४॥

व्याख्यातोऽयं[7] मन्त्रः [६।३१]॥ २४॥

[8]तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्॥२५॥

सावित्री[9] पङ्क्तिः। तच्चक्षुः आदित्यात्मकं चक्षुः। देवहितं देवेन श्रीभगवता निहितं प्रतिष्ठितम्। पुरस्तात् प्राच्यां दिशि। देवेभ्योऽर्थाय वा हितं देवहितम्। पुरस्तात् प्राच्यां दिशि। शुक्रं शुद्धं पाप्मभिरसंस्पृष्टम्। [यद् ? उच्चरत्] उदेति। पश्येम सर्वाणि पुरुषार्थ-साधनानि पश्येम। शरदः शतं प्रतिबहुकालम्। जीवेम। शरदः शतं [10]शतसंवत्सरपरिमित-कालम्। शृणुयाम श्रीभगवन्माहात्म्यप्रवादिनीं श्रुतिं शरदः शतं साकल्येन शृणुयाम॥ २५॥

इति [11]श्रीशुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे षट्त्रिंशोऽध्यायः॥ ३६॥

---

१ वायुदेवत्या—ख०। २ तडिद्रूपाय—ख०। ३ 'नमस्ते भगवन्नस्तु' नास्ति—ख०।
४ (मा० ३६।२२)। ५ त्रिवृद् गायत्री—ख०, अनुष्टुप्—सर्वा०।
६ (मा० ३६।२३)। ७ 'अयम्' नास्ति—ख-ग०।
८ (मा० ३६।२४) ९ सौरी—सर्वा०। १० 'शत ···· कालम्' नास्ति—ख०।
११ काण्ववेदमन्त्रभाष्यसंग्रहे—ख०, श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तत्रिंशोऽध्यायः

अथ–दीक्षासु महावीरान् संभरति। अन्तःपात्यदेशे संभारान्निदधाति। मृदं वल्मीक-वपां वराहविहतं पूतीकानजापयो गवेधुकाः कृष्णाजिनमभ्रिं चोत्तरतः [का० श्रौ० २६।१।१–३] इति। अभ्रिमादत्ते—

[1]देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आददे नारिरसि ॥ १ ॥

अभ्रिदेवत्यं यजुः। नारी नरस्य संबन्धिनी नारी त्वं नार्यसीति[2] ॥ १ ॥

[3]अभ्रिमादायौदुम्बरीं वैकङ्कतीं [4]वाऽरत्निमात्रीं सव्ये कृत्वा दक्षिणेनालभ्य जपति [का० श्रौ० २६।१।४]—

[5]युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ २ ॥

व्याख्यातोऽयं[6] मन्त्रः [५।१४] ॥ २ ॥

अथ मृत्पिण्डं परिगृह्णाति [शत० ब्रा० १४।१।२।८]—

[7]देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ३ ॥

मृत्पिण्डमादाय पञ्च संभारा महावीरकरणार्थाः। महावीरस्तु प्रवर्ग्यसंतापनार्थः कृतो मृन्निर्घुटिकाकारः पात्रविशेषः। द्यावापृथिवीदेवत्या [8]जगती। अस्य कृत्स्नस्याध्यायस्य दध्यङ्ङा-थर्वण ऋषिः। हे देवी देव्यौ हे द्यावापृथिव्यौ। मखस्य यज्ञस्य। वां युवां द्वे आदाय, मृदं चोदकं चादायेत्यर्थः। अद्य अस्मिन्नहनि। शिरः उत्तमाङ्गम्। राध्यासम् 'राध साध संसिद्धौ'

---

१ (मा० ३७।१)। २ 'इति' नास्ति–क०। ३ 'अभ्रिमादायौदुम्बरीम्' नास्ति–ख०।
४ 'वा प्रादेशमात्रे तामभ्रिं सव्येन पाणौ कृत्वा' इति–क-ख-ग०। ५ (मा० ३७।२)।
६ 'अयम्' नास्ति–ख-ग०। ७ (मा० ३७।३)। ८ ब्राह्मी गायत्री–सर्वा० टी०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१२६३-६४ स्वादिः] साधये। कुत्रेति ? देवयजने पृथिव्याः। [1]देवा इज्यन्ते यस्मिन् तद् देवयजनं तस्मिन् देवयजने पृथिव्याः संबन्धिनि देवयजने पृथिव्या देवक्षेत्रस्थाने। मखाय त्वा यज्ञाय त्वां मृत्पिण्ड त्वां परिगृह्णामि। ततो[ऽपि] विशेषा-[काङ्क्षा ?]पेक्षायामाह—मखस्य त्वा शीर्ष्णे। मखस्य [2]यज्ञस्य। शीर्ष्णे विशिष्टशिरसः सिध्यर्थम्। त्वा त्वां द्यावापृथिव्यामेव मृत्पिण्ड त्वां परिगृह्णामि ॥ ३ ॥

[3]अथ वल्मीकवपां कृष्णाजिन उत्तरतो निदधाति—

[4]देव्यो वम्रियो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ४ ॥

वल्मीकवपादेवत्या पङ्क्तिः। वम्रियः। "[5]उपदीका शमीका इति पर्यायः। वल्मीक-[वा?का]रिण्यः। यूयं भूतस्य प्रथमजा वम्रियः। [पृथिवी भूतानां प्रथमजा], तत्संबन्धात् ता अपि मृदः प्रथमजा उच्यन्ते। मखस्य वोऽद्य शिरः। वः युष्मान् मृदः आदाय। अद्य मखस्य यज्ञस्य शिरः। राध्यासं [6]साधये। 'देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे' इति व्याख्यातः [३७।३] ॥ ४॥

[7]अथ वराहविहतं निदधाति—

[8]इयत्यग्र आसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥

वराहविहतदेवत्याऽनुष्टुप्[9]। "इयती ह वा इयमग्रे पृथिव्यास प्रादेशमात्री तामेमूष इति वराह उजघान" [शत० ब्रा० १४।१।२।११] इति याभिहिता [या?] पृथि[वीं ? वी] सा। इयती इयत्परिमाणपरिमिता प्रादेशमात्रीत्यभिनयेन प्रदर्शयति। अग्रे पूर्वम्। क्षोणीमुद्धर्तुमिच्छतो वराहस्य दंष्ट्राग्रेणेयती उद्धृता आसीत्। [10]व्यत्ययः। आसीरिति। त्वा त्वां ब्रवीमि। मखस्य

---

१ 'देवा इज्यन्ते''''मखस्य त्वा शीर्ष्णे। मखस्य' नास्ति—ख०। २ देवयज्ञस्य—ख०।
३ द्रष्टव्यम्—का० श्रौ० [२६।१।६-७]। ४ (मा० ३७।४)। ५ उपादीका—क-ग०, उपजिह्विकाः सीमका इति पर्यायाः—उवटः। ६ संसाधये—क-ग०। ७ द्रष्टव्यम्—का० श्रौ० [२६।१।८]।
८ (मा० ३७।५)। ९ ब्राह्मी गायत्री—सर्वा० टी०। १० 'व्यत्ययः' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेऽद्य शिरो राध्यासमिति[१] । ते[२] त्वामादय । अद्य मखस्य शिरः राध्यासं [३]साधये । 'देवयजने' इति व्याख्यातः [३७।३]॥ ५ ॥

[४]पूतीकानादत्ते [का० श्रौ० २६।१।६]—

[५]इन्द्रस्यौज स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ६ ॥

पूतीकदेवत्याऽनुष्टुप्[६] । ये पूतीकानाम यूयम् । इन्द्रस्य परमैश्वर्ययुक्तस्य श्रीभगवत इन्द्रस्य । ओजः बलं स्थ बलं भवथ । अतस्तान् वः युष्मान् ब्रवीमि—मखस्य वोऽद्य शिरो राध्यासमिति[७] । वः अद्य युष्मान् उपादाय । मखस्य यज्ञस्य । शिरः राध्यासम् उत्तमाङ्गं साधये । 'देवयजने' इति व्याख्यातः [३७।३] ॥ ६ ॥

अजाक्षीरं तूष्णीमानयति । [८]संभृतान् गवेधुकान् तूष्णीमभिमृशति । कृष्णाजिनं परिगृह्योत्तरतः परिवृतं गच्छति [का० श्रौ० २६।१।१०-१३]—

[९]प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ७ ॥

[१०]लिङ्गोक्तदेवत्याऽनुष्टुप् । प्रैतु ब्रह्मणस्पतिः । प्रैतु [११]गच्छतु । प्रदेवी सूनृता [१२]शक्त्यात्मिका देवी प्रैतु । अच्छावीरं नर्यं नरेभ्यो हितं कारणं नर्यम् । पङ्क्तिराधसं पङ्क्तिछन्दसा साध्यम् । वीरं कृष्णाजिनम् । अच्छ आसुमेतु । देवा यज्ञं नयन्तु । नः अस्माकम् । यज्ञं नयन्तु । कृष्णाजिनं [१३]यज्ञं प्रापयन्तु । अत्र मखाय त्वेति त्रिः पठ्यते । [१४]एकदा संभारान्

---

१ 'इति' नास्ति—क० । २ 'ते' नास्ति—ग० । ३ संसाधये—क ग० । ४ आदारानादत्ते—ख० ।
५ (मा० ३७।६) । ६ ऋचां त्रिष्टुप् । मखाय त्वेति यजुः पङ्क्तिः—सर्वा० टी० ।
७ 'इति' नास्ति—क० । ८ संवृतान्—क-ख-ग० । ९ (मा० ३७।७) ।
१० घर्मदेवत्यानि यजूंषि—सर्वा०, अत्र 'प्रैतु' इति बृहती—सर्वा० टी० ।
११ प्रगच्छतु—ख० । १२ शच्यात्मिका—ख० । १३ 'यज्ञम्' नास्ति—क० ।
१४ अत्र द्रष्टव्यानि—का० श्रौ० [२६।१।१४-१६] ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मखाय त्वेति संभारैः संसृजति । एकदा मखाय त्वेति मृदमादत्ते । एकदा [1]मखाय त्वेति मृदमादाय महावीरं [2]करोति । 'मखाय त्वा' इत्युक्तम्[3] [३७।३] ॥ ७ ॥

प्रादेशमात्रमूर्ध्वमासेचनवन्तं [मेखलावन्तं] मध्यसंगृहीतमूर्ध्वे मेखलायास्त्र्यङ्गुलं निष्ठितमभिमृशति [का० श्रौ० २६।१।१७-१८]—

[4]मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ८ ॥

लिङ्गोक्तदेवत्यानि यजूंषि । मखस्य शिरोऽसि । [हे] निष्ठित, त्वं मखस्य [5]यज्ञस्य शिरोऽसि । एवं द्वितीयम्, एवं तृतीयमिति । मखाय त्वेति त्रिभिः पर्यायमन्त्रैस्त्रीन्महावीरान् गवेधुकाभिः [6]श्लक्ष्णयति प्रतिमन्त्रम् ॥ ८ ॥

[7]मुखवृष्णिं धूपयति—

[8]अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ९ ॥

---

१ 'मखाय त्वेति' नास्ति—क० । २ 'महावीरं करोति' इत्यस्याग्रे 'इति त्रयाणां विनियोगः । तथा चाधारे सादयति' इत्यधिकम्—ख-ग० । ३ अत्र खपुस्तके—'उक्तम्' इत्यस्याग्रे—'अथ प्रयौति मखाय त्वेति । अथ मृत्पिण्डमादाय महावीरं करोति । मखाय त्वेत्युक्तम् ॥ छ ॥ ऊर्ध्वं मेखलायां वियंगुलं नेपितमभिमृशति—मखस्य शिरोऽसीति' इति पाठः । ४ (मा० ३७।८) ५ 'यज्ञस्य' नास्ति—ख० । ६ द्रष्टव्यम्—का० श्रौ० [२६।१।२३] । अश्वशकृता धूपयति—श्लक्ष्णं प्रणयति—ख० । ७ 'मुखवृष्णिं धूपयति' नास्ति—क-ग० । का० श्रौ० [२६।१।२४] । ८ (मा० ३७।९) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गोक्तदेवत्यानि यजूंषि । हे महावीर, अश्वस्य वृष्णः सेचनधर्मवतः । सेचनसंबन्धिनं महावीरं त्वा [1]त्वां धूपयामि । केनेति ? [सत्या ?]शक्रा [शकृता] धूपयामि । पृथिव्याः संबन्धि-[नि] देवयज[न ? ने] स्थितं धूपयामीति[2] । मखाय त्वा मखस्य त्वा शीर्ष्णे इति । धूपयामि 'धूप संतापे' [३९६ भ्वादिः] संतापयामि । एवं द्वितीयतृतीयौ [3]धूपयामि मखाय त्वेति [4]त्रिभिर्मन्त्रैः ॥ ९ ॥

[5]त्रीन् महावीरान् पक्वानुद्धरति—

[6]ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १० ॥

लिङ्गोक्तदेवत्या [7]गायत्री "असौ वै लोक ऋजुः सत्यꣳ ह्यृजुः सत्यमेष य एष तपति" [शत० ब्रा० १४।१।२।२२] इति । ऋजवे अकुटिलाय स्वर्गलोकाय सत्याय आदित्याय । एष त्वा त्वाम् । उद्वपामि । एष एव प्रथमः प्रवर्ग्यः । साधवे वायवे पय उद्वपामि । एष द्वितीयः प्रवर्ग्यः, "अयं वै साधुः" [श० ब्रा० १४।१।२।२३] इत्यादिश्रुतेः । सुक्षित्यै अस्मै लोकाय । त्वां पय उद्वपामि, "सुक्षित्यै वेत्ययं वै लोकः सुक्षितिरस्मिन् हि लोके सर्वाणि भूतानि क्षियन्ति" [श० ब्रा० १४।१।२।२४] इति श्रुतेः । एष एव तृतीयः प्रवर्ग्यः । मखाय त्वेति [8]प्रतिमन्त्रम् ॥ १० ॥

इति महावीरकरणम् ॥

महावीरं प्रोक्षति [का० श्रौ० २६।२।२६]—

[9]यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु ।
पृथिव्याः सꣳस्पृशस्पाहि । अर्चिरसि शोचिरसि तपोऽसि ॥ ११ ॥

नानादेवत्या [10]त्रिष्टुप् । [11]यमाय त्वा महावीरं त्वां प्रोक्षामि । मखाय यज्ञाय त्वां प्रोक्षामि । [12]सूर्यस्य त्वा सूर्याय त्वां प्रोक्षामि । तपसे अर्थाय त्वां प्रोक्षामि । देवस्त्वा सविता

---

१ 'त्वाम्' नास्ति—क-ग० । २ 'इति' नास्ति—क० । ३ धूपयति—ख-ग० । ४ द्रष्टव्यम्—का० श्रौ० [२६।१।२६] । ५ द्रष्टव्यम्—का० श्रौ० [२६।१।२७] । ६ (मा० ३७।१०) । ७ दैवी बृहती—सर्वा० टी० । ८ द्रष्टव्यम्—का० श्रौ० [२६।१।२८] । ९ (मा० ३७।११) । १० देव्यौ बृहत्यौ—सर्वा० टी० । ११ 'यमाय त्वा' नास्ति—क-ग० । १२ 'सूर्यस्य त्वा' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्वानक्तु । सविता देवः । मध्वा मधुना । महावीरं त्वाम् । अनक्तु अञ्जयतु । पृथिव्याः संस्पृशस्पाहि । संस्पृशतीति संस्पृक्, संस्पृशः पृथिव्याः संबन्धि[नः]। हे रजत सुवर्ण, त्वं [1]महावीरं पाहि गोपाय। महावीरमाज्यवन्तं[2] निदधाति[3]—अर्चिरसि शोचिरसि तपोऽसीति। दीप्तिपर्यायाः। [4]'ऋच शुच दीप्तौ', 'तप संतापे' [९८५ भ्वादिः] एषां रूपाणि—अर्चिरसि, शोचिरसि, तपोऽसीति ॥ ११ ॥

अथास्यामाशिष आशास्ते [शत० ब्रा० १४।१।३।१८]। वाचयति [5]प्रादेशमध्यधि धारयन्तम् [का० श्रौ० २६।३।५]—

[6]अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः। सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दा आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः। विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्य ओजो मे दा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि ॥ १२ ॥

सप्त पार्थिवानि यजूंषि, यजमानाशीः। हे पृथिवि, पुरस्तात् महावीरस्य पुरस्तात् प्राच्यां दिशि हे पृथिवि, या त्वमनाधृष्टा रक्षोभिरनाधृष्टा धर्षितुमशक्या। अतस्त्वां ब्रवीमि—अग्नेराधिपत्य इति। अग्नेराधिपत्ये सति त्वं तत्र स्थितासि। अतः आयुर्मे मह्यम्। दाः देहि। पुत्रवती दक्षिणतः। महावीरस्य दक्षिणस्यां दिशि। हे पृथिवि, या पुत्रवती भवसि। तां त्वां ब्रवीमि। इन्द्रस्याधिपत्ये इन्द्राधिपत्ये सति। अतस्त्वं मे मह्यं प्रजां देहि। सुषदा पश्चात्। या त्वं महावीरस्य पश्चिमतः पश्चिमस्यां दिशि सुषदा 'सुष संशोभने'[?]। शोभनसदनवती। अतस्त्वां ब्रवीमि। देवस्य सवितुराधिपत्ये सति तत्र स्थिता त्वं चक्षुर्मे दाः चक्षुर्देहीति। आश्रुतिरुत्तरत इति। महावीरस्य उत्तरतः उत्तरस्यां दिशि। आश्रुतिः आश्रयन्त्यस्मिन् [7]यजमाना इत्याश्रुतिः। यज्ञियो ह्यसौ देशः। अतो ब्रवीमि। धातुराधिपत्ये धातुः विधातुः आधिपत्ये सति। तत्रस्था त्वं रायस्पोषं धनस्य पोषम्। मे मह्यं देहि। विधृतिरुपरिष्टात्। हे

---

१ महा···गोपाय नास्ति—ख०। २ 'आज्यवन्तम्' नास्ति—ख०।
३ द्रष्टव्यम्—का० श्रौ० [२६।३।४]। ४ 'रुच दीप्तावभिप्रीतौ च' [७४५ भ्वादिः], 'शुच शोके' [१८३ भ्वादिः] इति—धातु०। ५ प्रादेशमध्यधि विधाय—क-ख-ग०।
६ (मा० ३७।१२)। ७ 'यजमाना····अतः' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधृति, या त्वम् उपरिष्टात् महावीरस्य ऊर्ध्वप्रदेशे। यतस्त्वं विधृतिः विधारयित्री। अतस्त्वां ब्रवीमि। बृहस्पतेराधिपत्ये सति तत्रस्था त्वम्। ओजः तेजः। मे मह्यं देहि। विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि। विश्वाभ्यः सर्वाभ्यः। [1]नाष्ट्राभ्यः आर्तिभ्यः। मा माम्। पाहि गोपाय। अथेमामभिमृश्य जपति [शत० ब्रा० १४।१।३।२५]-मनोरश्वासीति। मनोस्त्वं धनस्य भूमिपुत्रस्य मनोः। त्वमश्वा असि। "अश्वा ह वा इयं भूत्वा मनुमुवाह" [श० ब्रा० १४।१।३।२५] इति श्रुतेः। हे पृथिवि, त्वं मनोरश्वासि अश्वा भूत्वा मनुं वहसि। अतो माम[भि?पि] समुद्धरेत्यभिप्रायः॥ १२॥

[2]अथ वैकङ्कतैः शकलैस्त्रयोदशभिः परिश्रयति—

[3]स्वाहा मरुद्भिः परिश्रीयस्व दिवः सꣳस्पृशस्पाहि।

मधु मधु मधु॥ ३॥

लिङ्गोक्तदेवत्यं यजुः। हे प्रवर्ग्य, यस्त्वं [4]स्वाहाकारः [5]तं त्वां ब्रवीमि। मरुद्भिः परिश्रीयस्व। कर्मणि यक्। मरुतस्त्वामाश्रयन्त्वित्यर्थः। स्वाहेति होमार्थः। [6]सुवर्णशतमानेनोपरिष्टादुपदधाति—दिवः संस्पृशस्पाहीति। लिङ्गोक्तदेवत्यं यजुः। हे प्रवर्ग्य, त्वं दिवः द्युलोकस्य। संस्पृशः महावीरान् प्रवर्ग्यपात्रविशेषान्। पाहि रक्ष। अथवा दिवः [7]संस्पृशः संस्पर्शकर्तॄन् पाहि। अथ धवित्रैराधूनोति [शत० ब्रा० १४।१।३।२७]—मधु मधु मध्विति। प्राणदेवत्यानि यजूंषि। "प्राणो वै मधु" [शत० ब्रा० १४।१।३।३०], रसरूपसामान्यात्। प्राणस्त्वमङ्गानां [रसनं? रसः। तं] मध्वात्मकं प्राणं महावीरे स्थापयति॥ १३॥

[8]महावीरमुपतिष्ठते—

[9]गर्भो देवानां पिता मतीनां पतिः प्रजानाम्।

सं देवो देवेन सवित्रा गत सꣳ सूर्येण रोचते॥ १४॥

[10]गर्भदेवत्याऽनुष्टुप्[11]। गर्भो देवानाम्। गर्भयतीति गर्भः, आदित्यात्मना देवानां गर्भ एष प्रवर्ग्यः। पिता मतीनाम्। पाति रक्षतीति पिता, मतीनां पिता प्रवर्ग्यः। प्रजानां पतिश्च।

---

१ 'नाष्ट्राभ्यः' नास्ति—ख०। २ द्रष्टव्यम्—का० श्रौ० [२६।३।९]। ३ (मा० ३७।१३)।
४ स्वाहाकारम्—ख०। ५ 'तम्' नास्ति—ख०। ६ द्रष्टव्यम्—का० श्रौ० [२६।३।१०]।
७ 'संस्पृशः' नास्ति—क-ग०। ८ द्रष्टव्यम्—का० श्रौ० [२६।४।१३]। ९ (मा० ३७।१४)।
१० घर्मदेवत्या—सर्वा०। ११ गर्भो देवानां पङ्क्तिः—सर्वा० टी०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

समित्यस्य गतेत्यनेन संबन्धः। देवः देवयतीति देवः प्रवर्ग्यः। दैवेन सवित्रा सूर्येण संगत सूर्येण सह। रोचते दीप्यते ॥ १४ ॥

[1]समग्निरग्निना गत सं दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट।

स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत ॥ १५ ॥

घर्मदेवत्या [2]जगती। अग्निः अग्निवर्णः प्रवर्ग्यः। अग्निना संगत। दैवेन सवित्रा सर्वस्य प्रसवकर्त्रा। सूर्येण सर्वस्य प्रेरकेण सूर्येण सह। अरोचिष्ट दीप्यते। स्वाहा समग्निस्तपसा गत। अग्निः अग्निवर्णः प्रवर्ग्यः। तपसा 'तप संतापे' [९८५ भ्वादिः] तेजसा संगत। संदैव्येन देवसंबन्धिना सवित्रा सूर्येण सह। अरूरुचत रोचते। अत एवंगुणं त्वां स्तुम इति शेषः ॥१५॥

[3]धर्ता दिवो विभाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः।

वाचमस्मे नियच्छ देवायुवम् ॥ १६ ॥

ऊर्ध्वबृहती घर्मदेवत्या। घर्म इत्यादित्यनाम, "आदित्यो वै घर्मः" [शत० ब्रा० १४।२।२।१७] इति श्रुतेः। धर्ता दिवो विभाति। दिवः द्युलोकस्य। धर्ता धारयिता। तपसश्च धर्ता। रश्मिजालस्य धर्ता। पृथिव्यामवस्थितो विभाति। धर्ता देवो देवानाम्। धर्ता धारयिता स्वयं च देवः अमर्त्यः मर्त्यधर्मविरोधी। तपोजाः तपो ब्रह्म तस्माज्जायत इति तपोजाः। देवायुवं देवान् यौति मिश्रयतीति देवायुः वाक्, तां देवायुवं वाचम्। अस्मे अस्मासु। [4]नियच्छ नियच्छतु प्रयच्छतु ॥ १६ ॥

[5]अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।

स सध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः ॥ १७ ॥

घर्मदेवत्या त्रिष्टुप्। ऋषिर्दीर्घतमाः। आदित्यात्मना घर्मस्तुतिः। यं गोपामपश्यमिति संबन्धः। गोपां गोप्तारम्। कथंभूतं गोप्तारम्? अनिपद्यमानम् अनिवारणेनापद्यमानम् अविश्राम्यन्तं विश्राममकुर्वाणम्। आ च परा च पथिभिश्चरन्तम्। आ आभिमुख्येन। 'चर गतिभक्षणयोः' [५५९ भ्वादिः] चरन्तं गच्छन्तम्। परा पराङ्मुखतया। पथिभिः देवैर्मार्गैः। मध्याह्नात् प्राग् आभिमुख्येन गच्छन्तम्, मध्याह्नादुपरि पराङ्मुखतया गच्छन्तम्। सर्वदा गच्छन्तम्। गोपा-

---

१ (मा० ३७।१५)। २ ब्राह्मी अनुष्टुप्–सर्वा० टी०। ३ (मा० ३७।१६)।
४ 'नियच्छ' नास्ति–क०। ५ (मा० ३७।१७)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मादित्यम् । अपश्यम् अद्राक्षमिति संबन्धः । आदित्यः सध्रीचीः सम्यग्गमनः । विषूचीः विष्वग्गमनः । वसानः 'वस आच्छादने' [१०२३ अदादिः]। स्वरश्मिभिः दिश आच्छादयन् । आवरीवर्ति भुवनेष्वन्तः । भुवनेषु [1]एषु लोकेषु । अन्तः आवरीवर्ति । 'वृतु वर्तने' [७५८ भ्वादिः] [2]अन्तः पुनः पुनरावर्तते । तं गोपामपश्यमिति संबन्धः ॥ १७ ॥

[3]विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते । देवश्रुत्त्वं देव घर्म देवो देवान्पाह्यत्र प्रावीरनु वां देववीतये । मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥ १८ ॥

घर्मदेवत्याऽनुष्टुप्[4] । प्रगाथः । अनुष्टुब्बृहत्यौ यत्र मीलिते स प्रानुष्टुभः प्रगाथः । विश्वासां भुवां पृथिवीनां पते, हे विश्वासां भुवां पते । हे विश्वस्य मनसस्पते, सर्वप्रा[मा?]ण्याश्रितमनसः पते । हे विश्वस्य वचसस्पते, त्रयीलक्षणवेदवचसः पते । [हे सर्वस्य वचसस्पते], लौकिकवाचामधिपते[5] । तं त्वां स्तुम इति शेषः । यतस्त्वं देवश्रुत[इति शेषः?]। यतस्त्वं देव इति श्रुत् । देवानां श्रावयतीति देवश्रुत् त्वं देव घर्म । हे देव घर्म तेजोरूप । देवस्त्वं देवान्पाहि गोपाय । अत्र प्रावीरनु वां देववीतये । अत्र [सत्रे] अस्मिन्नवसरे वा । [प्रावीरिति] पुरुषव्यत्ययः । प्रावीत् । [हे] अश्विनौ, वां युवाम् । अयं घर्मः । अनुप्रावीत् अनुगच्छतु । कस्मै ? देववीतये देवतर्पणाय । मधुमाध्वीभ्यां [6]मधुमाधूचीभ्याम् । मधु च माध्वी च मधुमाध्व्यौ [7]मधुमाधवीभ्यां मध्वञ्जनाभ्याम् । दध्यङ्ङाथर्वणो मधुविद्यां प्रावोचत् । तां चैतावश्विनौ अनुप्रावीरिति संबन्धः ॥ १८ ॥

[8]हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।
ऊर्ध्वो अध्वरं दिवि देवेषु धेहि ॥ १९ ॥

घर्मदेवत्योष्णिक्[9] । हृदे हृदयार्थं त्वां [स्तुमः] । [सु?]मनसे त्वां स्तुमः । दिवे त्वां स्तुमः । सूर्याय त्वां स्तुमः । इत एव त्वां ब्रूमः—ऊर्ध्वः उत्कृष्टः त्वम् । अध्वरं यज्ञम् । दिवि द्युस्थाने । देवेषु मध्ये । धेहि स्थापय तेषां हविर्भागं यागार्थं स्थापयेति ॥ १९ ॥

---

१ 'एषु' नास्ति—क-ग० । २ यः—क-ग० । ३ (मा० ३७।१८) । ४ विश्वासां भुवामत्यष्टिः—सर्वा० । ५ अध्यधिपते—ख-ग० । ६ 'मधुमाधूचीभ्याम्' नास्ति—ख० । ७ मधुमाधूचीभ्याम्—ख० । ८ (मा० ३७।१९; का० ३७।१८) काण्वसंहितायां तु पूर्वमन्त्रस्यैवायमन्तिमो भागः । ९ परोष्णिक्—सर्वा० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिꣳसीः ॥ २० ॥

[2]त्रिष्टुप् घर्मदेवत्या । उत्तरार्द्धे पत्न्याशीः । पिता नः अस्माकम् । यतस्त्वं [3]पितासि पातासि । अतो ब्रवीमि–पिता नो बोधि । नः अस्माकम् । बोधि बोधय । नमस्ते अस्तु । ते तुभ्यम् । नमोऽस्तु । मा माम् । मा हिंसीः हिंसां मा कार्षीः ॥ २० ॥

[4]महावीरमीक्षमाणां पत्नीं वाचयति—

[5]त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेह्यरिष्टाहꣳ सह पत्या भूयासम् ॥२१॥

[6]यत्त्वष्टा हि रेतस्यं विकर्तनस्थानं तद्वन्तो वयम्[?] । यद्वा व्यत्ययः । त्वष्टृमत्यः[?] वयं महावीरं सपेम । सपतिः स्पर्शनकर्मा [निरु० ५।१६] । संस्पृशेम । [7]मिथुनार्थं स्पृशेम । अतस्त्वं पुत्रान् पशून् च मयि धेहि स्थापय । अहं च अरिष्टा पत्या सह अरिष्टा अनुपहिंसिता । भूयासं भवेयमिति[8] ॥ २१ ॥

रौहिणौ जुहोति [शत० ब्रा० १४।२।१।१]—

[9]अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।

रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २२ ॥

घर्मदेवत्ये द्वे यजुषी । अहः केतुना प्रज्ञया कर्मणा वा सहितमहः । जुषतां सेवतां परिगृह्णातु । कथं भूतमहः ? सुज्योतिर्ज्योतिषा । [10]स्वकीयेनैवादित्यज्योतिषा स्वयं सुज्योतिः शोभनज्योतिष्कमहः जुषताम् । रात्रिः केतुना प्रज्ञया कर्मणा [11]वा युक्ता रात्रिः जुषताम् । सुज्योतिर्ज्योतिषा[12] । स्वकीयेन चन्द्रादिज्योतिषा सुज्योतिः शोभनदीप्तिः । रात्रिर्जुषताम् । स्वाहेति होमार्थः ॥ २२ ॥

इति [13]श्रीशुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

---

१ (मा० ३७।२०; का० ३७।१९) । २ पिता नोऽसि ऋग्गायत्री–सर्वा० टी० । ३ पितासि । पाता पिता, पिता नो बोधि नः–ख० । ४ द्रष्टव्यम्–का० श्रौ०[२६।४।१५]; शत० ब्रा०[१४।१।४।१६] ।
५ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः । ६ त्वष्टृमन्तः यजुः–सर्वा०, ऋचां त्रिष्टुप् घर्मो देवता–सर्वा० टी० । ७ 'मिथुनार्थं स्पृशेम' नास्ति–ख० । ८ 'इति' नास्ति–क० ।
९ (मा० ३७।२१; का० ३७।२०) १० 'स्वकीयेनैवादित्यज्योतिषा' नास्ति–ख० ।
११ 'वा' नास्ति–क० । १२ 'ज्योतिषा' नास्ति–ख० । १३ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे–ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टत्रिंशोऽध्यायः

[1]घर्मधुग्दोहनार्थं रज्जुमादत्ते—

[2]देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।

आददेऽदित्यै रास्नासि ॥ १ ॥

'देवस्य त्वा' इति मन्त्रो व्याख्यातः [१।१३] । अतस्त्वाम् । [3]आददे गृह्णामि । यतस्त्वमदित्यै रास्नासीति । अदित्यै देवतायै त्वं रास्ना रशना [4]रज्जुरसि ॥ १ ॥

[5]रज्जुं गृहीत्वा गामाह्वयति—

[6]इळ एह्यदित एहि सरस्वत्येहि ।

असावेह्यसावेह्यसावेहि ॥ २ ॥

गोदेवत्यं यजुः । हे इळे [7]मानवि, देवतास्तुतिरूपिणि । एहि [8]आ इहि आगच्छ । दोहनार्थम् । हे अदिते देवमातः, त्वम् एहि आगच्छ । हे सरस्वति ब्रह्मवल्लभे, एहि [9]आगच्छ । गोर्नामान्येतानि—'इडा हि गौरदितिर्हि गौः सरस्वती हि गौः" [शत० ब्रा० १४।२।१।७] इति श्रुतेः । अथोच्चैराह्वयति[10] नाम्ना । असाविति नामग्रहणम् । असौ एहि आगच्छेति आह्वयति [11]गार्हपत्यं गच्छन् ॥ २ ॥

[तामागताम्] अभिदधाति [शत० ब्रा० १४।२।१।८]—

[12]अदित्यै रास्नासीन्द्राण्या उष्णीषः ॥ ३ ॥

---

१ द्रष्टव्यम्—का० श्रौ० [२६।५।१]; शत० ब्रा० [१४।२।१।६] ।
२ (मा० ३८।१) । ३ 'आददे' नास्ति—ख० । ४ 'रज्जुः' नास्ति—ख० ।
५ द्रष्टव्यम्—का० श्रौ० [२६।५।१]; शत० ब्रा० [१४।२।१।७] । ६ (मा० ३८।२) ।
७ 'मानवि' नास्ति—ख० । ८ 'आ इहि' नास्ति—क-ग० । ९ 'आगच्छ' नास्ति—ख० ।
१० उच्चैः प्राह्वयति—ख० । द्रष्टव्यम्—का० श्रौ० [२६।५।१]; शत० ब्रा० [१४।२।१।७] ।
११ द्रष्टव्यम्—का० श्रौ० [२६।५।१] । १२ (मा० ३८।३) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रज्जुदेवत्या द्विपदा गायत्री । [1]गां पाशेन प्रतिमुञ्चति—अदित्यै रास्नासीति । अदित्यै अदित्याः देवतायाः । रास्नासि रसनासि । इन्द्राण्या उष्णीष इति । इन्द्राणी इन्द्रस्य प्रिया पत्नी, तस्या इन्द्राण्या उष्णीषः शिरोवेष्टनमसीति रज्जुः स्तूयते ॥ ३ ॥

गां स्थूणायां बध्वा वत्समुत्सृजति[1]—

[2]पूषासिं घर्माय दीष्व ॥ ४ ॥

वत्सदेवत्यं यजुः । पूषासीति । पूषा वायुः पुष्यतीति पूषा वृष्टिधाराप्रेरकः । प्रकरणत्वेन यः प्रसिद्धो वायुः पूषा वृष्टिधाराप्रेरकः । तथायं वत्सोऽपि प्रस्नवहेतुत्वेन धाराप्रेरक इति । वत्समुन्नयति [का० श्रौ० २६।५।४]—घर्माय दीष्व । घर्माय रसाय दीष्व । दयतिर्दानकर्मा [निरु० ४।१७] । पयसः प्रदानं कुरु । इयं गौः[?] ये रसास्तान् पिन्वतोऽस्मै घर्माय रसाय । दीष्व दानं कुर्वित्यर्थः ॥ ४ ॥

[3]गां दोग्धि—

[4]अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ॥ ५ ॥

लिङ्गोक्तदेवत्यं यजुः । अश्विभ्यामर्थाय पिन्वस्व । [5]'पिवि मिवि सेचने' [५८८-८६ भ्वादिः] । क्षीरसेचनं कुरुष्व । सरस्वत्यै अर्थाय पिन्वस्व । इन्द्राय सुत्राम्णे पिन्वस्व । क्षीरधाराप्लवनं कुरुष्व ॥ ५ ॥

अथ विप्रुषोऽभिमन्त्रयते [का० श्रौ० २६।५।६; शत० ब्रा० १४।२।१।१४]—

[6]स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ६ ॥

क्षीरविप्रुड्देवत्यं यजुः । दुह्यमानेष्विदं पयः । इन्द्रवत् इन्द्रयुक्तमस्तु । स्वाहा सुहुतमस्तु । इति त्रिष्कृत्व आह—स्वाहेन्द्रवत् स्वाहेन्द्रवत्[7] स्वाहेन्द्रवत् । आवृत्तिर्नियमार्था ॥६॥

---

१ द्रष्टव्यम्—का० श्रौ० [२६।५।३] । २ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवान्तिमो भागः ।
३ द्रष्टव्यम्—का० श्रौ० [२६।५।५] । अथ पिन्वने पिन्वयति [शत० ब्रा० १४।२।१।११]-ख० ।
४ (मा० ३८।४; का० ३८।४) । ५ पिन्व मिन्व—क-ख-ग० ।
६ पूर्वमन्त्रस्यैवायमन्तिमो भागः काण्वमाध्यन्दिनयोः ।
७ 'स्वाहेन्द्रवत्' नास्ति—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तनमालभते [का० श्रौ० २६।५।७]—

[1]यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः। येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः। उर्वन्तरिक्षमन्वेमि ॥ ७ ॥

वाग्देवत्या त्रिष्टुप्, यजुरन्ता। ऋषिर्दीर्घतमाः। हे सरस्वति, यस्ते तव स्तनः [2]स्तन इव स्तनः। कथंभूतः स्तनः ? शशयः। 'शीङ् स्वप्ने' [१०३२ अदादिः] स्वप्न इव स्थितः। अन्यैरनुपयुक्तः सुप्त इवास्ते। [3]यश्च मयोभूः। मय इति सुखनाम [निघ० ३।६]। मयः सुखं भावयति सर्वेषां भूतानामिति स्तनो मयोभूः। यस्ते स्तनः रत्नधाः रत्नानां धनानां दाता, रत्नानां रमणीयानां [4]च धारयिता। यश्च वसु धनं देवयतीति[?] वसुवित्। यश्च सुदत्रः कल्याणदानः। हे सरस्वति, येन स्तनेन। विश्वा विश्वानि। वार्याणि वरणीयानि वस्तूनि पुष्यसि। [5]इह तं स्तनं धातवे धननिधानाय स्वपोषणाय। अकः अकरोः कृतवत्यसि। [6]अथ गार्हपत्यं गच्छत्युर्वन्तरिक्षमन्वेमीत्येवैतदाह। अधिश्रिते पयसि ऊर्ध्वमुत्सिच्यमाने पयस्येतदाह ॥ ७ ॥

परीशासावादत्ते [का० श्रौ० २६।५।१२]—

[7]गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि ॥ ८ ॥

परिशासदेवत्यं यजुः। गायत्रं छन्दोऽसि। [8]त्रैष्टुभं छन्दोऽसि। परिशासस्य क्रमेण मन्त्रद्वयम् ॥ ८ ॥

ताभ्यां महावीरं परिगृह्णाति [का० श्रौ० २६।५।१४]—

द्यावापृथिवीभ्यां त्वा परिगृह्णामि ॥ ९ ॥

महावीरदेवत्यं यजुः। द्यावापृथिवीभ्यां त्वा त्वां महावीरं परिगृह्णामि ॥ ९ ॥

---

१ (मा० ३८।५; का० ३८।५) २ 'स्तन इव स्तनः। कथंभूतः स्तनः ?' नास्ति—ख०। ३ 'यश्च' नास्ति—ख०। ४ 'च' नास्ति—क-ग०। ५ 'इह' नास्ति—ख०। ६ द्रष्टव्यम्—का० श्रौ० [२६।५।११]। ७ (मा० ३८।६; का० ३८।६)। इत आरभ्य व्याख्यातानां चतुर्णां प्रतीकानामेक एव मन्त्रः काण्वमाध्यन्दिनयोः। ८ 'त्रैष्टुभं छन्दोऽसि' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपयमन्योपगृह्णाति [का० श्रौ० २६।५।१५]—

अन्तरिक्षेणोपयच्छामि ॥ १० ॥

अन्तरिक्षेण लोकेन । उपयच्छामि ॥ १० ॥

[1]पय आसिञ्चति—

इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट् ।

स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ११ ॥

वैश्वदेवानि यजूंषि । हे इन्द्राश्विनौ, हे इन्द्र हे अश्विनौ । मधुनः । कथंभूतस्य ? सारघस्य मधुमक्षिकाभिः साध्यस्य मधुनः । घर्मं रससंघातम् । वसवश्च देवाः घर्मं पात पिबत । ऋत्विजः यजत वाट् । वाडिति वषट्कारः । वषट्कृतम् । एवं हुतं भवति । स्वाहा सूर्यस्य रश्मये स्वाहा । कथंभूताय ? वृष्टिवनये । वृष्टिं वनति संभजतीति वा वृष्टिवनिः, तस्मै वृष्टिवनये रश्मये । स्वाहेति होमार्थः । सुहुतमस्तु ॥ ११ ॥

[2]आहवनीयं गच्छन्नध्वर्युर्वातनामानि जुहोति—

[3]समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।

अनाधृष्याय त्वा वाताय स्वाहाऽप्रतिधृष्याय त्वा वाताय स्वाहा ।

अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥ १२ ॥

वातदेवत्यानि यजूंषि । समुद्राय । [4]'द्रु द्रवणे' सम् उत् । सर्वे देवा यद् वातात् समुद्द्रवन्तीति समुद्रो वातः । तस्मै समुद्राय वाताय । [5]'वा गतिगन्धनयोः' [१०५० अदादिः] हे प्रवर्ग्य, त्वा त्वाम् । समुद्राय वाताय जुहोमि । स्वाहेति होमार्थः । सरिराय त्वा वाताय स्वाहा । 'ईर गतौ [कम्पने च]' [१०१८ अदादिः] सर्वाणि भूतानि यतः सहेरते । व्यत्ययः । सहेरन्ते । सह गच्छन्ति स सरिरः, तस्मै सरिराय वाताय ।

---

१ द्रष्टव्यम्–का० श्रौ० [२६।५।१६] । २ द्रष्टव्यम्–का० श्रौ० [२६।५।१७] ।
३ (मा० ३८।७; का० ३८।७) । ४ 'द्रु गतौ' [९४५ स्वादिः] ।
५ 'वा गतिगन्धनयोः····अनाधृष्याय त्वा वाताय स्वाहा' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वा प्रवर्ग्यं त्वां जुहोमि स्वाहा। अनाधृष्याय [1]त्वा वाताय स्वाहा। 'ञिधृषा प्रागल्भ्ये' [१२७० स्वादिः] धर्षितुमशक्यः अनाधृष्यः स्प्रष्टुमशक्यः, तस्मै अनाधृष्याय। शत्रुभिः प्रतिधर्षितुमशक्यः अप्रतिधृष्यः, तस्मै अप्रतिधृष्याय वाताय प्रवर्ग्यं त्वां स्वाहा जुहोमि। सर्वत्रैवं वाक्ययोजना। स्यति उपस्पर्शनकर्मा। सर्वाणि भूतानि अवस्यति उपस्पृशति वा अवस्युः, तस्मै अवस्यवे वाताय। अशिमिदाय। शिमीति कर्मनाम [निघ० २।१; निरु० ५।१२] शिमिं ददातीति शिमिदः कर्मदः। अस्मादन्यो न विद्यत इति अशिमिदः, तस्मै अशिमिदाय वाताय। [2]प्रवर्ग्यं [3]त्वां जुहोमि॥ १२॥

[4]इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहा। इन्द्राय त्वाभिमातिघ्ने स्वाहा सवित्रे त्व ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा॥ १३॥

[5]घर्मदेवत्यं यजुः। इन्द्रादिनामभिरेव वायुः स्तूयते। इन्द्राय परमैश्वर्ययुक्ताय वाताय त्वा प्रवर्ग्यं त्वाम्। वसुमते वसवो विद्यन्ते यस्येति वसुमान्, तस्मै वसुमते। रुद्रवते रुद्रोऽस्यास्तीति रुद्रवान् वातः, तस्मै रुद्रवते। इन्द्राय। आदित्योऽस्यास्तीति आदित्यवान् वातः, तस्मै आदित्यवते वातायेन्द्राय। अभिमातिघ्ने अभिमातिः शत्रुः तं हन्तीत्यभिमातिहा, तस्मै अभिमातिघ्ने। सवित्रे प्रसवकर्त्रे वाताय। ऋभुमते तस्मै बृहते। विभुमते विभवे। वाजवते अन्नवते। बृहस्पतये वाताय। विश्वदेव्यावते [6]विश्वेषु देवेषु भवः विश्वदेव्यः [7]सोऽस्यास्तीति विश्वदेव्यावान्, तस्मै विश्वदेव्यावते। छान्दसो दीर्घः। प्रवर्ग्यं त्वां जुहोमि॥ १३॥

[8]यमाय त्वाङ्गिरस्वते पितृमते स्वाहा॥ १४॥

[9]घर्मदेवत्यं यजुः। यमयतीति यमः वातः। तस्मै यमाय त्वा। अङ्गिरस्वते अङ्गिरा इत्यङ्गिरस्वान् इत्यङ्गिरस्वते वाताय। पितृमते पिता पालकोऽस्यास्तीति पितृमान्, तस्मै पितृमते। हे प्रवर्ग्य, तं त्वां जुहोमि। स्वाहा सुहुतमस्तु॥ १४॥

---

१ 'त्वा वाताय स्वाहा''''अप्रतिधृष्यः' नास्ति–क०। २ प्रवर्ग्यं–क०। ३ 'त्वा' नास्ति–ख०।
४ (मा० ३८।८; का० ३८।८)। ५ 'घर्मदेवत्यं यजुः' नास्ति–ख०।
६ विश्वेदेवेषु भवः–ख०। ७ 'सोऽस्यास्तीति विश्वदेव्यावान्' नास्ति–ख०।
८ (मा० ३८।९; का० ३८।९)। ९ 'घर्मदेवत्यं यजुः' नास्ति–ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपयमन्याऽऽसिञ्चति [का० श्रौ० २६।६।१]— .

[1]स्वाहा॑ घ॒र्मा॑य॒ स्वाहा॑ घ॒र्मः पि॒त्रे ॥ १५ ॥

[2]द्वे [3]घर्मदेवत्ये यजुषी। घर्माय घर्मदेवतायै स्वाहा जुहोमि। पित्रे पितृदेवतायै स्वाहा। [4]घर्मरसः सुहुतमस्तु ॥ १५ ॥

वषट्कृते जुहोति [का० श्रौ० २६।६।३]—

[5]विश्वा॒ आशा॑ दक्षिण॒सत्सर्वा॑न्दे॒वान॑याळि॒ह।

स्वाहा॑कृतस्य घ॒र्मस्य॒ मधोः॑ पिबतमश्विना ॥ १६ ॥

आश्विन्यनुष्टुप्। विश्वाः सर्वाः। आशाः कामाः। दक्षिणसत् दक्षिणतः सीदतीति दक्षिणसत्। अग्नेर्दक्षिणतः स्थित्वा ब्रह्मा ब्रवीति—सर्वान् देवान् अयाळिह। सर्वान् देवान् अयाक्षीदिति। इह यज्ञे इष्टवानसीत्येतदाह। स्वाहाकृतस्य घर्मस्य। स्वाहाकारेण कृतः [6]स्वाहाकृतस्तस्य स्वाहाकृतस्य। घर्मस्य रसस्य। मधोः साधुभूतस्य घर्मस्य स्वभागमिति दक्षिणसत्। हे अश्विनौ पिबतम् ॥ १६ ॥

अथ हुत्वोद्र्ध्वमुत्कम्पयति [शत० ब्रा० १४।२।२।१७] इति श्रुतिः। त्रिरुत्कम्पयति [का० श्रौ० २६।६।४] इति सूत्रम्—

[7]दि॒वि धा॑ इ॒मं य॒ज्ञमि॒मं य॒ज्ञं दि॒वि धाः॑।

स्वाहा॒ग्नये॑ य॒ज्ञिया॑य॒ शं यजु॒र्भ्यः॑ ॥ १७ ॥

घर्मदेवत्या [8]गायत्री। दिवि द्युलोके। इमं यज्ञं धाः स्थापय। इमं यज्ञं दिवि धाः। अभ्यासे भूयांसमर्थं मन्यन्ते [निरु० १०।४२]। [9]अनुवषट्कृते जुहोति—स्वाहाग्नय इति। अग्नये स्वाहा सुहुतमस्तु। यज्ञियाय शं यजुर्भ्यः। यज्ञार्हाय अग्नये। यजुर्भ्यः सकाशात्। शं सुखम्। अस्माकमस्त्विति शेषः ॥ १७ ॥

---

१ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः। २ स्वाहा घर्मायेति स्वाहा घर्मपित्र इति च द्वे—ख-ग०। ३ 'घर्मदेवत्ये यजुषी' नास्ति—ख०। ४ 'घर्मः' इत्येव—ख०। ५ (मा० ३८।१०; का० ३८।१०)। ६ 'स्वाहाकृतः' नास्ति—क०। ७ (मा० ३८।११; का० ३८।११)। ८ सामोष्णिक्—सर्वा० टी०। ९ द्रष्टव्यम्—का० श्रौ० [२६।६।५]।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]ब्रह्मानुमन्त्रयते [का० श्रौ० २६।६।६]—

[2]अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १८ ॥

उष्णिग् [3]आश्विनी । अश्विना अश्विनौ । घर्मरसं पातं पिबतम् । हार्द्वानं हृदयस्य प्रियं हृदयसंबन्धि प्रियं वचनं हार्द्वानम् । घर्मं पातम् । अहः अहोभिः । दिवाभिः [4]दिवसैः । अह इत्यत्र पूर्वाह्णवचनः । दिवाशब्दोऽत्र सायंकालवचनः । स हि प्रवर्ग्ययागकालः । ऊतिभिः एतत्कालोपलक्षिताभिः [5]ऊतिभिः [6]अवनैः अग्निनिमित्तभूतैः । तन्त्रायिणे । प्रसारिताः तन्तवः तुरीशलाकाप्रोताः तन्तवः तन्त्रमुच्यन्ते । तन्त्रमिव तन्तुना ऊर्णनाभिरिव अयितुं त्रिलोकान् गन्तुं शीलमस्येति । तन्तौ [7]यथा तन्तुनालिः सूत्रपूरणाय एति तथा त्रींल्लोकानादित्यस्तन्त्रायी; "एष हीमाँल्लोकाँस्तन्त्रमिवानुसंचरति" [शत० ब्रा० १४।२।२।२२] इति श्रुतेः । तस्मै नमः । उत्तरत्राप्यनुषङ्गः । नमो द्यावापृथिवीभ्याम् ॥ १८ ॥

[8]यजमानोऽनुमन्त्रयते

[9]अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम् ।
इहैव रातयः सन्तु ॥ १९ ॥

आश्विनी ककुप् । अपातां पीतवन्तौ । अश्विना घर्मम् । अनु द्यावापृथिवी । अमंसाताम् अनुमतवत्यौ । तथा घर्मंमपातामश्विनौ द्यावापृथिव्यौ अनुमतवत्यौ । द्यावापृथिव्यौ । साध्वभूदिति । यत एवम् अतो ब्रवीमि । इहैव रातयः सन्तु । इहैव यज्ञे एव । रातयः दानानि [10]धनदानानि सन्तु ॥ १९ ॥

पिन्वमानमभिमन्त्रयते[11]—

[12]इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व
क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ॥ २० ॥

---

१ द्रष्टव्यम्–शत० ब्रा० [१४।२।२।१९] । २ (मा० ३८।१२; का० ३८।१२) । ३ 'आश्विनी' नास्ति–ख० । ४ 'दिवसैः' नास्ति–ख० । ५ 'ऊतिभिः' नास्ति–क० । ६ 'अवनैः' नास्ति–ख० । ७ 'यथा तन्तुनाभिः'''''साध्वभूदिति' नास्ति–ख० । ८ द्रष्टव्यम्–का० श्रौ० [२६।६।७] । ९ (मा० ३८।१३; का० ३८।१३) । १० धनानि–क० । ११ अनुमन्त्रयते–का० श्रौ० [२६।६।८]; शत० ब्रा० [१४।२।२।२७] । १२ (मा० ३८।१४; का० ३८।१४) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रवर्ग्यदेवत्या जगती। हे प्रवर्ग्य, इषे [1]पिन्वस्व तुष्ट्यै पिन्वस्व सेचस्व। ऊर्जे अन्नाय पिन्वस्व। ब्रह्मणे ब्राह्मणेभ्यः पिन्वस्व। क्षत्राय क्षत्रियेभ्यः पिन्वस्व। द्यावापृथिवीभ्यां तर्पणाय पिन्वस्व ॥ २० ॥

उत्क्रामत्युत्तरपूर्वार्द्धम् [का० श्रौ० २६।६।६]—

[2]धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय

ब्रह्म धारय क्षत्रं धारय विशं धारय ॥ २१ ॥

हे प्रवर्ग्य, त्वं धर्मासि सर्वस्य जगतो धारकोऽसि। हे सुधर्म, आहुतिपरिणामद्वारेण सुधर्म साधुधारणशील। खरे करोति [का० श्रौ० २६।६।१०]—[अमेनीति]। अमेनि 'मीञ् हिंसायाम्' [१४७७ क्र्यादिः]। अमेनि अहिंसन् अक्रुध्यन्। नृम्णानि धनानि धारय। ब्रह्म ब्राह्मणजातिम्। अथ क्षत्रं धारय। विशं धारय। अस्मे अस्मासु। धारय स्थापय ॥ २१ ॥

शाकलैर्जुहोति [शत० ब्रा० १४।२।२।३१]—

[3]स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः।

स्वाहा पितृभ्य ऊर्ध्वबर्हिर्भ्यो घर्मपावभ्यः स्वाहा

द्यावापृथिवीभ्याᳫं स्वाहा विश्वेभ्यो देवेभ्यः ॥ २२ ॥

सप्त लिङ्गोक्तदेवत्यानि यजूंषि। पूष्णे स्वाहा वायवे प्राणाय[4]। शरसे। शर इति दध्न उपरि स्नेहभूतो रसः शर इत्युच्यते, तद्रूपाय शरसे। ग्रावभ्यः प्राणेभ्यः। "प्राणा वै ग्रावाणः" [शत० ब्रा० १४।२।२।३३] इति श्रुतेः। प्रतिरवेभ्यः प्राणेभ्यः। "प्राणा वै प्रतिरवाः" [शत० ब्रा० १४।२।२।३४] इति। स्वाहा पितृभ्यः ऊर्ध्वबर्हिर्भ्यः। उर्ध्वम् उत्कृष्टं बर्हिर्येषां ते उर्ध्वबर्हिषः, तेभ्यः स्वाहा। घर्मपावभ्यः घर्मसेविभ्यः स्वाहा। द्यावापृथिवीभ्यां प्राणोदानाभ्यां स्वाहा इति। विश्वेभ्यो देवेभ्यः प्राणेभ्यः स्वाहा ॥ २२ ॥

---

१ 'पिन्वस्व' नास्ति—ख०।
२ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः।
३ (मा० ३८।१५; का० ३८।१५)।
४ 'प्राणाय' नास्ति—ख०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः ।
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २३ ॥

रुद्रशब्दः स्तोतृनामसु पठितः [निघ० ३।१६]। रुद्रैः स्तोतृभिः आहूयत इति रुद्रहूतिः, तस्मै रुद्रहूतये स्वाहा। महावीरादुपयमन्यां प्रत्यानयति [शत० ब्रा १४।२।२।४०]– स्वाहा संज्योतिषा ज्योतिः। संज्योतिषा ज्योतिरूपेण। ज्योतिः संगच्छते; "ज्योतिर्वा इतरस्मिन् पयो भवति ज्योतिरितस्याम्" [शत० ब्रा० १४।२।२।४०] इति श्रुतेः। 'अहः केतुना' इति व्याख्यातम् [३७।२२] ॥ २३ ॥

अथ यजमानाय घर्मोच्छिष्टं प्रयच्छति। स उपहवमिष्ट्वा भक्षयति [शत० ब्रा० १४।२।२।४२]—

[2]मधु हुतमिन्द्रतमे अग्ना अश्याम ते देव घर्म
नमस्ते अस्तु मा मा हिꣳसीः ॥ २४ ॥

मधु मधुमत्। मधु हुतं कृतम्। इन्द्रतमे इन्द्रियवत्तमे। अग्नौ हुतम्। ते तुभ्यम्। देवतार्थत्वेनास्माभिर्हुतम्। हे देव हे घर्म प्रवर्ग्य, तच्छेषम् अश्याम। 'अश भोजने' [१५२४ क्रयादिः]। भक्षयामः। हविःशेषभक्षणं कुर्मः। हे देव, तुभ्यं नमोऽस्तु। मा माम्। त्वं मा हिंसीः हिंसां मा कार्षीः। [3]एवमाशिषमाशास्ते ॥ २४ ॥

[4]महावीरमासन्द्यां करोति—

[5]अभीमं महिमा दिवं विप्रो बभूव सप्रथाः।
उत श्रवसा पृथिवीꣳ सꣳसीदस्व महाँ २ असि रोचस्व देववीतमः।
विधूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ २५ ॥

---

१ (मा० ३८।१६; का० ३८।१६)। २ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः।
३ आशिषमेवैतदाशास्ते—शत० ब्रा० [१४।२।२।४२]
४ द्रष्टव्यम्—का० श्रौ० [२६।६।२६]। ५ (मा० ३८।१७; का० ३८।१७)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गायत्रीबृहत्यावनवसाने । [1]यत्र गायत्रीबृहत्यौ मीलिते प्रतीयेते स गायत्रः प्रगाथः, अतिशक्वरी वाऽऽग्नेयी । अभीमं महिमा दिवं विप्रो [2]बभूव । हे श्रीभगवन्नग्ने, प्रवर्ग्यात्मकाग्ने । यस्य तव महिमा माहात्म्यम् । इमं दिवं द्युलोकम् । अभिबभूव अभिभवं चकार । कथंभूतस्त्वम् ? विप्रः महिम्ना मेधावीति स्तूयते, 'प्रा पूरणे' [१०६१ अदादिः] इति वा । अपेक्षितफलस्य परिपूरकः । सप्रथाः सर्वतः पृथुभावयुक्तः । उत अपि च । श्रवसा भवत्कीर्त्या । श्रव इति कीर्तिनाम [निरु० ११।६] । पृथिवीं च ते महिमा अभिबभूव । हे श्रीभगवन्नग्ने, देववीतमः । इतस्त्वां ब्रवीमि । संसीदस्व आसन्द्यां सीदस्व अत्राऽऽसीनो भव । त्वं च महानसि । अतस्त्वं शोचस्व दीप्यस्व । विधूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् । हे श्रीभगवन्नग्ने, मियेध्य । मेध्य इति प्राप्ते मियेध्य इति छान्दसं पदम् । हे मियेध्य हे यज्ञिय आर्ष, आरोचने धूमं विसृज । हे प्रशस्त हे श्रीभगवन्नग्ने । दर्शतं दर्शनीयम् । इत उत्तरमाहुतिपरिणामं भवत्विति शेषः ॥२५॥

चतुर्गृहीतेनाभिजुहोति [२६।७४]—

[3]या ते घर्म दिव्या शुग्या गायत्र्याᳪं हविर्धाने । सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा । या ते घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे । सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा । या ते घर्म पृथिव्याᳪं शुग्या जगत्याᳪं सदस्या । सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा ॥ २६ ॥

यत्रातिशक्वर्यनुष्टुभौ मीलिते सोऽतिशाक्वरः प्रगाथः । हे घर्म, ते तव । दिव्या दिवि भवा शुक् । द्युलोकं प्रविष्टा च दीप्तिः । शुक् दीप्तिः । गायत्र्यां या प्रविष्टा हविर्धाने च या शुक् दीप्तिः । सा ते तव । आप्यायताम् आप्यायनं कुरुताम् । निष्ट्यायताम् । 'स्त्यै ष्ट्यै शब्दसंघातयोः' [६१०–११ भ्वादिः] । निः नितरां स्त्यायतां संघातभावमापद्यताम् । तस्यै शुचे ते तुभ्यं स्वाहा । या ते घर्म । हे घर्म प्रवर्ग्य रसरूप । ते तव अन्तरिक्षे अन्तरिक्षस्थाने प्रविष्टा या शुक् । या च त्रिष्टुभि श्रिता शुक् । या च आग्नीध्रे या च दीप्तिः । सा त इत्यादिः समानार्थः । या ते घर्म ते तव पृथिव्यां प्रविष्टा या शुक् । या च जगत्यां छन्दसि स्थिता शुक् । सदस्या सदसि सभायां भवा या शुक् । आप्यायतामित्यादिः समानार्थः ॥ २६ ॥

---

१ 'यत्र' नास्ति–ख० । २ 'बभूव'''विप्रः महिम्ना' नास्ति–ख० ।
३ (मा० ३८।१८; का० ३८।१८) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]निष्क्रामति—

[२]क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।

विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे ॥ २७ ॥

लिङ्गोक्तदेवत्या बृहती । [३]क्षत्रस्य क्षत्रसंबन्धिनः । परस्पाय परं प्रकृष्टं घर्मं पावयति पातीति वा परस्पः, तस्मै परस्पाय परमाय । ज्वलनाय ज्वलनार्थम् । हे महावीर, ब्रह्मणस्तन्वं शरीरम् । पाहि पालय । विशस्त्वा धर्मणा । "यज्ञो वै विट्" [शत० ब्रा० १४।३।१।१६] इति श्रुतेः । विशः यज्ञस्य । धर्मणा यज्ञसंबन्धित्वेन विहितधर्मेण । त्वा महावीरं त्वाम् । अनुक्रामाय अनुगच्छेम । किमर्थमिति ? सुविताय [४]सुसमानाय अरिष्टयै । नव्यसे । असौ इति दीप्यदनेष्टुः [?] । निपूर्वस्य नेर्नाशार्थः[?] । नव्यसे [५]अविनाशाय । महावीरं त्वामनुगच्छेमेति संबन्धः ॥ २७ ॥

[६]महावीरं निदधाति—

[७]चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः

स नः सर्वायुः सप्रथाः । अप द्वेषो अपह्वरोऽन्यव्रतस्य सश्चिम ॥२८॥

प्रवर्ग्यदेवत्या महाबृहती । महावीरः चतुःस्रक्तिः [८]महावीरस्य परितः । दिशः स्रक्तयः, "दिशो ह्येतस्य स्रक्तयः" [शत० ब्रा० १४।३।१।१७] इति श्रुतेः । चतस्रः स्रक्तयो दिशो यस्य, चतुःस्रक्तिः महावीरः । किं च, नाभिः [९]ऋतस्य यज्ञस्य नाभिः महावीरः । स च सप्रथाः सर्वतः पृथु । स त्वं नः अस्माकं विश्वायुः । [१०]सर्वायुः सप्रथाः अस्मान्प्रथयिता च । आदरार्थोऽयमभ्यासः । [११]सर्वायुः सर्वायुषो दाता सर्वतश्च प्रथयितास्तु । अभ्यासे भूयांसमर्थं मन्यन्ते [निरु० १०।४२] इति । त्वत्प्रसादाच्च अपद्वेषः द्वेषादिः अपगच्छेत् । एवं चेद्वीतरागा भवेम । अपह्वरः [१२]'ह्वर ह्मल चलने' [८०५—६ भ्वादिः] अपह्वरः अस्मत्तः [१३]अपगतचलनः

१ द्रष्टव्यम्—का० श्रौ० [२६।७।६] । २ (मा० ३८।१९; का० ३८।१९) ।
३ 'क्षत्रस्य' नास्ति—ख० । ४ सुखमानाय—क-ग० । ५ अरिविनाशाय—ख० ।
६ द्रष्टव्यम्—का० श्रौ० [२६।७।१४] । ७ (मा० ३८।२०; का० ३८।२०) ।
८ महावीरस्य परितः शक्तस्य परितः—ख० । ९ 'ऋतस्य यज्ञस्य नाभिः' नास्ति—ख० ।
१० 'सर्वायुः' नास्ति—ख० । ११ 'सर्वायुः'''त्वत्प्रसादाच्च' नास्ति—ख० ।
१२ 'ह्वर'''अस्मत्तः' नास्ति—ख० । १३ अपगतवचनः वचनशून्यः—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलनशून्यो भवतु । अन्यव्रतस्य । कर्मणि षष्ठी । अन्यव्रतं कर्म । सश्चिम । सश्चतिः सेवाकर्मा । सेवामहे ॥ २८ ॥

पयसा पूरयति [का० श्रौ० २६।७।३२]—

[1]घर्मैतत्ते पुरीषं तेन वर्द्धस्व चा च प्यायस्व ।

वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ २९ ॥

घर्मदेवत्याऽनुष्टुप् । हे घर्म, एतत् [2]एतत्कर्म । पुरीषं तव पूरयिता । तेन कर्मणा वर्धस्व अभिवृद्धिं कुरु । चा च प्यायस्व । [3]चकारो भिन्नक्रमः । आप्यायस्वेति । [4]अन्यद् व्याख्यातम् [२।२७] ॥ २९ ॥

[5]परिषिञ्चति—

[6]अचिक्रदद् वृषा हरिर्महान्मित्रो न दर्शतः ।

सꣳ सूर्येण दिद्युतदुदधिर्निधिः ॥ ३० ॥

[7]परोष्णिक् । अत्र घर्मात्मना आदित्यः स्तूयते । [8]यो महावीरः अचिक्रदत् । क्रन्दिरु[?] गतिशोषणयोः । क्रन्दतिरत्र शब्दवचनः । अचिक्रदत् पुनः पुनः [9]शब्दमकरोत् । वृषा वर्षिता आहुतिपरिणामद्वारेण । [10]हरिः हरितवर्णः, हर्ता वा रसानाम् । [11]महान् प्रभावतः । मित्रो न [12]दर्शतः मित्र इव दर्शनीयः । [13]मित्रः सूर्यो हि सर्वस्यैव मित्रम् । संसूर्येण [14]सूर्येण सह संगत्य । दिद्युतत् दिद्योतते । स्पर्धमान इव । उदधिः उदकधारकः । उदधिरिवोदधिः । निधिश्च अपेक्षितार्थफलसाधनत्वेन निधिश्च ॥ ३० ॥

---

१ (मा० ३८।२१; का० ३८।२१)। २ 'एतत्कर्म' नास्ति–ख० ।
३ 'चकारो भिन्नक्रमः' नास्ति–ख० । ४ व्याख्यातो मन्त्रः–ख० ।
५ द्रष्टव्यम्–का० श्रौ० [२६।७।१२]। ६ (मा० ३८।२२; का० ३८।२२)।
७ लिङ्गोक्तदेवत्योष्णिक्–ख०, पुरउष्णिक्–क-ग० । ८ 'यः' नास्ति–क० ।
९ शब्दं करोति–ख० । १० रसानाहरतीति हरिः–ख० ।
११ 'प्रभावतः' नास्ति–ख० । १२ 'दर्शतः' नास्ति–ख० ।
१३ मित्रो नाम सूर्यः सर्वस्य मित्रम्–ख० । १४ 'सूर्येण' नास्ति–ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]तथा चात्वालेऽप उपस्पृशन्ति—

[2]सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ ३१ ॥

प्राङिवोदङ्ङुत्क्रामति [श० ब्रा० १४।३।१।२८]—

[3]उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥
[4]एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥ ३ ॥

मन्त्रावेतौ व्याख्यातौ [६।३१; २२।६–७] ॥ ३१–३२ ॥

[5]दधिघर्मग्रहणम् [का० श्रौ० २६।७।५४]—

[6]यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥ ३३ ॥

दधिघर्मदेवत्या [7]महाबृहती । यावती यावत्परिमाणे । द्यावापृथिवी द्यावापृथिव्यौ । यावच्च । व्यत्ययः । यावन्च सप्त सिन्धवः । समुद्राश्च यावत्परिमाणपरिमिताः । वितस्थिरे विशेषतः स्थिराः । हे इन्द्र, तावन्तं तावत्परिमाणपरिमितम् । ते त्वदीयं ग्रहम् । ऊर्जा अन्नेन सह गृह्णामि । पुनः कथंभूतं ग्रहम् ? अक्षितम् अनुपक्षीणम् । गृह्णामीति संबन्धः । अपि च [8]मयि गृह्णाम्यक्षितम् । मयीत्यधिकारिणो निर्देशः । विज्ञानात्मनिश्चयः । तं ग्रहं गृह्णामीति ॥३३॥

भक्षयति [शत० ब्रा० १४।३।१।३१]—

[9]मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः ।
घर्मस्त्रिशुग्विराजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥३४॥

---

१ द्रष्टव्यम्—का० श्रौ० [२६।७।३७] । २ (मा० ३८।२३; का० ३८।२३) ।
३ (मा० ३८।२४; का० ३८।२४) । ४ (मा० ३८।२५; का० ३८।२४) ।
५ दधिलिङ्गग्रहणम्—ख० । ६ (मा० ३८।२६; का० ३८।२५) । ७ ब्राह्मी उष्णिक्—सर्वा० टी० ।
८ 'मयि' नास्ति—ख० । ९ (मा० ३८।२७; का० ३८।२६) ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पङ्क्तिर्यजमानाशीः। मयि त्यत्। तद् इन्द्रियं वीर्यं बृहत् तदस्तु। मयि दक्षः क्रतुः। 'दक्ष वृद्धौ [शीघ्रार्थे च]' [६०८ भ्वादिः] अतिवृद्धिमानस्तु। यद्वा क्रतुः संकल्पः दक्षः फलपर्यन्तोऽस्तु। मयि घर्मस्त्रिशुक्। [1]त्रिषु लोकेषु शोचते शोभत[2] इति त्रिशुक्। विराजति विशेषतो दीप्यते। केन सह विराजत इति ? विराजा ज्योतिषा सह। [3]विराजा आदित्याख्येन ज्योतिषा सह विराजते। ब्रह्मणा अग्न्याख्येन तेजसा सह। यद्वा ब्रह्मणा वेदलक्षणेन तेजसा सह विराजते ॥ ३४ ॥

[4]पयसो रेत आभृतं तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम् ॥ ३५ ॥

अनवसाना गायत्री यजमानाशीर्देवत्या। [5]माध्यन्दिनशाखायां वाजसनेयशाखायां त्वेको मन्त्रः [6]पाङ्क्तः प्रगाथो यजमानाशीर्देवत्यः[7]। किं च, पयसो यद्रेतः वीर्यं जगदुत्पत्त्यादिबीजम् आभृतम्। तस्य एवमा[वृ ? हृ]तस्य रेतसः। दोहं प्रपूरणम्। अशीमहि व्याप्नुयाम। उत्तरामुत्तरां समाम्। उत्तरामुत्तरां समां प्रतिसंवत्सरम्। आदरार्थं इयं वीप्सा। प्रतिसंवत्सरं चाशीमहि। सदेत्यभिप्रायः ॥ ३५ ॥

[8]भक्षणं दधिघर्मस्य—

[9]त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः।
इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमत उपहूत उपहूतस्य भक्षयामि ॥३६॥

[10]घर्मदेवत्या [11]जगती। संपूर्वो वृजिः स्वीकरणे वर्तते। त्विषः दीप्तेः स्वीकारः त्विषः संवृक् यस्य तस्य। कथंभूतस्य ? क्रत्वे क्रतोः क्रतुभूतस्य। दक्षस्य वृद्धस्य संकल्पसिद्धिभूतस्य। सुषुम्णस्य सुखरूपस्य। अग्निहुतः। षष्ठ्यन्तं पदम्। अग्नौ हूयत इत्यग्निहुत्, तस्य अग्निहुतः।

---

१ त्रिलोकेषु—ख०। २ 'शोभते' नास्ति—ख०।
३ 'विराजाख्येन ज्योतिषा सह' इत्यधिकम्—ख०। ४ काण्वसंहितायां पूर्वमन्त्रस्यैवायमन्तिमो भागः, माध्यन्दिनसंहितायां तूत्तरमन्त्रस्यादिमो भागः।
५ अत्र माध्यन्दिनशाखावाजसनेयशाखापदयोः पृथक्प्रयोगाभिप्रायो नैव स्फुटीभवति।
६ 'पाङ्क्तः प्रगाथः' नास्ति—ख०। ७ यजमानाशीर्देवत्या—ख०।
८ द्रष्टव्यम्—का० श्रौ० (२६।७।५६)। ९ (मा० ३८।२८; का० ३८।२७)।
१० दधिघर्मदेवत्या—सर्वा०। ११ अतिजगती—सर्वा० टी०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रपीतस्य इन्द्रेण पीतशेषस्य । प्रजापतिभक्षितस्य प्रजापतिभक्षितशेषस्य । [1]मधुमतः । सर्वतः उपहूतस्य आहूतस्य ते तव भागम् । हे सुग्रुण सुखभाव । अहमुपहूतः सन् भक्षयामि ॥ ३९ ॥

इति [2]श्रीशुक्लयजुःकाण्वसंहिताभाष्यसंग्रहेऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥

---

१ 'मधुमतः' नास्ति—ख० । २ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकोनचत्वारिंशोऽध्यायः

[1]स्वाहा॑ प्रा॒णेभ्यः॒ साधि॑पतिकेभ्यः पृथि॒व्यै स्वाहा॒ग्नये॑ स्वाहा॒न्तरि॑क्षाय॒ स्वाहा॑ वा॒यवे॒ स्वाहा॑ दि॒वे स्वाहा॒ सूर्या॑य॒ स्वाहा॑। दि॒ग्भ्यः स्वाहा॑ च॒न्द्राय॒ स्वाहा॒ नक्ष॑त्रेभ्यः॒ स्वाहा॒द्भ्यः स्वाहा॒ वरु॑णाय॒ स्वाहा॑। नाभ्यै॒ स्वाहा॑ पू॒ताय॒ स्वाहा॑ ॥ १ ॥

[2]इत उत्तरं प्रवर्ग्यभेदप्रायश्चित्तम्[3]—स्वाहा प्राणेभ्यः साधिपतिकेभ्य इति। मान्त्रवर्णिकदेवत्यानि यजूंषि। "सर्वेषां वा एष भूतानाम्" इत्यारभ्य—"घर्मो विदीर्यते तत्र [4]प्रायश्चित्तिः ॥ १ ॥ पूर्णाहुतिं जुहोति। सर्वं वै पूर्णं सर्वेणैवैतद् भिषज्यति यत्किञ्च विवृढं यज्ञस्य" [शत० ब्रा० १४।३।२।१-२] लिङ्गोक्तदेवत्यानि यजूंषि। दध्यङ्ङाथर्वण ऋषिः। "मनो वै प्राणानामधिपतिर्मनसि[5] हि सर्वे प्राणाः प्रतिष्ठिताः। तन्मनसैवैतद् भिषज्यति यत्किञ्च विवृढं यज्ञस्य" [शत० ब्रा० १०।३।२।३] इत्यारभ्य श्रुतिर्विस्तरतो व्याचष्टे। प्राणेभ्यः [6]साधिपतिकेभ्यः लक्षणाधिपतिसहितेभ्यः साधिपतिकेभ्यः स्वाहा। पृथिव्यै [स्वाहा]। प्रसिद्धार्था एते मन्त्राः। अग्नये, अन्तरिक्षाय, वायवे स्वाहा। दिवे स्वाहा[7]। सूर्याय, दिग्भ्यः, चन्द्राय, नक्षत्रेभ्यः, अद्भ्यः, वरुणाय, नाभ्यै, पूताय स्वाहा। स्वाहेति होमार्थः ॥ १ ॥

[8]वा॒चे स्वाहा॑ प्रा॒णाय॒ स्वाहा॑ प्रा॒णाय॒ स्वाहा॑।
चक्षु॑षे॒ स्वाहा॒ चक्षु॑षे॒ स्वाहा॒ श्रोत्रा॑य॒ स्वाहा॒ श्रोत्रा॑य॒ स्वाहा॑ ॥ २ ॥

वाचे स्वाहा [9]प्राणाय स्वाहा प्राणाय चक्षुषे [चक्षुषे] [10]श्रोत्राय श्रोत्रायेति सप्तैता आहुतीर्जुहोति ॥ २ ॥

---

१ (मा० ३९।१–२)। २ अध्यायारम्भे—"श्रीकृष्णाय नमः। हरिः ॐ" इति—ख०, 'ॐ' इति—ग०।
३ द्रष्टव्यम्—का० श्रौ० [२६।७।४९] । ४ प्रायश्चित्तम्—क-ख-ग०।
५ 'मनसि हि सर्वे प्राणाः प्रतिष्ठिताः' नास्ति—क-ख-ग०।
६ साधिपतिकेभ्यः मनोलक्षणाधिपतिकेभ्यः मनोलक्षणाधिपतिसहितेभ्यः साधिपतिकेभ्यः—ख०।
७ 'स्वाहा' नास्ति—ख०। ८ (मा० ३९।३)।
९ 'प्राणाय स्वाहा' नास्ति—क-ग०। १० 'श्रोत्राय' नास्ति—क-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]मनसः काममाकूतिं वाचः सत्यमशीय ।

पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥ ३ ॥

[2]बृहती यजमानाशीर्देवत्या । मनसः कामं मनसो धर्मं विषयाभिलाषरूपम् । आकूतिम् अभिप्रायविशेषम् आत्मनो धर्मं मनसः संयोगाज्जायमानम् । वाचः सत्यं यथावस्तु[वदन]रूपं वाचो धर्मम् । अनया पूर्णाहुत्या । अशीय 'अशू[3] व्याप्तौ [संघाते च]' [१२६५ स्वादिः] व्याप्नुयाम् । किं च, पशूनां रूपं पशूनां स्वरूपं सारभूतम्, रूप्यन्ते पशवोऽनेनेति रूपं क्षीरम् । किं च, अन्नस्य य एष प्रसिद्धो मधुरादिरसः । [4]यशः अनिन्द्यकीर्तिश्च । श्रीश्च धनधान्यादि-संपत्तयः । प्रत्येकं श्रयतां मयि । विभक्तिव्यत्ययः । मयीति मां श्रयताम् । यन्महावीरमेदेन [पठितं ? अपचितं] तत्सर्वमुपचीयतामित्यर्थः । स्वाहा सुहुतमस्तु ॥ ३ ॥

[5]प्रजापतिः संभ्रियमाणः सम्राट् संभृतो वैश्वदेवः सꣳसन्नो घर्मः प्रवृक्तस्तेज उद्यत आश्विनः पयस्यानीयमाने पूषा विष्यन्दमाने मारुतः क्वथन् । मैत्रः शरसि संताय्यमाने वायव्यो ह्रियमाण आग्नेयो हूयमानो वाग्घुतः ॥ ४ ॥

[6][अ ? य]थाकालप्रायश्चित्तदेवत्या श्रुतिः, महावीरावस्थाप्रतिपादिका[7] । संभ्रियमाणो महावीरः प्रजापतिः प्रजापतिस्वरूपो भवतीति स्तूयते । "प्रजापतिदेवत्यो वा तदजायत" इति श्रुतेः । यदा महावीरः संभृतस्तदा सम्राट् । यदा संसन्नः संपन्नस्तदा वैश्वदेवो भवतीति । घर्मः यदा प्रवृक्तः । तेजः तेजोरूपो भवति यदा उद्य[ते ? तः] । पयसि आनीयमाने आश्विनो भवति । पूषा विष्यन्दमाने सति पूषा भवति । मारुतः य[द्वा ? दा] क्वथन् क्वथनं गच्छन् स्थितः तदा मारुतो भवति । मैत्रः मित्रदेवत्यः । शर[दि ? सि] उपरि घनीभूते रसे संह्रार्यमाणे सति मैत्रो भवति । वायव्यो ह्रियमाणः यदा[8] ह्रियमाणस्तदा वायव्यो भवति । आग्नेयः यदा हूयमानः तदाग्नेयो भवति । यदा हुतस्तदा वाक् वाग्देवत्यो भवति ॥ ४ ॥

---

१ (मा० ३९।४) । २ अनुष्टुब् यजमानाशीः श्रीर्देवता—सर्वा० ।
३ अशूङ्—क-ख-ग० । ४ 'यशः' नास्ति—ख० । ५ (मा० ३९।५) ।
६ प्रजापतिः संभ्रियमाणो यथाकालं प्रायश्चित्तदेवताः—सर्वा० ।
७ द्रष्टव्यम्—का० श्रौ० [२६।७।५०] । ८ 'यदा ह्रियमाणः' नास्ति-ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थ

चन्द्रमाः पञ्चम ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे ।

मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वेदेवा द्वादशे ॥ ५ ॥

प्रत्यहं [2]देवतासम्बन्धविधानेन स्तौति । [3]प्रत्येकं क्रमेण तद्देवत्यानि यजूंषि । सविता प्रथमेऽहन्निति सविता देवता । अग्निः द्वितीये अग्निर्देवता । तृतीये वायुर्देवता । चतुर्थेऽहनि आदित्यो देवता । पञ्चमे चन्द्रमा देवता । षष्ठेऽहनि ऋतुर्देवता । सप्तमे मरुतो देवताः । अष्टमे बृहस्पतिर्देवता । नवमेऽहनि मित्रो देवता । दशमेऽहनि वरुणो देवता । एकादशेऽहनि इन्द्रो देवता । द्वादशे विश्वेदेवा देवताः ॥ ५ ॥

'उग्रश्च' इत्यादिकानामरण्येऽध्येयत्वसामान्यादिह पाठः—

[4]उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ।

सासह्वाꣳश्चाभियुग्वा च विक्षिपः स्वाहा ॥ ६ ॥

मारुती गायत्री, यजुरन्ता । [5]मुख्ये मन्त्रो विनियुक्तस्तस्मादाग्निक एव ऋषिः । परमेष्ठी प्राजापत्यो वा । उग्रः । चकारः समुच्चयार्थः । भीमश्च ध्वान्तश्च धुनिश्च सासह्वांश्च[6] अभियुग्वा च विक्षिपश्चेत्येवं सप्त मरुतः । स्वाहेति होमार्थः ॥ ६ ॥

[7]अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना ।

शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं

देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ ७ ॥

[8]'अग्निꣳ हृदयेन', 'उग्रं लोहितेन' इति[9] चाश्वमेधिकौ । अनयोररण्येऽध्ययनसामान्यादिह पाठः । तत्रोक्त एव ऋषिर्द्वयोः कण्डिकयोः । श्रुत्युक्त एव देवता, पश्वन्नयवसंबन्धविधानात् । आद्यो नानादेवत्य औष्णिहः प्रगाथः, द्वितीयो बार्हतः प्रगाथो नानादेवत्यः । अश्वस्य हृदयाद्यवयवैरग्न्यादिदेवताः प्रीणाति । अग्निं हृदयेन, प्रीणातीति शेषः । अशनिं देवतां हृदया-

---

१ (मा० ३९।६) । २ द्रष्टव्यम्-का० श्रौ० [२१।७।५१] । ३ प्रत्यहम्-सर्वा० ।
४ (मा० ३९।७) । ५ विमुखाख्यो मन्त्रोऽग्नौ विनियुक्तः-सर्वा० । ६ 'च' नास्ति-क० ।
७ (मा० ३९।८) । ८ 'अग्निꣳ हृदयेन' नास्ति-क० । ९ 'इति' नास्ति-क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रेण प्रीणाति । पशुपतिं देवतां कृत्स्नहृदयेन प्रीणाति । भवं यक्ना अन्नदानविशेषेण प्रीणाति । [1]शर्वं मतस्नाभ्याम् । मन्युना ईशानं प्रीणाति । [2]महादेवमन्तःपर्शव्येन । उग्रं देवं वनिष्ठुना प्रीणाति । [3]वसिष्ठहनुः शिङ्गीनि च देवत्रे कोश्याभ्यामवयवाभ्यां प्रीणाति ॥ ७ ॥

[4]उग्रं लोहितेन मित्रꣳ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीळेन मरुतो बलेन साध्यान्प्रमुदा । भवस्य कण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥ ८ ॥

उग्रं देवं लोहितेन प्रीणाति । मित्रं देवं सौव्रत्येन प्रीणाति । रुद्रं देवं दौर्व्रत्येन प्रीणाति । इन्द्रं प्रक्रीळेन प्रीणाति । मरुतो बलेन प्रीणाति । साध्यान् देवान् प्रमुदा प्रीणाति । भवस्य कण्ठ्यं भवस्य [5]देवस्य कण्ठ्यं कण्ठे भवं दास्यामि । रुद्रस्य देवस्य अन्तःपार्श्व्यं दास्यामि । महादेवस्य यकृत् दास्यामि । शर्वस्य देवस्य [यकृत् ?] वनिष्ठुः [देवः ?] । पशुपतेर्देवस्य पुरीतत् सर्वनाडीषु[ष्ण ? ष्य]प्रदेशो देशः ॥ ८ ॥

इत उत्तरम् [आ] अध्यायसमाप्तेः प्रायश्चित्ताहुतीराह—

[6]लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदसे स्वाहा मेदसे स्वाहा । माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा । रेतसे स्वाहा पायवे स्वाहा ॥ ९ ॥

[7]लोमभ्यः स्वाहेत्यादयश्चत्वारिंशत्प्रायश्चित्ताहुतयः । लोमभ्यः स्वाहा पुनश्च लोमभ्यः

---

१ 'शर्वं मतस्नाभ्याम्' नास्ति—ख० । २ 'महादेवमन्तःपर्शव्येन' नास्ति—ख० ।
३ 'वसिष्ठहनुः' नास्ति—ख० । ४ (मा० ३९।९) । ५ देवस्य' नास्ति—क० ।
६ (मा० ३९।१०) । ७ 'लोमभ्यः' नास्ति—क० । लोमभ्यः स्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिंशत्—सर्वा०, अष्टत्रिंशदिति काण्वसर्वानुक्रमपाठः । माध्यन्दिनमन्त्रेषु द्विचत्वारिंशदाहुतयः पठिताः, काण्वमन्त्रेषु चाष्टत्रिंशत् । आनन्दबोधेन तु "रेतसे स्वाहा पायवे स्वाहा" इत्यनयोरावृत्तिं विधाय चत्वारिंशदाहुतयः पठिताः । किमत्र मूलमिति न जानीमः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाहा । त्वचे स्वाहा पुनश्च त्वचे स्वाहा । लोहिताय स्वाहा पुनश्च लोहिताय स्वाहा । मेदसे स्वाहा पुनश्च मेदसे स्वाहा । मांसेभ्यः स्वाहा पुनश्च मांसेभ्यः स्वाहा । स्नावभ्यः स्वाहा पुनश्च स्नावभ्यः स्वाहा । अस्थभ्यः स्वाहा पुनः अस्थभ्यः स्वाहा । मज्जभ्यः स्वाहा पुनः मज्जभ्यः स्वाहा । रेतसे स्वाहा पुनः रेतसे स्वाहा । पायवे स्वाहा पुनः पायवे स्वाहा । [रेतसे पायवे] इति द्वे [द्वे] नामनी द्वयोरावृत्तिः कार्येति न्यायतो ज्ञातव्यं न तु पाठतः ॥ ९ ॥

[1]आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय
स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा शोकाय स्वाहा ॥ १० ॥

[2]तपसे स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा ।
निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ॥ ११ ॥

[3]यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ।
ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याᳬं स्वाहा ॥ १२ ॥

आयासाय स्वाहा । प्रायासाय स्वाहा । संयासाय स्वाहा । वियासाय स्वाहा । उद्यासाय स्वाहा । शुचे स्वाहा । शोचते स्वाहा । शोकाय स्वाहा । तपसे स्वाहा । तप्यमानाय स्वाहा । तप्ताय स्वाहा । निष्कृत्यै स्वाहा । प्रायश्चित्यै स्वाहा । भेषजाय स्वाहा । यमाय स्वाहा । अन्तकाय स्वाहा । मृत्यवे स्वाहा । ब्रह्महत्यायै स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा । द्यावापृथिव्यां स्वाहा ॥ १०–१२ ॥

इति [4]शुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे एकोनचत्वारिंशोऽध्यायः[5] ॥ ३९ ॥

---

१ (मा० ३९।११)। २ (मा० ३९।१२)।
३ (मा० ३९।१३)। ४ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे–ख·ग० ।
५ अध्यायसमाप्तौ–"इति श्रीमद्गजाननार्पणमस्तु" इति–क० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चत्वारिंशोऽध्यायः

ईशा वास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥ १॥

(ख०) [1]दर्शपूर्णमासाद्यश्वमेधान्तं कर्मकाण्डं समाप्तम्। अथेदानीं ज्ञानकाण्डं प्रस्तूयते—ईशा वास्यमिति। 'ईशा वास्यम्' इत्यादीनां मन्त्राणामपि यथाकथंचन कर्मसु विनियोगः किं न स्यादिति केनचित्[द्वः ! द्वम्]—"नियुक्तान् पुरुषान् ब्रह्मा दक्षिणतः पुरुषेण नारायणेनाभिष्टौति—'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' [३५।१] इत्यनेन षोडशर्चेन" [शत० ब्रा० १३।६।२।१२] इत्यादि। [ततः ! तन्न;] 'ईशा वास्यम्' इत्यादिमन्त्राणां कर्मसु प्रमाणतोऽविनियोगात्। यागकल्पनायां तु विशेषं परिहृत्यैव यागकल्पना सा भवति नेतरेति श्रीभगवच्छङ्कराचार्यो विरोधादेवाविनियोगस्तेषां मन्त्राणां कर्मणीति प्रतिपादयति—"'ईशा वास्यम्' इत्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशत्वात्" [ई० शां० भा० १] इति। तमेवं सविस्तरं प्रतिपादयति—"याथात्म्यं [च] आत्मनः शुद्धत्वापापविद्ध[त्वैकत्वनित्य]त्वाशरीर[त्वसर्वगत]त्वादि वक्ष्यमाणम्। [तच्च] कर्मणा विरुध्यत इत्यतो युक्तस्तेषां कर्मस्वविनियोगः। न ह्येवंलक्ष[णत्वं ! णम्] [आत्मनो] याथात्म्यमुत्पाद्यं [विकार्यमाप्यं] संस्कार्यं [कर्तृत्वं भोक्तृत्वं ! कर्तृभोक्तृरूपं वा], येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात्, गीतानां मोक्षधर्माणां चैतत्परत्वात्। तस्मादात्मनोऽ[2]नेकत्वकर्तृत्व-

---

१ "श्रीकृष्णाय नमः॥ हरि ॐ" इत्येवं खपुस्तकेऽध्यायारम्भे। अत्रेदं बोध्यम्—गसंज्ञको हस्तलेख एकोनचत्वारिंशदध्यायसमाप्तिपर्यन्त एव विद्यते, कसंज्ञके हस्तलेखे चास्या उपनिषदः शाङ्करभाष्यमेवाविकलरूपेण क्वचन क्वचन पाठभेदेन सहाऽऽनन्दबोधनाम्ना स्थापितमास्ते; अतोऽत्रानन्दबोधभाष्यं केवलं खसंज्ञकहस्तलेखमवलम्ब्याऽऽनन्दाश्रममुद्रिततद्भाष्यसाहाय्येन संपाद्यते। विज्ञाः कसंज्ञकहस्तलेखपरिचयमप्यासादयन्त्विति धिया च गौणरूपेणात्र तस्यापि प्रकाशने मतिर्नियोजिता।

२ 'अनेकत्व'''चोपादाय' इत्यस्य स्थाने—'अपृथक्त्वाकर्तृत्वादि शुद्धत्वादि नोपादाय तस्य' इति पाठः—ख-आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धानि कर्माणि विहितानि । यो हि [1]कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काण[त्व]कुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति । तस्मादेते मन्त्रा ह्यात्मनो याथात्म्यप्रकाशनेनात्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति । [2]एवमुक्ताधिकार्यभिधेयसंबन्धप्रयोजनान् मन्त्रान् संक्षेपतो व्याख्यास्यामः" [ई० शां० भा० १] [इति] । अस्य कृत्स्नस्याध्यायस्य दध्यङ्ङाथर्वण ऋषिः, आत्मा देवता प्रतिमन्त्रं च । 'ईशा वास्यम्', 'कुर्वन्नेव', 'असुर्या नाम' इति तिस्रोऽनुष्टुभ आत्मदेवत्याः, दध्यङ्ङाथर्वण ऋषिः । अत्र च कञ्चन पुत्रं शिष्यं वा गर्भाधानादिभिः संस्कारैः संस्कृतशरीरमधीतवेदमुत्पादितपुत्रमिह जन्मनि जन्मान्तरे वा यथाशक्त्यनुष्ठितयज्ञादिना क्षपितकल्मषं नित्यानित्यवस्तुविवेकवन्तं दैववशात् कथञ्चिदिहामुत्रार्थफलभोगविरागयुक्तं शमदमादिसंपन्नं मुमुक्षु शिक्षय[ति?न्ती] स्वयमाचार्यस्वरूपा सती श्रुतिराह—ईशा वास्यमिति । 'ईश ऐश्वर्ये' [१०२० अदादिः] । अस्य क्विबन्तं तृतीयान्तं रूपमीशेति । ईष्टे इतीट् तेनेशा ईशित्रा ईशानेन परमेश्वरेण परमात्मना सर्वजन्तूनामात्मभूतेन स्वेनाऽऽत्मना ईशा । वास्यम् 'वस निवासे' [१००५ भ्वादिः] । वास्यं निवसनीयम् । किमिति ? इदं प्रत्यक्षादिभिः प्रतीयमानं साक्षिदृश्यं च, इदमात्मव्यतिरिक्तं सर्वम्, इदमीशा वास्यम्, सर्वेषु स्वकार्येषु स्वकारणभूते[न] निवास्यं [जगति?जगत्] । जगत्यां पृथिव्यां जगत्युपलक्षिते जगति । किञ्चेति चकारो भिन्नक्रमः । जगति व्यक्तं च लोकप्रसिद्धं वस्तुजातं तत्सर्वमीशा वास्यं निवास्यं स्वेनात्मना निवास्यम् । किं च, 'वस आच्छादने' [१०२३ अदादिः] "अहमेवेदं सर्वम्" [छान्दो० ७।२५।१] इति परमसत्यरूपेण ईशा परमात्मनाऽनृतमिदं सर्वं वास्यं छादनीयमाच्छादनीयम्, कार्यस्य कारणसत्ताप्रकाशव्यतिरेकेणारोपितस्याधिष्ठान[सत्ता]प्रकाशव्यतिरेकेण पृथक्सत्ताप्रकाश[न?]भावादेवेदं सर्वं जगदीशा वास्यम्; यतः प्रत्यगात्मनः सच्चिदानन्दलक्षणपुरुषार्थरूपं स्वत एव सिद्धम् । तेन स्वस्मिन्नारोपितस्याहमिदं ममेदमित्येवमनात्मकस्य सर्वस्यानर्थभूतस्य जगतः, त्यक्तेन त्यागेन सर्वाधिष्ठानभूतस्वस्वरूपयाथात्म्यानुभवसामर्थ्यसिद्धेन त्यक्तेन त्यागेन । आत्मानं भुञ्जीथाः ।

---

१ 'कर्मफलेनार्थी.....धर्मवान्' इत्यस्य स्थाने 'इष्टेन कर्मफलेन ब्रह्मवर्चसा वाऽदृष्टेन स्वर्गादिना वाऽनुमीयते तत्र च द्विजातिरहं लक्षणाद्यधिकारधर्मवान्' इति पाठः—ख-आ० ।

२ एवमुक्तसंबन्धविषयप्रयोजनम्—ख० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]'भुजोऽनवने' इत्यस्य रूपम् (?)। पालनेऽपि च्छन्दस्यात्मनेपदं भवति। अत आत्मानं भुञ्जीथाः पालयेथाः। कृ[त? तं] कृत्यं प्राप्तं प्रापणीयम्, "आत्मलाभान्न परं विद्यते" इति श्रुतेः। एवं त्यक्तैषणस्त्वं मा गृधः कस्यस्विद्धनम्। 'गृधु अभिकाङ्क्षायाम्' [१२४७ दिवादिः]। कस्यस्वित् परस्य। धनं मा गृधः अभिकाङ्क्षां मा कार्षीः, धनविषयाभिकाङ्क्षां मा कार्षीरित्यर्थः। स्विदिति निपातो वितर्कवचनः [निरु० ३।१५; ११।२८]। अस्य संपूर्णकामत्वादेवान्यार्थविषयाकाङ्क्षा किं नु कर्तव्या? न कर्तव्येत्यर्थः। विचार्यमाणे तथाविधस्यार्थस्याभावादेव। अथवा मा गृधः कस्यस्विद्धनमित्याक्षेपार्थः। न कस्यचिद्धनमस्ति यद् गृध्येत। "आत्मैवेदं सर्वम्" [छान्दो० ७।२५।२] इतीश्वरभावनया सर्वं द्वैतमात्रं त्यक्तम्, अत आत्मन एवेदम्, आत्मन एव तु सर्वम्। परस्य कस्यचित् संबन्धित्वेन प्रतीयमानस्य स्व[यं?]संबन्धित्वमापादयितुमभिकाङ्क्षां मा कार्षीः। अतः स्वव्यतिरेकेण मिथ्याविषयं ग्रहं मा कार्षीरित्यर्थः॥ १ ॥

(क०) [२]येनात्मना परेणेशा व्याप्तं विश्वमशेषतः।
सोऽहं देहद्वयीसाक्षी वर्जितो देहतद्गुणैः॥

'ईशा वास्यम्' इत्यादयो मन्त्राः कर्मस्वविनियुक्ताः, तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। [तच्च] कर्मणा विरुध्यत इति युक्त एवैषां कर्मस्वविनियोगः। न ह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं वा कर्तृभोक्तृ[रूपं] वा, येन कर्मशेषता स्यात्; सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात्, गीतानां मोक्षधर्माणां [३]चैवात्मयाथात्म्यपरत्वात्। तस्मादात्मनोऽनेत्वकर्तृ[त्व]भोक्तृत्वादि चाशुद्धपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। यो हि [४]कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काण[त्व]कुब्जत्वाद्यनधिकार[प्रयोजक]धर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति। तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनात्मविषयं

---

१ अनवनेऽर्थे भुजधातोरात्मनेपदप्रतिपादकं सूत्रम् [१।३।६६] इदम्। धातुस्तु 'भुज पालनाभ्यवहारयोः' [१४५५ रुधादिः] इति।

२ 'अथेशोपनिषदारम्भः ॥ ॐ नमोऽव्यक्ताय नमः ॥ ॐम्' इत्येवं कपुस्तकारम्भः। 'येनात्मानम्' इति श्लोकः शाङ्करभाष्ये नास्ति।

३ चैवंपरत्वात्–शां० भा०। ४ कर्मफलेनार्थादृष्टेन–क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्तीति। एवमुक्ताधिकार्यभिधेयसंबन्धप्रयोजनान् मन्त्रान् संक्षेपतो व्याख्यास्यामः। [1]पाठस्तु—

[2]ईशा वास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥ १ ॥ इति। ईशा ईष्ट इति ईट्, तेन ईशा। [ईशा ?] ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन् [प्रत्यगात्मतया]। तेन स्वेन [रूपेण] आत्मना ईशा वास्यम् आच्छादनीयम्। किम् ? इदं सर्वं यत्किञ्च यत्किञ्चित् जगत्यां पृथिव्यां जगत् [तत्] सर्वम्। स्वेनात्मना [ईशेन] प्रत्यगात्मतया "अहमेवेदं सर्वम्" [छान्दो०७।२५।१] इति परमार्थसत्यरूपेणानृतमिदं सर्वं [चराचरम्] आच्छादनीयं स्वेन परमात्मना। यथा चन्दनागर्वादेरुदकादिसंबन्धजक्लेदादिजं [औपाधिकं] दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकगन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद् द्वैतरूपं [जगत्यां] पृथिव्याम्। जगत्यामित्युपलक्षणार्थत्वात् सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो [वा] भृत्यो वाऽऽत्मसंबन्धिताया अभावादात्मानं पालयति, अतस्त्यागेनेत्ययमेवार्थः। भुञ्जीथाः पालयेथाः। [3]आत्मानमिति शेषः। एवं त्यक्तैषणस्त्वं मा गृधः गृधिमाकांक्षां मा कार्षीर्धनविषयाम्। कस्यस्वित् कस्यचित्। धनं स्वस्य परस्य वा धनं मा कांक्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा, मा गृधः। कस्मात् ? कस्यस्विद्धनमित्याक्षेपार्थः। न कस्यचिद्धनमस्ति यद् गृध्येत। "आत्मैवेदं सर्वम्" [छान्दो० ७।२५।२] इतीश्वरभावनया सर्वं त्यक्तम्, अत आत्मन एवेदं सर्वम्, आत्मैवेदं[4] सर्वम्। अतो मिथ्याविषयां गृधिमभिलाषं[5] मा कार्षीरित्यर्थः ॥ १ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

(ख०) एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञानविषयतयाऽऽत्मा रक्षितव्य इत्येष वेदार्थः। अथैतस्यार्थस्य [6]ग्रहणस्य तु साधनत्वेनेदमुपदिशति—कुर्वन्नेवेहेति। इह

---

१ 'पाठस्तु' इति नास्ति सर्वत्र शाङ्करभाष्ये। २ ईशा वास्यमित्यादि–शां०।
३ 'आत्मानमिति शेषः' नास्ति–शां०। ४ आत्मैव च–शां०।
५ 'अभिलाषम्' नास्ति–शां०। ६ आत्मग्रहणरूपस्येत्यर्थः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मभूमौ । शतं समाः शतं वर्षाणि । जिजीविषेद् यदि भवान् जीवितुमिच्छेत् । तर्हि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव भवान् जिजीविषेत् । शतं समा इति जीवतः पुरुषस्य जीवितं परमायुरनूद्य कुर्वन्कर्माणीत्येतद्विधीयते । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे । नराभिमानिनि त्वयि । एवं जीवति सति कर्म न लिप्यते, कर्मणा न लिप्य[त ? स] इत्यर्थः । नान्यथेतोऽस्ति । इतोऽस्माद् यथोक्तप्रकारादन्यथा प्रकारान्तरं नास्ति । एको ज्ञानमार्गः, द्वितीयः कर्ममार्गः । एवं प्रकारद्वयादन्यत् प्रकारान्तरं नास्तीत्यर्थः । देवताभक्तिरप्युभयात्मिकैव, अतो न विरोधः । एवं चेदशुभं कर्म न लिप्यते । केचिदेवं योजयन्ति–इह लोके कर्माणि "यज्ञेन दानेन" [बृह० ४।४।२२] इत्यादिना मुक्तिसाधनत्वेन विहितानि कर्माणि कुर्वन्नेव शतं समाः संवत्सराणि जिजीवि[षेदि ? षे-रि]ति व्यत्ययः । एवमिहैवं त्वयि वर्तमाने सति । तव मुक्तिरस्त्विति शेषः । नान्यथेतोऽति । इतः प्रकारादन्यथा मुक्तिर्नास्तीति । एतदुक्तं भवति–यथा स्वर्गप्राप्तेर्नानाभूता विशेषास्तथा मुक्तेर्न मार्गभेदोऽस्ति, अपि त्वेक एव मार्गो ज्ञानलक्षणः । कर्म लिप्यते नास्ति, येन प्रकारान्तरेण विद्यमानेन कर्म लिप्यते तथा प्रकारान्तरं नास्तीत्यर्थः । अतः शास्त्रविहितान्यग्निहोत्रादीनि कर्माणि कुर्वन्नेव जिजीवि[षेदि ? षेरि]ति ॥ कथं पुनरिदमवगम्यते– आद्येन मन्त्रेण ससंन्यासज्ञाननिष्ठोक्ता, द्वितीयेन तदशक्तस्य कर्मनिष्ठेति ? ज्ञानकर्मणोर्विशेषोपरोधं पर्वतसर्षपवदेवोक्तं न स्मरसि किम् ? इ[त्याद्यु ? हाप्यु]क्तम्–यो जिजीविषेत् [1]स कर्म कुर्वन्नेवेति । "ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्" इति [च] । [2]"न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति पदं ततो न पुनरेयात्" इति संन्यासशासनात् । उभयोः फलभेदं च वक्ष्यति । [3]"इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ[4] भवतः, क्रियापथश्चैव पुरस्तात् संन्यासपथश्च; तयोर्न्यास एवात्यरेचयत्" इति तैत्तिरीयके । "द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च [5]विभावितः ॥"

---

१ 'स कर्म' इत्यस्य स्थाने 'स्वकर्म' इति–ख० ।

२ एतेन जीवितेन मरणेन वा–ख० अत्र–"तेन जीविते मरणे वा गृधिं मा कुर्विति अरण्यमियादिति पदमतो न पुनरियादिति न्यासशासनात्" इति मुद्रितः पाठोऽशुद्धः प्रतीयते ।

३ "नारायणोपनिषद्वाक्यमपि भिन्नाधिकारित्वे प्रमाणयति–इमौ द्वावेवेति" इत्यानन्दगिरिः । तैत्तिरीयारण्यकस्थनारायणोपनिषदि "न्यास एवात्यरेचयत्" इत्येतावानंश उपलभ्यते ।

४ अनुविक्रान्ततरौ–ख० । ५ सुभाषितः–ख-आ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादि पुत्राय विचार्य निश्चितमुक्तं श्रीवेदव्यासेन वेदाचार्येण। श्रीभगवता [च]—"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥" [गीता ३।३] इति। विभागं चानयोर्दर्शयिष्यामः ॥ २ ॥

(क०) एवमात्मविदः[1] पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयाऽऽत्मा रक्षितव्य इत्येष वेदार्थः। अथेतरस्यानात्मविदो[2]ऽनात्मज्ञतया [3]स्वस्वरूपाज्ञानतयाऽऽत्मग्रहणायाऽशक्तस्येदमुपदिशति [मन्त्रः]। पाठस्तु—कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥ इति। कुर्वन्नेव इह निर्वर्तयन्नेव। कर्माणि अग्निहोत्रादीनि। जिजीविषेत् जीवितुमिच्छेत्। शतं शतसंख्याकाः। समाः संवत्सरान्। [4]शतावधि हि पुरुषस्य परमायुरुचितम्[5]। [6]यथाप्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते। एवम् एवंप्रकारे त्वयि जिजीविषति नरे नरमात्राभिमानिनि। इतः एतस्मात् [अग्निहोत्रादीनि कर्माणि] कुर्वतो वर्तमानात् प्रकारादन्यथा प्रकारान्तरं नास्ति, येन प्रकारेणाऽशुभं कर्म न लिप्यते, कर्मणा न लिप्य[त ? स] इत्यर्थः। अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत् ॥ कथं [7]पुनरिहावगम्यते—पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता, द्वितीयेन तदशक्तस्य [8]कर्मनिष्ठोक्तेति ? उच्यते—ज्ञानकर्मणोर्विरोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम् ? इहाप्युक्तम्—यो हि जिजीविषेत् स कर्म[ाणि] कुर्वन् [एवेति]; "ईशा वास्यमिदं सर्वम्", "तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्" इति च। "न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति पदं ततो न पुनरेयात्" इति [च] संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति। "इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः, क्रियापथश्चैव पुरस्तात् संन्यासश्च"; तयोः संन्यास एवातिरेचयति—"न्यास एवात्यरेचयत्" [तैत्ति० आ० १०।६२।१] इति तैत्तिरीयके। "द्वाविमावेव[9] पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृत्तिलक्षणो धर्मो निवृ[त्तौ ? त्तिः] च विभाषितः ॥" इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता। विभागं चानयोर्दर्शयिष्यामो [10]वयम् ॥ २ ॥

---

१ आत्मविदा—क०। २ 'अनात्मविदः' नास्ति—शां०। ३ 'स्वस्वरूपाज्ञानतया' नास्ति—शां०।
४ तावद्धि—शां०। ५ निरूपितम्—शां०। ६ तथा च—शां०।
७ पुनरिदम्°—शां०। ८ कर्मनिष्ठेति—शां०।
९ अथ—शां०। १० 'वयम्' नास्ति—शां०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥

(ख०) अथेदानीमविद्वन्निन्दाऽऽरभ्यते विद्वत्प्रशंसार्थम्—असुर्या नाम त इति। परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुराः, असुषु रमन्त इति। तेषां [सं?स्व]भूता लोका असुर्याः। नामशब्दः प्रसिद्धवचनः। ते लोकाः, कर्मफलानि जन्मानि येषु लोक्यन्ते दृश्यन्त भुज्यन्त इति। अन्धेन अदर्शनात्मकेन। तमसा अज्ञानलक्षणेनान्धकारेण। आवृताः आच्छादिताः। तान् स्थावरान्तान् लोकान्। ते प्रेत्य मृत्वा, इमं देहं परित्यज्य। अभिगच्छन्ति यथाकर्म यथाश्रुतं ते तान् गच्छन्ति। ते क इति? तानाह—ये के चात्महनो जना इति। आत्मानं घ्नन्तीति आत्म-हननमात्ममेददर्शनं तत्कुर्वन्ति। ते के? अविद्वांसः स्वस्वरूपाविदः। तद्विपर्ययेण विद्वांसो मुच्यन्ते, न त्वात्महनः ॥ ३ ॥

(क०) अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते। पाठस्तु—असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः। ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥ इति। असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुराः। तेषां [च] स्वभूता [लोकाः] असुर्या नाम। नामशब्दोऽनर्थको निपातः। ते लोकाः, कर्मफलानि लोक्यन्त [1]इति दृश्यन्ते भुज्यन्त इति जन्मानि। अन्धेन अदर्शनात्मकेनाज्ञ[ानेन] तमसा। आवृताः आच्छादिताः। तान् स्थावरान्तान्। प्रेत्य त्यक्त्वा। इमं देहम् अभिगच्छन्ति यथाकर्म यथाश्रुतम्। ये के च आत्महनः आत्मानं घ्नन्तीत्यात्महनः। के? ते [जनाः] येऽविद्वांसः। कथं त आत्मानं नित्यं हिंसन्ति? अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात्। विद्यमानस्यात्मनो यत्कार्यं फलम् अजरामरत्वादि-संवेदनादिलक्षणं[2] तद् हतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना आत्महन उच्यन्ते। तेन हि [3]स्वात्महननदोषेण संसरन्ति [ते] ॥ ३ ॥

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

(ख०) तर्हि तत्कीदृशमात्मतत्त्वमिति? तदाह—अनेजदेकमिति। आत्मदेवत्या त्रिष्टुप्।

---

१ 'इति' नास्ति—शां०। २ 'आदि' नास्ति—शां०। ३ आत्महनन—शां०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिवेगवान् वायुः प्रसिद्धः, ततो हि वेगवत्तरं मनः, ततोऽप्यतिवेगवत्तरमात्मतत्त्वम्। कथं विरुद्धमिदमुच्यते—निश्चलं जवीय इति। नैष दोषः, निरुपाध्युपाधिमत्त्वोपपत्तेः। तत्र निरुपाधिस्वरूपेणोच्यते—अनेजदेकमिति। सोपाधिस्वरूपेणोच्यते—मनसो जवीय इति। मनसः [जवेन ? जविनः] अन्तःकरणस्य संकल्पादिलक्षणस्योपाधेरनुवर्तमानात्। तत्र प्रवृत्तिश्च व्य[र्थे ? र्था]। पुरतः पुरतश्चात्मतत्त्वं प्रकाशत इति [1]ज्योतिर्ब्राह्मणे प्रसिद्धम्। इहैव [दुः? देह]स्थस्य मनसो ब्रह्मलोकादिदूरसंकल्पनं नानागमनं क्षणमात्रादित्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन् मनसि ब्रह्मलोका[द्वि ? दि] दूरं गच्छति [सति] प्रथमं प्राप्त इवात्मचैतन्याभासो गृह्यतेऽतो मनसो जवीय इत्याह। किं च, नैनद्देवा आप्नुवन्निति। एनद् आत्मतत्त्वम्, देवाः द्योतनसाधनत्वात्, सर्वथापि तदात्मतत्त्वं चक्षुरादीन्द्रियाणि देवाः। नाप्नुवन् न प्राप्नुवन् न विष[यी ? य्य]कुर्वन्निति, प्रकाशविषयीकर्तुं वा श्रम एव, ततस्तेभ्यो मनो जवीयः। मनो[व्यवहारो ? व्यापार]व्यवहितत्वा-[न्ना ? दा]भासमात्रमप्यात्मनो नैव देवानां विषयो भवति, य[स्त्या ? स्मा]न्मनसोऽपि पूर्वमर्षत्पूर्वमेव गतम्, व्योमवद्व्यापित्वात्। सर्वथापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन [2]निरुपाधिकेन [स्वरूपेण] अविक्रियं सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाऽविवेकिनां मूढाना[मेक?]मनेकमिव [च] प्रतिदेहं [3]प्रत्यवभासत इत्येतदाह—तद्धावत इति। तद्यत्प्रसिद्धमात्मतत्त्वं तद्धावतो [4]द्रुतं गच्छतः। अन्यान् मनोवागिन्द्रियप्रभृतीनात्मविलक्षणान्। अत्येति अतीत्य गच्छतीव। इवार्थं स्वयमेव दर्शयति—तिष्ठदिति। तिष्ठत् स्वयं सदित्यर्थः। तस्मिन्नात्मतत्त्वे सति [नित्य]चैतन्यस्वभावे। मातरिश्वा, मातर्यन्तरिक्षे श्वसिति [निरु० ७।२६] इति मातरिश्वा सर्वप्राणभृत्क्रियात्मकः, [5]यदाश्रयाणि कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि [च], यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ, स मातरिश्वा। अपः, अप इति कर्मनाम [निघ० २।१]। अपः कर्माणि प्राणिनां चेष्टालक्षणानि, अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशवर्षादिलक्षणानि यज्ञदानहोमादीनि। दधाति स्थापयति विभजतीत्यर्थः, समष्टिव्यष्टिरूपो ह्यसौ वायुर्धारयतीति वा; "भीषाऽस्माद्वातः पवते" [तैत्ति० २।८] इत्यादिश्रुतिभ्यः। सर्वा हि कार्यकरणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वादिभूते सत्येव भवन्तीत्यर्थः ॥ ४ ॥

---

१ ज्योतिर्ब्राह्मणप्रसिद्धम्—ख०। २ नीरूपेण—ख-आ०। ३ प्रत्याचक्षते स्वतः—ख-आ०।
४ दूरम्—ख-आ०। ५ यदा सर्वाणि—ख-आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(क०) यस्यात्मनो हननादविद्वांसः संसरन्ति, तद्विपर्ययेण विद्वांसो [जनाः] मुच्यन्तेऽनात्महनः ; तत्कीदृशमात्मतत्त्वमित्युच्यते। पाठस्तु—अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्। तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥ इति। अनेजत् न एजत्। 'एजृ कम्पने' [२३४ भ्वादिः] कम्पनं चलनं स्वावस्थाप्रच्युतिः, तद्वर्जितम् ; सर्वदैकरूपमित्यर्थः। तच्चैकं सर्वभूतेषु। मनसः संकल्पा[दि]लक्षणाज्जवीयः जववत्तरम्। कथं विरुद्धमुच्यते-ध्रुवं निश्चलमिदम्, मनसो जवीय इति च। नैष दोषः, निरुपाध्युपाधिमत्त्वेनोपपत्तेः। तत्र [1]निरुपाधिना स्वेन रूपेणोच्यते-अनेजदेकमिति। मनसोऽन्तःकरणस्य [2]संकल्पादिलक्षणस्योपाधेरनुवर्तनात्। इह देहस्थस्य मनसो ब्रह्मलोकादिदूरस्थं संकल्पनं क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन्मनसि ब्रह्मलोकादीन् द्रुतं गच्छति सति प्रथमं प्राप्त इवात्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह। नैनद्देवाः द्योतनाद्देवाः चक्षुरादीनि इन्द्रियाणि। एनत् प्रकृतमात्मतत्त्वं नाप्नुवन् न प्राप्तवन्तः। तेभ्यो मनो जवीयः। मनोव्यापारव्यवहितत्वादाभासमात्रमप्यात्मनो नैव देवानां [3]विषयो भवति। यस्माज्जवनात् मनसोऽपि पूर्वमर्षत् पूर्वमेव गतम्, व्योम[व]द् व्यापित्वात्। सर्वव्यापि तदात्मतत्त्वं [सर्व]संसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाऽविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह—[4]तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति। तद्धावतः द्रुतं गच्छतः। अन्यान् मनोवागिन्द्रियप्रभृतीनात्मविलक्षणान्। अत्येति अतीत्य गच्छतीव। इवार्थं स्वयमेव दर्शयति-तिष्ठदिति। स्वयमविक्रियमेव सदित्यर्थः। तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे। मातरि[श्वा], मातर्यन्तरिक्षे [5]श्वसिति [निरु०७।२६] [गच्छतीति मातरिश्वा] वायुः सर्वप्राणभृत्क्रियात्मकः, यदाश्रयाणि कार्यकारणजा[ता]नि यस्मिन्नोतानि प्रोतानि च, यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ, स मातरिश्वा। अपः कर्माणि [प्राणि]नां चेष्टालक्षणानि, अग्न्यादित्य[पर्जन्य]ा[दी]नां [6]च ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि। दधाति विभजतीत्यर्थः, धारयतीति वा; "भीषाऽस्माद्वातः पवते [7]भीषोदेति सूर्यः [तैत्ति० २।८] इत्यादिश्रुतिभ्यः। सर्वा हि कार्यकरणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥ ४ ॥

---

१ निरुपाधिकेन-शां०। २ संकल्पविकल्पल°-शां०। ३ विषयी-शां०। ४ 'तद्धावतः''''दधाति' नास्ति-शां०। ५ श्वयति-शां०। ६ 'च' नास्ति-शां०। ७ 'भीषोदेति सूर्यः' नास्ति-शां०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

(ख०) न मन्त्राणां जामितास्तीति [1]पूर्वमन्त्रोक्तमप्यर्थं कञ्चिद्विशेषं दर्शयन्नाह—[तदेजतीति] । 'तदेजति', 'यस्तु सर्वाणि भूतानि', 'यस्मिन् सर्वाणि भूतानि' इत्यात्मदेवत्यास्तिस्रोऽनुष्टुभः । तदेजति । तद्यत्प्रकृतमात्मतत्त्वं तदेजति उपाधित एजति चलति । तन्नैजति । तदेव स्वात्मतत्त्वमतो नैजति नैव चलति । अचलमेव सचलतीव भवतीत्यर्थः । तद् दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वात् तद्दूर एव । तत् उ एव । अन्तिकेऽतिसमीपे विदुषामात्मत्वात्तदन्तिक एवात्यन्तसमीप एव । न केवलं दूरेऽन्तिके, तदन्तः अस्य सर्वस्य जगतोऽन्तरात्मैव; "एष त आत्मा सर्वान्तरः" [बृह० ३।४।१] इति श्रुतेः । अस्य सर्वस्य, जगतः नामरूपक्रियात्मकस्य सर्वस्य तदेव । बाह्यतः, व्यापित्वात् । आकाशवन्निरतिशयसूक्ष्मत्वादन्तः, "प्रज्ञानघन एव" [रामो० २।३] इति शासनान्निरन्तरम् [च] ॥ ५ ॥

(क०) न मन्त्राणां जामितास्तीति[2] पूर्वमन्त्रोक्तमप्यर्थं पुनराह । पाठस्तु—तदेजति तन्नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥ इति । तद् आत्मतत्त्वं यत्प्रकृतं तदेजति चलति । तदेव[च] नैजति स्वतो नैव चलति । [स्वतः] अचलमेव सच्चलतीवेत्यर्थः । किं च, तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वा[द्] दूर इव । तदु अन्तिके समीपेऽत्यन्तमेव विदुषाम्, आत्मत्वात् । न केवलं दूरे, अन्तिके च; तद् अन्तः अभ्यन्तरे [अस्य] सर्वस्य, "य आत्मा सर्वान्तरः" [बृह० ३।४।१] इति श्रुतेः । अस्य सर्वस्य, जगतः नामरूपक्रियात्मकस्य । तद् उ अपि । सर्वस्यास्य बाह्यतः, [3]व्यापित्वात् । आकाशवन्निरतिशयसूक्ष्मत्वादन्तः, "प्रज्ञानघन एव" [रामो० २।३] इति शासनान्निरन्तरम् [च] ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

(ख०) यस्तु शोधिततत्त्वपदार्थो मुमुक्षुः । सर्वाणि भूतानि अव्यक्ता[दी]नि स्थाव-

---

१ पूर्वतोक्तमप्यर्थः—ख०, पूर्वोक्तोऽर्थः—आ० । २ नास्तीति—क० । ३ व्यापकत्वात्—शा० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रान्तानि चेतनाचेतनानि। [१]आत्मन्येव अनुपश्यति, आत्मव्यतिरिक्तानि न प्रपश्यति; अपि त्वात्मन्यात्मत्वेन पश्यतीत्यर्थः। सर्वभूतेषु चात्मानम्, तेषु सर्वेषु भूतेषु चात्मानमनुपश्यति; तेषामपि भूतानामात्मानमात्म[तत्त्वं ? त्वे]न पश्यति, यथास्य कार्यकरणसंघात[रूपमात्मानं ? स्याहमात्मा] सर्वप्रत्ययसाक्षिभू[तं?तः] स[त्यं?त्यः] केव[लम्?लो] निर्गुणोऽनेनैव स्वरूपेणाव्यक्ता[दी]नां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं यस्तु पश्यति। ततः तस्माद्दर्शनात्। न विजुगुप्सते जुगुप्सां घृणां न करोति, 'गुपू रक्षणे' [३९५ भ्वादिः] देहादिकं गोप्तुं [न ग ? ने]च्छतीति वा। ज्ञानप्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणाऽऽत्मनोऽन्य[द् ? द]द्रष्टव्यं पश्यतो भवति; आत्मानमेव त्वनन्तेषु विशुद्धं निरन्तरं पश्यतो न [प्राणादि ? घृणा]निमित्तमस्तीति प्राप्तमेव–ततो न विजुगुप्सत इति ॥ ६ ॥

(क०) पाठस्तु—यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥ इति। यस्तु यः परिव्राट् मुमुक्षुः। सर्वाणि भूतानि अव्यक्तादीनि स्थावरान्तानि। आत्मन्येव अनुपश्यति, आत्मव्यतिरिक्तानि न पश्यतीत्यर्थः। सर्वभूतेषु [२]सर्वेषु भूतेषु च तेष्वेव च आत्मानम्, तेषामपि भूतानां [३]स्वात्मानम्, आत्मत्वेन यथास्य [देहस्य] कार्यकरणसंघातस्यात्मा अहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव [स्व]रूपेणाव्यक्तादीनां स्थावरान्तानामहमेवात्मेति सर्वभूतेषु चात्मानं [४]यस्तु निर्विशेषं पश्यति; स ततः तस्मादेव दर्शनात्। न विजुगुप्सते विजुगुप्सां घृणां न करोति। इति[५] प्राप्तस्यैवानुवादोऽयम्। सर्वा हि घृणाऽऽत्मनोऽन्यद् दुष्टं पश्यतो भवति; आत्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्त[मर्थान्तर]मस्तीति प्राप्तमेव–ततो न विजुगुप्सत इति ॥ ६ ॥

यस्मि॒न् सर्वा॑णि भू॒तान्या॒त्मैवाभू॑द्विजान॒तः ।
तत्र॒ को मोहः॒ कः शोक॑ एक॒त्वम॑नु॒पश्य॑तः ॥ ७ ॥

(ख०) इममेवार्थमन्योऽपि मन्त्र आह सर्वासां श्रुतीनामत्रैव तात्पर्यमिति प्रदर्शयितुम्–यस्मिन् सर्वाणि भूतानीति। यस्मिन् यथोक्त आत्मनि। सर्वाणि भूतानि तान्येव भूतानि परमार्थदर्शनादात्मैवाभूदात्मैव संवृत्तः, परमार्थतो विजानतः। एवमात्मतत्त्वं विजानत; [एतत् ? तत्र]

---

१ 'आत्मन्येव अनुपश्यति' इत्यत्र 'आत्मानं स्वामनु अन्वेति सदा पश्यति' इति पाठः—ख-आ०।
२ 'सर्वेषु भूतेषु' नास्ति—शां०।
३ स्वमात्मानम्—शां०।
४ निर्विशेषं यस्त्वनुपश्यति—शां०।
५ 'इति' नास्ति—शां०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन् काले, तस्मिन्नवस्थाविशेषे, तत्र चात्मनि। को मोहः, 'मुह वैचित्ये' [११९८ दिवादिः] को मोहः कः शोकः कः संसार एकत्वमनुपश्यतः। शोकमोहौ कामबीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः। को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययो[राक्षेपात्] संसारोऽसंसार इत्यज्ञानयोराक्षेपेण[ासंभव]संप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७ ॥

(क०) इममेवार्थमन्योऽपि मन्त्र आह। पाठस्तु—यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥ इति। यस्मिन् सर्वाणि भूतानि यस्मिन् काले यथोक्तात्मनि [वा], तान्येव भूतानि [सर्वाणि] परमार्थ[ात्म]दर्शनात् आत्मैवाभूत् आत्मैव संवृत्तः, परमार्थवस्तु विजानतः। तत्र तस्मिन्काले तत्र [1]चात्मनि। को मोहः कः [शोकः।] शोकश्च मोहश्च कामकर्मबीजमजानतो भवति, न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः। को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासंभवप्रदर्शनात् सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७ ॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

(ख०) योऽयमतीतेन मन्त्रेणोक्त आत्मा [स] किंलक्षण इत्यपेक्षायामयं मन्त्रः प्रवर्तते–स पर्यगादिति। आत्मदेवत्या जगती। स यथोक्त आत्मा पर्यगात्, परितः समन्तात् अगात्, परितो गच्छति सर्वमवगच्छति व्याप्नोति च; आकाशवद्व्यापी[त्यर्थः]। शुक्रं [2]'शुच दीप्तौ' शुचिमद् दीप्तिमदित्यर्थः। अकायम् अशरीरं लिङ्गशरीरवर्जितम्। अव्रणम् अक्षतम्। अस्नाविरं स्नावाः शिरा न विद्यन्ते यस्य तदस्नाविरम्। कविः क्रान्तदर्शी, [3]"नान्यदतोऽस्ति द्रष्टृ" [बृह० ३।८।११] इत्यादिश्रुतेः। मनीषी मनस ईशिता, सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां [परि] उपरि भवतीति परिभूः। स्वयमेव भवतीति स्वयंभूः। येषामुपरि भवति यश्चोपरि भवति स स्वयमेव सर्वो भवतीति स्वयंभूः। स नित्यमुक्त ईश्वरः। याथातथ्यतः, यथातथाभावो याथातथ्यं [तस्मात्]; यथाश्रुतकर्म-

---

१ आत्मनि वा–शां०। २ निघण्टौ ज्वलतिकर्मसु [निघ० १।१६] 'शोचति' इति पठितः। धातुपाठे तु 'शुच शोके' [१८३ भ्वादिः] इत्येव।
३ 'नान्योऽतोऽस्ति द्रष्टा' इति–ख-आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

फलसाधनतः। अर्थान् कर्तव्यपदार्थान्। व्यदधात् अकरोत् विहितवान्, यथानुरूपं व्यधादित्यर्थः। शाश्वतीभ्यः [1]नित्याभ्यः। समाभ्यः संवत्सरात्मभ्यः प्रजापतिभ्य इत्यर्थः॥ ८॥

योऽय[प्र?म]प्रतीतैर्मन्त्रैरुक्त आत्मा, स स्वेन रूपेण किंलक्षण इत्याह। पाठस्तु— स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥ ८॥ इति। स पर्यगात्, स यथोक्त आत्मा पर्यगात्। परि समन्तात्, अगात् गतवान्, आकाशवद्व्यापीत्यर्थः। शुक्रं शुद्धं ज्योतिष्मद्दीप्तिमानित्यर्थः। अकायम् अशरीरम्, अलिङ्गशरीर[2] इत्यर्थः। अव्रणम् अक्षतम्। अस्नाविरं स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम्। अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः। शुद्धं निर्मलम् अविद्यामलरहितमिति [3]कारणशरीरप्रतिषेधः। अपापविद्धं धर्माधर्मादिपापवर्जितम्। शुक्रमित्यादीनि वचांसि पुंलिङ्गत्वेन परिणेयानि, 'स पर्यगात्' इत्युपक्रम्य 'कविर्मनीषी' इत्यादिना पुंलिङ्गत्वेनोपसंहारात्। कविः क्रान्तदर्शी सर्वदृक्; "नान्यदतोऽस्ति द्रष्टृ" [बृह० ३।८।११] इत्यादिश्रुतेः। मनीषी मनस ईशिता, सर्वज्ञ ईश्वर इत्यर्थः। परिभूः सर्वेषां परि उपरि[4] भवतीति परिभूः। स्वयंभूः स्वयमेव भवतीति [5]स्वयंभूः। येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयंभूः। स नित्यमुक्त ईश्वरः। याथातथ्यतः सर्वज्ञत्वात्, यथातथाभावो याथातथ्यं [तस्मात्]; [6]यथाभूतकामकर्मफलसाधनतः। अर्थान् कर्तव्यपदार्थान्। व्यदधात् विहि[त]वान्, यथानुरूपं व्यभजदित्यर्थः। शाश्वतीभ्यः नित्याभ्यः। समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः॥ ८॥

अ॒न्धं तम॒ः प्रवि॑शन्ति॒ येऽवि॑द्यामु॒पास॑ते।
ततो॒ भूय॑ इव॒ ते तमो॒ य उ॑ वि॒द्याया॑ꣳ र॒ताः॥ ९॥

(ख०) अत्राद्येन मन्त्रेण सर्वैषणापरित्यागाज्ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः "ईशा वास्यम्" इत्यादिना "मा गृधः कस्यस्विद्धनम्" [ई०१] इति। अज्ञानिनां जिजीविषूणां ज्ञाननिष्ठाऽसंभवे सति "कुर्वन्नेवेह कर्माणि जिजीविषेत्" [ई० २] [जिजीविषे?] इति कर्मनिष्ठा द्वितीयो वेदार्थः। [7]अनयोश्च निष्ठयोर्विभागो मन्त्रद्वयप्रदर्शितयोर्बृहदारण्यकेऽपि दर्शितः—"सोऽकामयत जाया मे स्यात्" [बृह० १।४।१७] इति, तस्याज्ञानिनः कर्माणि। "मन एवास्यात्मा वाग्जाया"

---

१ 'नित्याभ्यः' नास्ति—आ०। २ लिङ्गशरीरवर्जितः—शां०। ३ कार्यकारणप्रतिषेधः—क०।
४ उपर्युपरि—क०। ५ 'स्वयंभूः' नास्ति—शां०। ६ 'काम' नास्ति—शां०।
७ 'अनयोश्च...दर्शितः' इत्यस्य स्थाने 'अनयोश्चिरन्तनयोर्मन्त्रः प्रदर्शितः' इति पाठः—ख-आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[बृह० १।४।१७] इत्यादिवचनादज्ञत्वं कामित्वं च [कर्मनिष्ठस्य] निश्चितमवगम्यते। तथा च [तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेन] आत्मस्वरूपावस्थानम्। जायाद्येषणासंन्यासेनात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव [दर्शनात् ? दर्शिता]–"किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः" [बृह० ४।४।२२] इत्यादिना। [यत् ? ये तु] ज्ञाननिष्ठाः संन्यासिनस्ते[भ्यः] "असुर्या नाम ते" [ई० ३] इत्यादिनाऽविद्वन्निन्दाद्वारेणात्मनो [याथात्म्यम्] "स पर्यगात्" [ई० ८] [1]इत्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यत्राधिकृता न कामिन इति। यथा च श्वेताश्वतराणां मन्त्रोपनिषदि–"अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्" [श्वेता० ६।२१] इत्यादि विभज्योक्तम्। ये तु कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवः, तेभ्य इदमुच्यते–'अन्धं तमः' इत्यादिना। कथं पुनरिदमवगम्यते ? [ज्ञानिनां] साध्यसाधनभेदोपम[र्शनम् ? र्दनात्]। "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥" [ई० ७] [इति] यदात्मैकत्वविज्ञानं [2]तन्न केनचिदपि कर्मणा ज्ञानान्तरेण वा [स ? ह्य]मूढः समुच्चिचीषति। [भवतु ? इह तु] समुच्चिचीषयाऽविद्वन्निन्दा। तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते। दैवं वित्तं देवताविज्ञानं कर्मसंबन्धित्वेनोपन्यस्तं न परमात्मविज्ञानम्; "विद्यया देवलोकः" [बृह० १।५।१६] इति पृथक्फलाश्रयणात्। त[तो?योः] ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषयाऽनिन्दापरा एकैकस्य पृथक्फलाश्रयणात्–"विद्यया तदारोहन्ति", "विद्यया देवलोकः" [बृह० १।५।१६] "न तत्र दक्षिणा यन्ति", "कर्मणा पितृलोकः" [बृह० १।५।१६] इति। न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात्। अन्धं तमः प्रविशन्ति। षडनुष्टुभ आत्मदेवत्याः। अन्धं तमः अदर्शनात्मकं तमः प्रविशन्ति। के ? येऽविद्याम् [विद्याया अन्या] अविद्या कर्मेत्यर्थः, अविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते; तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततो भूय इव ते तमः। ततः तस्मादन्धात्मकाद् भूय इव बहुतरमेव तमः प्रविशन्ति। ते क इति ? य उ विद्यायां रताः। ये तु कर्म हित्वा य उ एव विद्यायामेव रताः, ज्ञान एव रताः; ततो बहुतरमेव तमः प्रविशन्ति–"अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः। तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधा जनाः" [बृह० ४।४।११] इति श्रुतेः॥ ९॥

---

१ 'इत्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यत्रा' इत्यस्य स्थाने 'इति वदतो मन्त्रैरुपादिष्टो ? यत्र तत्रा' इति पाठः–ख-आ०। २ तत्र–आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(क०) अत्राद्येन मन्त्रेण [1]एषणात्रयपरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः "ईशा वास्यमिदं सर्वं....मा गृधः कस्यस्विद्धनम्" [ई०१] इति। अज्ञानां जिजीविषूणां ज्ञाननिष्ठाऽसंभवे "कुर्वन्नेवेह कर्माणि जिजीविषेत्" [ई० २] इति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः । अनयो[श्च] निष्ठयोर्विभागो मन्त्र[द्वय]प्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः–"सोऽकामयत जाया मे स्यात्" [बृह०१।४।१७]इत्यादिना अज्ञस्य कामिनः कर्माणीति। "मन एवास्यात्मा वाग्जाया" [बृह०१।४।१७] इत्यादिवचनादज्ञत्वं [कामित्वं] च [कर्मनिष्ठस्य] निश्चितमवगम्यते । तथा च तत्फलं सप्तान्न-सर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानम्। जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्मस्वरूपनिष्ठैव दर्शिता–"किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः" [बृह० ४।४।२२] इत्यादिना । ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्यः "असुर्या नाम" [ई० ३] इत्यादिनाऽविद्वन्निन्दाद्वारेणात्मनो[2] याथात्म्यं "स पर्यगात्" [ई०८] इत्येतदन्तैर्मन्त्रैरुपदिष्टम् । ते ह्यत्राधिकृता न कामिन इति । तथा [च] श्वेताश्वतराणां मन्त्रोपनिषदि–"अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्" [श्वेता० ६।२१] इत्यादि विभज्योक्तम् । ये तु [कामिनः] कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवः, तेभ्य इदमुच्यते । पाठस्तु—अन्धं तमः प्रविशन्ति येऽविद्यामुपासते । ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥ ९ ॥ इति । [3]अन्धं तमः प्रविशन्तीति । कथं पुन[रेवम्]वगम्यते; न तु सर्वेषामिति ? उच्यते–अकामिनः साध्यसाधनभेदोपमर्देन–"यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥" [ई० ७] [इति] यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानान्तरेण वा [ह्य]मूढः [समुच्चिचीषति । इह तु] समुच्चिचीषयाऽविद्वदादिनिन्दा [क्रियते]। तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते। यद्दैवं वित्तं [4]देवतादिज्ञानं कर्मसंबन्धित्वेनोपन्यस्तं न परमात्मज्ञानम्; "विद्यया देवलोकः" [बृह० १।५।१६] इति पृथक्फलश्रवणात् । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव, एकैकस्य पृथक् फलश्रवणात्–"विद्यया तदारोहन्ति", "विद्यया देवलोकः" [बृह० १।५।१६] "न तत्र दक्षिणा यन्ति", "कर्मणा पितृलोकः" [बृह० १।५।१६] इति । न हि शास्त्रविहितं किञ्चिदकर्तव्यतामियात् । तत्र अन्धं [तमः] अदर्शनात्मकं तमः प्रविशन्ति । के ? येऽविद्याम्, विद्याया अन्या अविद्या तां कर्मेत्यर्थः,

---

१ सर्वैषणाप°–शां० ।
२ आत्मना–शां० ।
३ अन्धं तम इत्यादि–शां० ।
४ देवताविषयं ज्ञानम्–शां० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[कर्मणो विद्याविरोधित्वात्]। तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते; तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः। ततः तस्मादन्धात्मकात्तमसः। भूय इव बहुतरमिव[1] ते तमः प्रविशन्ति। [के]? कर्म हित्वा ये [उ ये तु] विद्यायामेव देवताज्ञाने [एव]। रताः अभिरताः ॥ ९ ॥

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥

(ख०) अत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चये कारणमाह। अन्यथा फलवदफलवतोः संनिहितयोरङ्गाङ्गितैव स्यादिति-अन्यदेवाहुरिति। अन्यत् पृथगेव विद्यया क्रियते फलमित्याहुः। अन्यदेवाहुरविद्यया कर्मणा अन्यदेव फलं क्रियत इत्याहुर्वेदाः; "कर्मणा पितृलोकः, विद्यया देवलोकः" [बृह० १।५।१६] इत्यादयः। इति एवम्। शुश्रुम श्रुतवन्तो वयम्। धीराणां धीमतां वचनं शुश्रुम। ये आचार्या नः अस्मभ्यम्। तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तः, तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥ १० ॥

तत्रावान्तर[फल]भेदं विद्याकर्मणोः समुच्चयकारणमाह। अन्यथा फलवदफल[व]तोः संनिहितयोरङ्गाङ्गितैव स्यादिति। पाठस्तु-अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥ इति। अन्यत् पृथगेव विद्यया क्रियते फलमिति आहुः वदन्ति वेदाः[2]। अन्यदाहुरविद्यया कर्मणा क्रियते [फलम्] इति। तथा चोक्तम्-"कर्मणा पितृलोकः, विद्यया देवलोकः" [बृह० १।५।१६] इति। [इति] एवम्। शुश्रुम श्रुतवन्तो वयम्। धीराणां धीमतां वचनम्। ये आचार्या नः अस्मभ्यम्। तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तः, तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥ १० ॥

विद्यां चाविद्यां च यस्तद्वेदोभयँ सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

(ख०) यत एवम् [अतः] विद्यां च अविद्यां चेति देवताज्ञानं कर्म चेत्यर्थः। यस्तद्वेद तदुभयं ज्ञानं कर्म च सह एकेन रूपेणानुष्ठेयं यो वेद, तस्यैवं समुच्चयकारिण एकपुरुषार्थसंबन्धक्रमेण किं स्यादित्युच्यते-अविद्यया मृत्युं तीर्त्वेति। अविद्यया कर्मणा अग्निहोत्रादिना। मृत्युम्, स्वाभाविकं

---

१ एव-शां०। २ 'वेदाः' नास्ति-शां०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रागतः क्रियमाणं कर्म ज्ञानं च मृत्युशब्दवाच्यम्। तदुभयं तीर्त्वा अतिक्रम्य। विद्यया वेदान्तज्ञानेन। अमृतं देवतात्मभावम्। अश्नुते व्याप्नोति। [1]तद्धयमृतमुच्यते, यद्देवतात्मगमनम्॥११॥

(क०) पाठस्तु—विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥११॥ इति। यत एवम् [अतः] विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः। यस्तत् एतदुभयं सह एके[न] पुरुषेण अनुष्ठेयं वेद, तस्यैवं समुच्चयकारिण [एक]एकपुरुषार्थसंबन्धः क्रमेण स्यादित्युच्यते-अविद्यया कर्मणा अग्निहोत्रादिना। मृत्युम्, स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यम्, उभयं तीर्त्वा अतिक्रम्य। विद्यया देवताज्ञानेन। अमृतं देवतात्म-[भावम् ?] भावम्। अश्नुते प्राप्नोति। तद्धयमृतमुच्यते, यद्देवतात्मगमनम् ॥ ११ ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते।
ततो भूय इव ते तमो य उ संभूत्याꣳ रताः ॥ १२ ॥

(ख०) अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते-अन्धं तम इति। अन्धं तमः प्रविशन्ति। के ? येऽसंभूतिम्, संभवनं संभूतिः, सा यस्य कार्यस्य [सा] संभूतिः, तस्या अन्या असंभूतिः प्रकृतिः, प्रक्रियते कार्यं यया [2]सा प्रकृतिः, कारणमव्याकृताख्यम्[3]; तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते [ये]; ते तदनुरूपमेव फलम्, तमः अदर्शनात्मकं प्रविशन्ति। ततः तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति। के ? य उ एव। संभूत्यां रताः, संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्य एव रताः। ते ततो भूय इव तमः प्रविशन्ति ॥ १२ ॥

(क०) अधुना व्याकृताऽव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते। पाठस्तु—अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते। ततो भूय इव ते तमो य उ संभूत्याꣳ रताः ॥ १२ ॥ इति। येऽसंभूतिम्, [सवनं ? संभवनं] संभूतिः, सा यस्य कार्यस्य सा संभूतिः, तस्या अन्या असंभूतिः प्रकृतिः कारणमव्याकृताख्यम्, तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां [काम]कर्मबीजभूतामदर्शनात्मिकाम् उपासते ये; ते तदनुरूपमेव अन्धं तमः अदर्शनात्मकं प्रविशन्ति। ततः तस्मादपि भूयो बहुतरमिव तमः [ते] प्रविशन्ति ये उ संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः ॥ १२ ॥

---

१ तद्धदत्रामृतमश्नुते-ख-आ०। २ 'सा' नास्ति-आ०। ३ अव्याकृताख्याम्-आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

(ख०) अथाधुना उपासनयोः समुच्चयकरणायावयवफलभेदमाह—अन्यदेवाहुरिति । अन्यदेव पृथगेव । आहुः फलं संभवात्, संभूतेः कार्यब्रह्मोपासनाद् अणिमाद्यैश्वर्यलक्षणं फलमाहुर्वेदाः । तथाऽन्यदाहुरसंभात् असंभूतेरव्याकृतादव्याकृतोपासनादन्यदेव फलमाहुः—"अन्धं तमः प्रविशन्ति" [ई० १२] [1]इति, [2]प्रकृति[लय] इति [च] पौराणिकैरुच्यते । इति एवम् । शुश्रुम श्रुतवन्तो वयम् । धीरा[णां] ये नस्तद्विचचक्षिरे ये आचार्या धीराणां वचनं विचचक्षिरे व्याकृताव्याकृतोपासनाफलवचनं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

(क०) अधुना उभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह । पाठस्तु—अन्यदेवाहुः संभवादन्यदाहुरसंभवात् । इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥ इति । अन्यदेव पृथगेव आहुः फलम् । संभवात् संभूतेः कार्यब्रह्मोपासनाद् अणिमाद्यैश्वर्यलक्षणं [3]व्याख्यातवन्त इत्यर्थः । तथा च अन्यदाहुरसंभवात् । असंभूतेः अव्याकृतात् अव्याकृतोपासनात् । यदुक्तम्—"अन्धं तमः प्रविशन्ति" [ई० १२] इति, प्रकृतिलय इति च पौराणिकैरुच्यते । इति एवम् । शुश्रुम धीराणां [वचनम्] । ये नस्तद्विचचक्षिरे [व्याकृता]-व्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ १४ ॥

(ख०) यत एवमतः समुच्चयः [4]संभूत्यसंभू [त्युपासन]योर्युक्त एव, एकपुरुषार्थत्वादित्याह—संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन [5]मृत्युम् । [वि]नाशो धर्मो यस्य स तेन विनाशधर्मणा हिरण्यगर्भोपासनेन ऐश्वर्यप्राप्तिद्वारा अनैश्वर्य[म् अ]धर्मकामादिदोषजातं च मृत्युं तीर्त्वा । संभूत्या, अत्राकारलोपश्छान्दसः । असंभूत्या असंभूत्यु-

---

१. 'इति' इत्यस्याग्रे—"शुश्रुम" इति—ख० । २. 'प्रकृति''''एवम्' नास्ति—आ० ।
३. आख्यातवन्तः—शां० । ४. संभूत्योः—आ० । ५. मृत्युर्नाशो—आ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पासनया अव्याकृतोपासनेन अमृतं प्रकृतिलयलक्षणं कारणत्वप्राप्तिलक्षणममृतमश्नुत इति । ततश्च पुनः संसारो भवतीत्येवमपरं विद्याकर्मसमुच्चये फलमभिहितम् । "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" [ई० ७] इति स्वतन्त्रस्य सर्वकर्मसंन्यासपूर्वस्य सम्यग्ज्ञानस्य फलमभिहितम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽनेन[1] प्रकाशितः । [तत्र] प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य प्रकाशने—"विद्यामुपासते" [१] इत्यत ऊर्ध्वं बृहदारण्यकम् । तत्रापि प्राणादिविषयोपासनपरं[2] किञ्चित्, अन्यन्निर्गुणब्रह्मपरमिति विभज्य दर्शनीयम् । कार्यसगुणब्रह्मोपासनावाक्यजातं च—"अन्धं तमः प्रविशन्ति येऽविद्यामुपासते" [ई० ६] इत्यादिषण्मन्त्रकाशितार्थस्य प्रकाशन उपयुक्तम्, इतरत् सर्वं निर्गुणतत्त्वैकनिष्ठमिति । "विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥" [ई० ११] इति यदुक्तं तत्र केन मार्गेणामृतत्वमश्नुत इत्यर्चिरादिमार्गेणेत्युच्यते ॥१४॥

(क०) यत एवमतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्तः, एकैकपुरुषार्थत्वाच्चेत्याह । पाठस्तु—संभूतिं च विनाशं च यस्तद्वेदोभयं सह । विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ १४ ॥ इति । [संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन] । विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणा [अ]भेदेनोच्यते 'विनाश' इति, तेन तदुपासनेनानैश्वर्य-[म]धर्मकामादिदोषजातं च मृत्युं तीर्त्वा, हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम्, तेनानैश्वर्यादिमृत्युमतीत्य । असंभूत्या अव्याकृतोपासनेन[3] । अमृतं प्रकृतिलयलक्षणमश्नुते । 'संभूति च विनाशं च' इत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः, प्रकृतिलयश्रुत्यनुरोधात् ॥ १४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

(ख) एवं यथोक्तोपासनं कुर्वन्नुपासकः स्वदेहस्यान्तकाले प्राप्त आत्मनोऽमृतत्वप्राप्तिद्वारभूतमादित्यं याचते—हिरण्मयेन पात्रेणेति । आदित्यदेवत्याऽनुष्टुप् । हे पूषन् हे सूर्य अस्मत्पोषक । हिरण्मयेन ज्योतिर्मयेन । पात्रेण आधारभूतेन । सत्यस्य आदित्यमण्डलस्थस्य ब्रह्मणः । अपिहितं मुखं द्वारमपिहितम् । हिरण्मयेन पात्रेण द्वारस्यापिधानं कृतम् ।

---

१. अनेन सन्दर्भेणेत्यर्थः । २. उपासनं न परम्—ख-आ० । ३. उपासनया—शां० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतस्तत्त्वं पूषन्नपावृणु । पूषन् , तत् पिधानम् । त्वम् अपावृणु अपगमय । सत्यधर्माय सत्यस्य तत्र उपासनादहमपि सत्यधर्मो जातः । सत्यं धर्मो यस्य स [1]सत्यधर्मा, तस्मै सत्यधर्माय मह्यं तदपावृणु । यद्वा व्यत्ययः । सत्यधर्माय सत्यधर्मस्य तद् दृष्टये ॥ १५ ॥

(क०) मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगतिः । अतः परं पूर्वोक्तम्—"आत्मैवाभूद्विजानतः"[ई० ७]इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र [2]प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षण[स्य] कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकम् । तत्र निषेकादिश्मशानान्तं कर्म कुर्वन् जिजीविषेद्यो विद्यया सह अपरब्रह्मविषयया, तदुक्तम्—"विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥" [ई० ११] [3]इति, तत्र [सोऽधिकारी] केन मार्गेणामृतत्वमश्नुते ? इत्युच्यते—"तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषः" [बृह० ५।५।२] एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते । पाठस्तु—हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥ इति । [हिरण्यमयेन पात्रेण] । हिरण्मयम्, ज्योतिर्मयमित्येतम्, तेन पात्रेणेव अपिधानभूतेन । सत्यस्य आदित्यमण्डलस्थस्य ब्रह्मणः । अपिहितम् आच्छादितम् । मुखं द्वारम् । तत् त्वं हे पूषन्, अपावृणु [अपसारय] । सत्यधर्माय तव सत्यस्योपासनात् सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यम्; अथवा यथाभूतस्य धर्मस्यानुष्ठात्रे । दृष्टये तव सत्यात्मन उपलब्धये ॥ १५ ॥

पूषन्नेक ऋषे यम सूर्य प्राजापत्य व्यूह रश्मीन्त्समूह
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।
योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥

(ख०) पूषन्नेकर्षे इति । सूर्यदेवत्या त्रिष्टुप् । पोषणात् पूषा रविः, तत्संबोधनं [4]हे पूषन् । हे एकर्षे [5]एक एव ऋषतीत्येकर्षिः, तत्संबोधनं हे एकर्षे । [त्वया ? तथा] सर्वस्य

---

१. सत्यधर्मः—ख० ।　२. प्रकीर्तितः प्रकाशितः—क० ।　३. इत्युक्तम्—क० ।
४. 'हे पूषन्' नास्ति—आ० ।　५. 'एक एव ... हे एकर्षे' नास्ति—आ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संयमनाद्यमः, हे यम । सूर्ये सु ईरणात् सूर्यः, तत्संबोधनम् । प्रजापतेरपत्यं प्राजापत्यः, तत्संबोधनं हे प्राजापत्य । एवं संस्तूय प्रार्थयते—व्यूह रश्मीनिति । रश्मीन् व्यूह विगमय । समूह तेजः । तेजः तापकं [1]यज्ज्योतिस्तत् समूह एकीकुरु । यत्ते रूपं कल्याणतमं तत्ते पश्यामि । ते तव यत्कल्याणतमं मङ्गलतमं रूपम् । तत् ते तव प्रसादात् तद्रूपमहं पश्यामि । किं च, योऽसावसौ पुरुषः सोऽहमस्मि । योऽसौ मण्डलस्थो [2]व्याहृत्यवयवो यः पुरुषः [3]पुरुषाकारत्वात् पूर्णत्वाद्वा पुरुषः । सोऽहमस्मीत्यादित्यात्मानमेकीकृत्य[4] पश्यामीति ॥ १६ ॥

(क०) पाठस्तु—पूषन्नेक ऋषे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि । योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥ इति । हे पूषन् , जगतः पोषणात् पूषा रविः । तथा एक एव [ऋषति गच्छतीत्येक]ऋषिः, हे एकर्षे । तथा सर्वस्य संयमनाद्यमः, हे यम । तथा रश्मीनां प्राणानां रसानां च स्वीकरणात् सूर्यः, हे सूर्य । प्रजापतेरपत्यं [प्राजापत्यः, हे] प्राजापत्य । व्यूह विगमय । रश्मीन् स्वान् । समूह एकीकुरु उपसंहर । तेजः तापकं ज्योतिः । यत् ते तव रूपं कल्याणतमम् अत्यन्तशोभनम् । तत् ते तवात्मनः प्रसादात् पश्यामि । किं च, अहं न [5]च त्वां भृत्यवद् याचे । योऽसौ [आदित्य]-मण्डलस्थो व्याहृत्यवयवः पुरुषः पुरुषाकारत्वात्, पूर्णं [6]वाऽनेन प्राणबुद्ध्यात्मना जगत् समस्तमिति पुरुषः, [पुरीष ? पुरि श]यनाद्वा [पुरुषः] । सोऽहमस्मि भवामि ॥ १६ ॥

वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।
ओ३म् क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥

(ख०) एवं ब्रह्मोपासकस्य योगिनः शरीरपातोत्तरकालं शरीरं यद्भवति तदाह—वायुरनिलमिति । लिङ्गोक्तदेवत्यं यजुः । वायुः प्राणः । अनिलं [7]सूर्यात्मानम् । अमृतम् अधिदैवतं स्वप्रकृतिं हिरण्यगर्भाख्यं प्राणं प्रतिपद्यते । अथ अनन्तरम् । इदं प्रतीयमानं शरीरम् । अग्नौ हुतं भस्मान्तं भवति, कृतप्रयोजनत्वात् । इदानीं योगिनो बलभूतं प्रभूतं सर्ववेदसारं सर्ववेदमयमक्षरं कथ्यते—ओमिति । अवतेराप्नोतेर्वा ओमिति परमाक्षरस्य योगिनो

---

१. यज्ज्योतिस्तज्ज्योतिः—ख-आ० ।
२. व्याकृतावयवः—ख-आ० ।
३. पुरुषा आहुः—ख-आ० ।
४. आदित्यम्—आ० ।
५. तु—शां० ।
६. अनेन वा—क० ।
७. सूर्यात्मम्—आ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलभूतस्य परस्य ब्रह्मणः प्रणवाख्यस्य स्थूलादिगुणयुक्तस्य ब्रह्मा ऋषिः, छन्दो गायत्रम्, परमात्मा देवता शब्दब्रह्मारम्भे विनियोगः। अपि च यागहोमादिषु शान्तिपौष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिष्वपि सर्वेष्वस्योङ्कारस्य विनियोगः। ओमिति परब्रह्मणो नामनिर्देशः—' ॐ तद्ब्रह्म'' इत्यादिश्रुतेः। ब्रह्मविष्णुशिवपरब्रह्मात्मकोऽकारोकारमकारार्धमात्रात्मकोऽयमोङ्कार एवान्त्यकाल उत्तारक इति दर्शयति। आत्मरूपश्च ॐकारस्ततस्तेन ततम्। इदानीं कृतं स्मारयति—कृतं स्मरेति। लिङ्गोक्तदेवत्यं यजुः। क्रतोः, क्रतुः सङ्कल्पोऽनेन सङ्कल्पविषयो योगिभिर्लक्ष्यते। हे क्रतो हे श्रीभगवन्नग्ने, स्मर कृतं ब्रह्मचर्ये मया कृतं तत् स्मर न विस्मर्तव्यम्। हे क्रतो, गार्हस्थ्ये मया यत्कृतं तच्च स्मर। पुनश्च यत्साधु कृतं तत्सर्वं कृतं स्मर कृतं स्मरेति। आदरार्थं पुनर्वचनम्। अथवा क्रतुशब्देन यज्ञः संबोध्यते। हे क्रतो हे यज्ञ। यज्ञशब्दोपलक्षितो यज्ञाध्यक्षो यज्ञहविर्भागभुक् श्रीभगवान् विष्णुः संबोध्यते। श्रीभगवन् विष्णो, कृतं स्मर मया कृतं त्वया कारितं स्मर। कृतं स्मर [1]कृतं स्मरेति ॥१७॥

(क०) पाठस्तु—वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्। ॐ३ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥ इति। अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति [2]वाक्ययोगः। लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम्, मार्गयाचनसामर्थ्यात्। अथेदं शरीरमग्नौ हुतं भस्मान्तं [भस्मावशेषं] भूयात्। ॐ३मिति यथोपासनमों प्रतीकात्मकत्वात् सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते। हे क्रतो संकल्पात्मक। स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितः, अतः स्मर एतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बा[ल्य]प्रभृत्यनुष्ठितं कर्म तच्च स्मर। क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् ॥ १७ ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ १८ ॥

(ख०) मार्गं याचते—अग्ने नयेति। आग्नेयी त्रिष्टुप्। हे श्रीभगवन्नग्ने हे सर्वज्ञ। नय सुपथा दक्षिणमार्गनिवृत्त्यर्थं [3]सु शोभनेन मार्गेण देवयानेनास्मान् नय प्रापय। राये

---

1. 'कृतं स्मर' इति वारचतुष्टयं पठ्यते—ख०। 2. वाक्यशेषः—शां०।
3. सुशब्दः—ख-आ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

-धनाय, कर्मज्ञानफलोपभोगाय वा। अस्मान् यथोक्तज्ञानकर्मकारिणो नयेति संबन्धः। हे देव विश्वानि [1]सर्वाणि। वयुनानि कर्माणि प्रज्ञानानि तदनुष्ठितानि च। विद्वान् ज्ञानवान् त्वं सुपथा नयेति संबन्धः। किं च, युयोध्यस्मज्जुहुराणमेनः। अस्मत् अस्मत्तः सकाशात्। जुहुराणं कुटिलं [2]कुटिलवचनात्मकम्। एनः तत्कृतं चैनः पापम्। युयोधि योधय पृथक्कुरु। [3]ततो विशुद्धाः सन्त इष्टं फलं प्राप्नुयामेत्यभिप्रायः। किन्तु वयमिदानीं किमपि कर्तुं न शक्नुमः, अपि तु भूयिष्ठां बहुतराम्। नमउक्तिं नमस्कारवचनम्। ते तुभ्यम्। विधेम कुर्मः। केवलनमस्कारवचनेन परिचरेमेत्यर्थः ॥ १८ ॥

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम्।
याज्ञवल्क्यं मुनिश्रेष्ठं कृष्णं हरिहरं प्रभुम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीवासुदेवपुरीपूज्यपादपरमकारुण्यासादित-
श्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्यायस्य सूनुना चतुर्वेदि-
श्रीमदानन्दभट्टोपाध्यायेन विरचिते काण्ववेदमन्त्रभाष्य-
संग्रहे- चत्वारिंशोऽध्यायः ॥ ४० ॥[4]

(क०) पुनरन्येन मन्त्रेण मार्गं याचते। पाठस्तु-अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ १८ ॥ इति[5]। ॐ ३ खं ब्रह्म ॥ हे अग्ने, नय गमय। सुपथा [6]शोभनमार्गेण। सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्। [7]निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेन; अतो याचे त्वां पुनःपुनर्गमनागमनवर्जितेन शोभनेन पथा नय। राये धनाय, कर्मफलभोगाये-त्यर्थः। अस्मान् यथोक्तधर्मफलविशिष्टान्। विश्वानि सर्वाणि। हे देव, वयुनानि कर्माणि प्रज्ञानानि [8]च। विद्वान् जानन्। किं च, युयोधि वियोजय विनाशय। अस्मत् अस्मत्तः। जुहुराणं कुटिलं [9]वञ्चनात्मकम्। एनः पापम्। ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्य-भिप्रायः। किन्तु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुम्। भूयिष्ठां बहुतराम्। नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः।

---

१. सर्वाणि कर्माणि—ख-आ०। २. कुटिलवञ्चनात्मकम्—आ०। ३. तत्ते—आ०।
४. ख० समाप्तौ—"यादृशं पुस्तकं....", "भग्नपृष्ठकटि...." इति द्वौ श्लोकौ विद्येते।
५. "ॐ ३ खं ब्रह्म" नास्ति—शां०। ६. शोभनेन मार्गेण—शां०।
७. निर्विण्णो—क०। ८. वा—शां०। ९. वचनात्मकम्—क०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ [1]पूर्वपक्षः— "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" [ई० ११], "विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते" [ई० १४] इति श्रुत्वा केचित् संशयं कुर्वन्ति। अतस्तन्निर्द्धारणार्थं संक्षेपतो विचारणां करिष्यामः। तत्र तावत् किं निमित्तः संशय इति? उच्यते—विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यते, अमृतत्वं च? ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात् समुच्चयानुपपत्तिः। सत्यम्; विरोधस्तु नावगम्यते, विरोधाविरोधयोः शास्त्रप्रमाणकत्वात्; यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा [तद्विरोधा]विरोधावपि।[2] यथा च—"न हिंस्यात् सर्वा भूतानि" इति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते—"अध्वरे पशुं हिंस्यात्" इति, एवं विद्याऽविद्ययोरपि स्यात्। विद्याकर्मणोश्च [समुच्चयः] न, "दूरमेते विपरीते विषूची अविद्या या च विद्येति [ज्ञाता]" [कठो० १।२।४] इति श्रुतेः। "विद्यां चाविद्यां च" [ई० ११] इति वचनादविरोध इति चेत्, न; [हेतुस्वरूपफलविरोधात्। विद्याविद्या]विरोधाविरोधयोर्विकल्पासंभव[ात् समुच्चयविधाना]दविरोध एवेति चेत्, न; सहसंभवानुपपत्तेः। क्रमेण [एकाश्रये] स्यातां विद्याविद्ये इति चेत्, न; विद्योत्पत्तौ तदाश्रयेऽविद्यानुपपत्तेः। न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिः। नापि संशयोऽज्ञानं वा, "यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः।" [ई० ७] इति शोकमोहाद्यसंभवश्रुतेः। अविद्याया असंभवात्तदुपादानस्य कर्मणोऽप्यनुपपत्तिमवोचाम। "अमृतमश्नुते" [ई० ११] इत्यापेक्षिकममृतम्। विद्याशब्देन परमात्मविद्याग्रहणे—"हिरण्मयेन" [ई० १५] इत्यादिना द्वारमार्गयाचनमनुपपन्नं स्यात्। तस्माद्यथाऽस्माभिर्व्याख्यात[3] एव मन्त्राणामर्थ इत्युपरम्यते ॥ १८ ॥

[4]इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवासुदेवपुरीश्रीकृष्णभक्तिसाम्राज्यश्रीमज्जातवेदोपाध्यायस्य सूनुना चतुर्वेदिश्रीमदानन्दबोधभट्टोपाध्यायेन विरचिते शुक्लयजुः-काण्ववेदमन्त्रभाष्यसंग्रहे चत्वारिंशोऽध्यायः समाप्तिमगमत् ॥४०॥[5]

---

१. "अथ पूर्वपक्षः" नास्ति—शां। २. तथा—क०। ३. 'अस्माभिः' नास्ति—शां०।

४. पुष्पिका शाङ्करभाष्यप्रतिकूला।

५. क० समाप्तौ—"तत्सत्कृष्णार्पणमस्तु। संवत्" इति दृश्यते।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यङ्गिरासूक्तम्

(सटिप्पणम्)

पिप्पलादशाखीयम्

*यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणापनिर्णुद्मः प्रत्यक्कर्तारमृच्छतु ॥ १ ॥
शीर्षण्वतीं कर्णवतीं [1]विपुरूपां [2]भयङ्कराम् ।
यः प्राहिणोदिहाद्य [3]त्वां वित्तं [4]त्वं योजयासुभिः ॥२॥
येन दिष्टेह [5]वहसि प्रतिकूलमघायिनि ।
तमेवेतो निवर्तस्व मास्मानृच्छो अनागसः ॥ ३ ॥
अभिवर्तस्व कर्तारं निरस्तास्माभिरोजसा ।
आयुरस्य निकृन्तस्व प्रजां च पुरुषादिनि ॥ ४ ॥
यस्त्वा[6] कृत्ये चकारेह [7]तं त्वं गच्छ [8]पुनर्नवे ।
अरातीः कृत्ये नाशय सर्वाश्च यातुधान्यः ॥ ५ ॥

---

*आदर्शग्रन्थानामारम्भः—'श्रीगणेशाय नमः ॥ ॐ' इति—ख-छ०, 'श्रीगणेशाय नमः । हरिः ॐ' इति—ग०, 'श्रीगणेशाय नमः । ॐ ह्रीं' इति—घ०, 'ॐ ह्रीं' इति—ङ-ञ०, 'श्रीनृसिंहाय नमः । त्रिपाद्भस्म ····· सर्वामयपतिर्ज्वरः ॥ १ ॥ प्रत्यङ्गिराकल्पो लिख्यते । ॐ' इति—च०, 'श्रीगणेशाय नमः । अथर्ववेदोक्तप्रत्यङ्गिरा लिख्यते' इति—ज०, 'श्रीगणेशाय नमः । नमो देव्यै' इति—झ० ।

१ विष्णुरूपाम्—ख-ज-झ०, विश्वरूपाम्-व० । २ भयङ्करीम्—क-ग-घ-ङ-च-छ-ज-ञ-स-व० । ३ त्वा—घ-ञ-व० । ४ तम्—ख-ग० । ५ वदसि—घ-च-छ-ञ-व० । ६ त्वाम्—ख-ङ-छ० । ७ 'तं त्वम्' इत्यस्य स्थाने 'त्वं तम्' इति—ज० । ८ पुनर्णवे—क-छ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षिप्रं कृत्ये निवर्तस्व कर्तुरेव गृहान् प्रति ।
पशूंश्चैवास्य नाशय वीरांश्चास्य निबर्हय ॥ ६ ॥
यस्त्वा[1] कृत्ये प्रजिघाय विद्वाँ अविदुषो गृहान् ।
तस्यैवेतः परेत्याशु [2]तनूं कृन्धि परुष्परुः ॥ ७ ॥
प्रतीचीं त्वापसेधतु ब्रह्म रोचिष्णवमित्रहा ।
अग्निश्च कृत्ये रक्षोहा रिप्रहा चाज एकपात् ॥ ८ ॥
यथा त्वाङ्गिरसः पूर्वे भृगवश्चापसेधिरे ।
अत्रयश्च वसिष्ठाश्च तथैव त्वापसेधिम ॥ ९ ॥
यस्ते परूंषि संदधौ रथस्येव विभुर्धिया ।
तं गच्छ तत्र तेऽयनमज्ञातस्तेऽयं जनो [3]यतः ॥ १० ॥
यो नः कृत्ये रणस्थो वा कश्चिद्विद्वान्योऽभिहिंसति ।
तस्य त्वं द्रोरिवेद्धोऽग्निस्तनूमृच्छ स्वहेलिता ॥ ११ ॥
भवाशर्वौ देवहेलिमस्य[4] क्षिपन्तं [5]पापकृत्वने ।
हरस्वती त्वं च कृत्ये मोच्छिषस्तस्य किञ्चन ॥ १२ ॥
यो नः कश्चिद्गुहारातिर्मनसा [6]प्रतिभूषति ।
दूरस्थो वान्तिकस्थो वा तस्य हृद्यमसृक् पिब ॥ १३ ॥
येनासि कृत्ये प्रहिता दूढ्येनास्मज्जिघांसया ।
तस्य व्यनच्चाव्यनच्च हिनस्तु हरसाशनिः ॥ १४ ॥

---

१ त्वाम्–ख-छ० । २ तनुम्–सा-व० । ३ 'यतः' नास्ति–घ-छ-ज-ञ-सा-व० ।
४ 'अस्य क्षिपन्तं पापकृत्वने' इत्यस्य स्थाने 'अस्य त्वं पापकृत्वने' इति–घ-ज-झ-ञ० ।
५ पापकृत्वनम्–ख० । ६ प्रतिबुभूषति–ग-झ०, अभिदासति–घ०, ह्यभिदासति–ङ०-प्यभिदासति–च-व०, त्वभिदासति–ञ० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये नोऽशिवासः पन्थानः परायान्ति परावतम् ।
तैर्देवि राञ्याः कृत्ये नो गमय स्वानुकृत्तये ॥ १५ ॥
यद्युवैषि द्विपद्यस्मान् यदि वैषि चतुष्पदी ।
निरस्तेतो व्रजास्माभिः [1]कर्तुरष्टापदी गृहान् ॥ १६ ॥
यो नः शपादशपतो [2]यश्च नः शपतः शपात् ।
वृक्षमिव विद्युदाशु तमामूलादनुशोषय ॥ १७ ॥
यं द्विष्मो यश्च नो द्वेष्ट्यघायुर्यश्च नः शपात् ।
शुने पिष्टमिव क्षामं तं प्रत्यस्य स्वमृत्यवे ॥ १८ ॥
यश्च सापत्नः शपथो यश्च यामी शपाति नः ।
ब्रह्मा च यत्क्रुद्धः शपात् सर्वं तत्कृध्यधस्पदम् ॥ १९ ॥
[3]सबन्धुश्चाप्यबन्धुश्च यो अस्माँ अभिदासति ।
तस्य त्वं भिन्ध्यधिष्ठायं पदा विस्फूर्य तच्छिरः ॥ २० ॥
अभिप्रेहि सहस्राक्षं युक्त्वा तु शपथं रथे ।
शत्रूनन्विच्छती कृत्ये वृकीवाविमतो गृहान् ॥ २१ ॥
परि णो वृङ्धि शपथाद्दहन्नग्निरिव ह्रदम् ।
शत्रूनेवाभि नो जहि दिव्या वृक्षमिवाशनिः ॥ २२ ॥
शत्रून्मे प्रोथ शपथात् कृत्याश्च सुहृदो ऽसुहृत् ।
जिह्वाः श्लक्ष्णाश्च दुर्हृदः समिद्धं जातवेदसम् ॥ २३ ॥
असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि ।
अभयं सततं पश्चाद् भद्रमुत्तरतो गृहे ॥ २४ ॥

---

१ कर्तुस्त्वष्टा०—ख-ग-ङ-च-छ० । २ 'यश्च नः शपतः शपात्' इत्यस्य स्थाने 'शपनी यश्च नः शपात्' इति—घ० । ३ सबन्धुश्चासबन्धुश्च—क-घ-च-छ-ज० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परेहि कृत्ये मा तिष्ठ विद्धस्येव पदं नय ।
मृगस्य हि मृगो रिप्रो न त्वा निकर्तुमर्हति ॥ २५ ॥
[1]अघ्न्यास्ये घोररूपे [2]त्वं [3]विपुरूपेऽविनाशिनि ।
जृम्भिता प्रतिगृभ्णस्व स्वयमादाय [4]चाद्भुतम् ॥ २६ ॥
त्वमिन्द्रो [5]यमो वरुणस्त्वमापोऽग्निरथानिलः ।
त्वं ब्रह्मा चैव रुद्रश्च त्वष्टा चैव प्रजापतिः ॥ २७ ॥
आवर्तध्वं निवर्तध्वमृतवः परिवत्सराः ।
अहोरात्राश्चाब्दाश्च दिशश्च प्रदिशश्च मे ॥ २८ ॥
[6]त्वं यमं वरुणं सोमं त्वमापोग्निमथानिलम् ।
अत्राहृत्य पशूंश्चैतानुत्पादयसि चाद्भुतम् ॥ २९ ॥
[7]ये मे दमे दारुगर्भे शयानं धिया सहितं पुरुषं निजह्नुः ।
कुम्भीपाकं नरकं जनाभ्या बद्धा अहरहर्य एवं पुरुषासो यमस्य ॥३०॥
अभ्यक्ताक्ता स्वलङ्कृता सर्वं नो दुरितं [8]वह ।
जानीथाश्चैव कृत्यानां [9]कर्तॄंस्त्वं पापचेतसः ॥ ३१ ॥
यथा हन्ति [10]पुरासीनं तथैवेष्वा सुकृन्नरः ।
तथा त्वया युजा वयं [11]तस्य निकृन्त्मः स्थास्नु जङ्गमम् ॥३२॥

---

१ अरन्यास्ये–ङ-छ०, अघ्न्यास्येव–सा० । २ च–क-घ०, नास्ति किमपि–ग-ङ-च-ज-झ-सा-व० । ३ विष्णुरूपे–च-छ०, वररूपे–व० । ४ चार्मकम्–ज-झ० । ५ 'यमो वरुणः' इत्यस्य स्थाने 'वरुणो यमः' इति–ख-च० । ६ त्वं यमं वरुणं सोममग्निमिन्द्रमथानिलम्–च०, त्वमिन्द्रं यमं वरुणं सोममग्निमथानिलम्–ज-झ०, त्वं यमं वरुणं सोमं मित्रमग्निमथानिलम्–ञ० । ७ अस्यैकस्यैव मन्त्रस्य पूर्वार्द्धः ३९ संख्याकः, उत्तरार्द्धश्च ४० संख्याको दृश्यते ञपुस्तके । ८ दह–ज-झ-ञ-सा०, जहि-व० । ९ कर्तॄन्नॄन्–छ-ज-झ-ञ-सा-व० । १० पूर्वासीनम्-क-घ-ज-झ० । ११ 'तस्य' नास्ति–ज-झ-सा० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तिष्ठैव परेहीतोऽज्ञाते[1] किमिहेच्छसि ।
ग्रीवास्ते कृत्ये पादौ चाभिकर्त्स्यामि [2]विद्रव ॥ ३३ ॥
स्वायसाः सन्ति नोऽसयो विद्मश्चैव परूंषि ते ।
तैस्ते निकृद्मस्तान्युग्रे यदि नो जीवयस्यरीन् ॥ ३४ ॥
मास्योच्छिषो द्विपदं मोत किञ्चिच्चतुष्पदम् ।
मा ज्ञातीननुजानश्वान्[3] मा [4]वेशिप्रतिवेशिनौ ॥ ३५ ॥
शत्रूयता प्रहितासि मां येनाभि यथा यतः ।
ततस्तथा [5]त्वा तुदतु योऽयमन्तर्मयि श्रितः ॥ ३६ ॥
एवं त्वं निकृतास्माभिर्ब्रह्मणा देवि सर्वशः ।
यथेतमाश्रिता गत्वा पापधीनिव नो जहि ॥ ३७ ॥
यथा विद्युद्धतो वृक्ष आमूलादनुशुष्यति ।
एवं स प्रतिशुष्यतु यो मे पापं चिकीर्षति ॥
[6]या मे पापं चिकीर्षति ॥ ३८ ॥
यथा प्रतिशुको भूत्वा तमेव प्रतिधावति ।
[7]पापं तमेव धावतु यो मे पापं चिकीर्षति ॥
[8]या मे पापं चिकीर्षति ॥ ३९ ॥

---

१ अज्ञातेव–ङ-च-ज-झ-ञ० । २ निर्द्रव–क-घ-छ-त्र० । ३ 'अश्वान्' इत्यस्य स्थाने 'पूर्वान्' इति–सा० । ४ वेशिप्रवेशिनौ–छ०, टीकायामपि प्रवेशिशब्द एव व्याख्यातः । ५ त्वाम्–क-ख० । ६ 'या मे पापं चिकीर्षति' नास्ति–ख-घ-च-सा-च०, 'या मे पापं चिकीर्षतीति लिङ्गविपरिणामः' इति–घपुस्तकस्था टिप्पणी । ७ 'पापं तमेव धावतु' इत्यस्य स्थाने 'द्वेष्टारं प्रतिगच्छतु' इत्यपि पाठान्तरम्–क०, ञपुस्तके तु–'पापं तमेव धावतु यो मे पापं चिकीर्षति' इत्यस्य स्थाने 'पापं तमेव धावतु द्वेष्टारं प्रतिगच्छतु' इति पाठः । ८ 'या मे पापं चिकीर्षति' नास्ति–ख-घ-च-ञ-सा-च० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु [1]ब्रह्म वर्म ममान्तरम् ॥ ४० ॥
यो मे करोति प्रद्वारे योऽगारे यो निवेशने ।
[2]यो मे केशनखे [3]कुर्यादञ्जने दन्तधावने ॥ ४१ ॥
प्रतिसर प्रतिधाव [4]कुमार इव पितृगृहान् ।
मूर्धानमेषां स्फोटय पदमेषां कुले [5]जहि ॥ ४२ ॥
[6]एते जह्यञ्जसाऽनृजवो मह्यमग्ने सदाधियो दुर्मदा अनग्रनासः ।
आविध्यैताञ्छोचिषाविध्य तन्तून् वैवस्वतस्य सदनं [7]यमस्य ॥ ४३ ॥
ये नो रयिं दुश्चरितासो अग्ने जह्रुर्मर्त्यासो अनृतं वदन्तः ।
तेषां वपूंष्यर्चिषा जातवेदः शुष्कं न वृक्षमभिसंदहस्व ॥ ४४ ॥
कृष्णवर्णे [8]महद्रूपे [9]बृहत्कर्णे [10]भयङ्करे ।
देवि देवि महादेवि [11]मम शत्रुर्विनश्यतु ॥ ४५ ॥

---

१ 'ब्रह्म वर्म ममान्तरम्' इत्यनन्तरम् 'शर्म वर्म ममान्तरम्' इत्यधिकम्—छ-झ०, 'शर्म वर्म ममान्तरमव ब्रह्म द्विषो जहि' इत्येतावानंशोऽधिकः—ङपुस्तके, घपुस्तके त्वेषोऽधिकोंऽशः पृथङ्मन्त्ररूपेण स्थितः, तस्य संख्या च ४१ वर्तते । २ ये—ज-झ-सा० विहाय सर्वत्र । ३ कुर्युः—ज-झ० विहाय सर्वत्र । ४ कुमारीव पितुर्गृहान्—सा० । ५ कृधि—सा० । ६ एष सम्पूर्णो मन्त्रो नास्त्येव—अपुस्तके । ये द्रुह्युर्ऋजवे मह्यमग्ने कदाधियो दुर्मदा अश्मनासः—सा० । ७ नयस्व—सा० । ८ बृहद्रूपे—च० । ९ महत्कर्णि—च० । १० भयङ्करि—ख-छ०, 'भयङ्करे इत्यपि पाठः' इति—ग०टि०, महद्भये—अ-सा० । ११ मम शत्रुर्विनश्यतु मम शत्रुर्विनश्यत्विति—क०, मम शत्रून् विनाशय मम शत्रून् विनाशय अव ब्रह्म द्विषो जहि—ङ, मम शत्रून् विनाशय मम शत्रून् विनाशयोन्नमः—च-ज-झ०, मम शत्रुर्विनश्यतु मम शत्रुर्विनश्यति—छ-अ०, मम शत्रून् विनाशय—सा० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]कुबेर ते मुखं रौद्रं नन्दिन्नानन्दमावह।
ज्वरं मृत्युभयं घोरं [2]विश नाशय मे ज्वरम्॥ ४६॥
[3]अव ब्रह्म द्विषो जहि॥ ४७॥

[4]फट् फट् जहि महाकृत्ये विधूमाग्निसमप्रभे।
जहि शत्रूँस्त्रिशूलेन क्रुध्यस्व पिब शोणितम्॥ ४८॥

[5]इत्यथर्वणरहस्ये पिप्पलादशाखीयमष्टचत्वारिंशदृगात्मकं सूक्तं समाप्तम्।

---

१ 'कुबेर' इति मन्त्रस्य—'ब्रह्म वर्म ममान्तरं शर्म वर्म ममान्तरं घर्म वर्म ममान्तरम्' इत्युत्तरोऽर्द्धर्चः—च० २ विपम्—क-घ-ङ-छ-ञ०। ३ ॐ शर्म वर्म ममान्तरम्। अव ब्रह्म द्विषो जहि—घ०, उ त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः। अव ब्रह्म द्विषो जहि—च-छ-ज-झ-सा०, ङपुस्तकेऽत्र—'अव ब्रह्म द्विषो जहि' इति सस्वरः पठितः, अपि च ४०, ४५ मन्त्रयोरन्ते स्वररहितस्य तस्य समावेशः कृतः। ञपुस्तके ३५-३६ मन्त्रयोर्मध्य एष स्थापितः, संख्या तु तत्र कापि न दृश्यते। ४ खट् फट्—ङ-ञ-सा०। ५ एष पाठः खपुस्तकस्थः। कपुस्तके टीकासमाप्तौ—'इति पिप्पलादशाखीयं यां कल्पयन्तीति सूक्तमष्टचत्वारिंशदृगात्मकं व्याख्यातम्' इति दृश्यते। गपुस्तके परिशिष्टसमाप्तौ—'इत्याथर्वणे पिप्पलादशाखीयं सपरिशिष्टं प्रत्यङ्गिरासूक्तं समाप्तम्' इति। इत्यथर्ववेदे पैप्पलादशाखायां प्रत्यङ्गिरासूक्तम्—घ०, इति प्रत्यङ्गिरामन्त्राः समाप्ताः—च०, इति मूलऋचः—छ०, इति प्रत्यङ्गिरासूक्तं समाप्तम्—ज-झ०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यङ्गिरासूक्तव्याख्यानम्

(सटिप्पणम्)

श्रीवासुदेवद्विवेदविरचितम्

* यां कल्पयन्ति[1] व्याख्यानं पैप्पलादमपि ध्रुवम् ॥
तेन वाक्यार्थतो नूनं पैप्पलादं ह्यविस्तरम् ।
व्याख्यास्ये यद्यपि तथा सुव्यक्तोऽत्र पदान्वयः ॥

यां कल्पयन्तीति । नोऽस्माकमरयः । यां क्रूरां कृत्याम् [2]इष्टवस्तुवियोगफलिकां कृत्याम् । कल्पयन्ति कुर्वन्ति । कामिव ? वधूमिव यथा [3]पितृगृहाद् वधूं [4]भर्तृगृहे कल्पयन्ति पितृगोत्रभ्रंशादिना [5]पित्रादिभिर्धनादिसम्बन्धरहितां तथा कृत्यां स्वगृहसम्बन्धं त्याजयित्वा मद्गृहे प्रेषयन्तीत्यर्थः । तां कृत्याम् । ब्रह्मणा अनेनैव मन्त्रेण । [6]अपनिर्णुद्मः अपक्रमय्यास्माद् गृहाद् [7]निश्चितं दूरे प्रक्षिपामः । अत एव सा कृत्या प्रत्यक् प्रतिकूलाञ्चना विपरीतगमना भूत्वा । कर्तारमृच्छतु प्राप्नोतु [8]तं नाशयत्विति यावत् ॥ १ ॥

हे कृत्ये, शीर्षण्वतीं शिरोयुक्ताम् । कर्णवतीं [9]कर्णयुक्ताम् । [10]विपुरूपां विष्वग्रूपां [11]सर्वतोरूपाम् । अत एव भयङ्करां भयङ्करीम् । ईदृशीं त्वां [12]कृत्यां कृत्वा । अद्य अस्मिन्नेव

---

* 'श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।' इत्येवं कपुस्तकारम्भः, 'श्रीगणेशाय नमः' इत्येव–ग० ।

१ 'यां कल्पयन्ति ··· यां कल्पयन्तीति' नास्ति–ख-ग० । २ इष्टवस्तुफलिकाम्–ख०, वधूमिव ददाति वियोगफलकाम्–क० । ३ पितृगेहात्–ग० । ४ भर्तृगेहे–ग० । ५ 'पितृधनादिसम्बन्धरहिताम्' इति साधीयान् पाठः । ६ 'अपनिर्णुद्मः' इत्यनन्तरम्–वधूमिव मन्त्रेण अपनिर्णुद्मः' इत्यधिकम्–ग० । ७ 'निश्चितम्' इति नास्ति–ख-ग० । ८ तं नाशयेति–क०, तं नाशयेति यावत्–ख०, विनाशयेति यावत्–ग० । ९ 'कर्णयुक्ताम्' इति नास्ति–क० । १० विष्णुरूपाम्–ख-ग० । ११ सर्वस्वरूपाम्–ग०, 'सर्वतोरूपाम्' इति नास्ति–ख० । १२ 'कृत्याम्' नास्ति–क-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिने। [१]यः कृत्याकर्ता। प्राहिणोत् प्रेषयामास। [२]यदर्थमस्मन्नाशार्थम्। तत् त्वया वित्तं ज्ञातम्। [३]एतदर्थं मामद्य यः प्राहिणोदिति। 'वित्तो भोगप्रत्ययोः' [अष्टा० ८।२।५८] इति निपातः। [४]अतस्त्वया[५] परानिष्टार्थमहं [६]प्रेषिता, तत्पापकरणमनुचितमेवेति ज्ञात्वा कर्तुरेवासुभिः आत्मपुत्रपौत्रादिद्विपद-गवाश्वादिचतुष्पद-प्राणैर्गृहीतैस्त्वं कृत्याकर्तारं जयेति ॥ २ ॥

[७]येनेति। हे कृत्ये, त्वं येन कर्त्रा। दिष्टा [८]आदिष्टा आज्ञप्ता। इह अस्माकं गृहे। प्रतिकूलं [९]द्विपदचतुष्पदादिनाशरूपमनिष्टफलम्। वहसि प्रापयसि अस्मान्। हे अघायिनि, [१०]अघं पापमिच्छति सा अघायिनी, तस्याः संबोधनं हे अघायिनि पापकरणेच्छावति [११]हे कृत्ये। इतः अस्माकं गृहात्। तमेव कर्तारं प्रति। निवर्तस्व निवृत्ता भव। अनागसः, अनपराधानस्मान्। मा ऋच्छः [१२]मा हिंसीरिति ॥ ३ ॥

हे कृत्ये, त्वं कर्तारमभिमुखीभूय वर्तस्व [१३]निवर्तस्व। यतोऽस्माभिरोजसा बलेन तेजसा वा। निरस्ता दूरे [१४]क्षिप्तासि। हे पुरुषादिनि, [१५]पुरुषानत्ति भक्षयति तच्छीला पुरुषादिनी, तस्याः संबोधनं हे पुरुषादिनि कर्तुः पुत्रादिपुरुषभक्षयित्रि [१६]हे कृत्ये। त्वमस्य [१७]तव कर्तुः। आयुर्निकृन्तस्व नितरां छिन्धि। प्रजां च [१८]पुरुषादिरूपां प्रजामपि [१९]निकृन्तस्वेति ॥४॥

यस्त्वा कृत्ये इति। हे कृत्ये, यः शत्रुः। इह अस्मद्गृहे। त्वा त्वाम्। चकार कृतवान् आनीतवान्। हे पुनर्नवे, [२०]पुनः नवा नूला पुनर्नवा, तस्याः संबोधनं हे पुनर्नवे

---

१ 'यः' नास्ति—क०। २ 'यदर्थम्' नास्ति—ख-ग०। ३ 'एतदर्थम्'''निपातः' इति नास्ति—ख-ग०। ४ 'अतः' नास्ति—ग०। ५ 'त्वया' नास्ति—ख-ग०। ६ 'प्रेषिता'''''जयेति' इत्यस्य स्थाने—'प्रेषितेति क्रोधेन तं कृत्याकर्तारमसुभिः प्राणादिभिर्गृहीतैर्योजयेत्यर्थः' इति पाठः—ख-ग०, 'योजयेत्यर्थः' इत्यस्य स्थाने 'जयेत्यर्थः' इति पाठस्तु—गपुस्तके विशेषः। ७ कपुस्तकस्थो मन्त्रप्रतीको नास्ति खगपुस्तकयोरिति सर्वत्र समानम्। ८ 'आदिष्टा' इति नास्ति—ख०। ९ इष्टार्थविनाशरूपं फलम्—ख-ग०। १० 'अघम्'''' हे अघायिनि' नास्ति—ख-ग०। ११ 'हे कृत्ये' नास्ति—ख-ग०। १२ मा हिंसीरित्यर्थः—ख-ग०। १३ निवर्तय—ख-ग०। १४ प्रक्षिप्तासि—ख-ग०। १५ 'पुरुषानत्ति' ' 'कर्तुः' इति नास्ति—ख-ग०। १६ 'हे कृत्ये' नास्ति—ख-ग०। १७ 'तव' नास्ति—क०। १८ पुत्ररूपाम्—ग०। १९ निकृन्तस्वेत्यर्थः—ख-ग०। २० 'पुनः'''हे पुनर्नवे' इति नास्ति—ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[1]नित्यनूतने। त्वं तं कर्तारं गच्छ। इतोऽस्मद्गृहात् परावृत्य नूतनाऽतिबलोपेता भूत्वा कर्तारमेव प्राप्नुहीत्यर्थः। तत्र गत्वा किं कर्तव्यं [2]तत्राह–हे कृत्ये, सर्वा अरातीः [3]सकलानप्यस्मच्छत्रून्। नाशय। सर्वाः [4]यातुधान्यः यातुधानीः [5]राक्षसजातीश्च [6]नाशय। [7]"यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी" [१।१।६०] इत्यमरः॥ ५॥

क्षिप्रं कृत्ये इति। हे कृत्ये, क्षिप्रं शीघ्रम्। कर्तुरेव गृहान् प्रति। [8]निवर्तस्व निवृत्ता भव। गत्वा च तत्र। अस्य तव कर्तुः। पशून् गवादीन्। [9]चकाराच्छुकसारिकादिपक्षिणोऽपि धनादिकमपि नाशय। किं च, अस्य [10]कर्तुः। वीरांश्च [11]वीरानपि [12]पुत्रपौत्रादिजनान् दासांश्च। निबर्हय नितरां बर्हय [13]नाशयेति॥ ६॥

यस्त्वा कृत्ये प्रजिघायेति। हे कृत्ये, यः शत्रुः। विद्वान् मया परानिष्टार्थमियं कृत्या क्रियत इति स्वयं जानानः। [14]अविदुषः, वेत्तीति विद्वान् न विद्वान् अविद्वान् तस्य अविदुषः, ममोपरि केनचिदियं कृत्या [15]कृतेति [16]ज्ञानरहितस्य मम। गृहान् प्रति। त्वा त्वाम्। [17]प्रजिघाय प्रेषितवान्। इतः अस्मद्गृहात्। परेत्य परावृत्य। आशु शीघ्रम्। तस्यैव कर्तुः। तनूं शरीरम्। परुष्परुः पर्व पर्व प्रति। कृन्धि [18]निकृन्तस्व [19]छिन्धीति॥ ७॥

प्रतीचीं त्वापसेधत्विति। हे कृत्ये, रोचिष्णु, [20]'रुच दीप्तौ' [७४५ भ्वादिः] रोचत इति रोचिष्णु रोचमानं दीप्यमानं [21]स्वयमेव प्रकाशमानं ब्रह्मविदां तत्प्रतिपाद्यम् "विज्ञान-

---

१ 'नित्यनूतने' नास्ति–क०। २ 'तत्राह' इत्यस्य स्थाने 'इत्याह' इति–क०। ३ सर्वानपि–ख०, 'सर्वान्' इत्येव–ग०। ४ 'यातुधान्यः' नास्ति–ख०। ५ राक्षसजातीयाश्च–ग०। ६ नाशयेत्यर्थः–ख-ग०। ७ 'यातु''' इत्यमरः' नास्ति–ख-ग०। ८ 'निवर्तस्व' नास्ति–क०। ९ '''च्छुकसारिकादिपक्षिणोऽपि धनादिकमपि' इत्यस्य स्थाने 'च्छुकादिपक्षीन् धनादिकं च' इति पाठः–ख-ग०। १० 'कर्तुः' नास्ति–ख-ग०। ११ 'वीरानपि' नास्ति–ख-ग०। १२ 'पुत्र''' दासांश्च' इत्यस्य स्थाने 'पुत्रपौत्रादीनपि' इत्येव–क०। १३ नाशयेत्यर्थः–ख-ग०। १४ 'अविदुषः''''तस्य' नास्ति–ख-ग०। १५ क्रियत इति–ख-ग०। १६ 'ज्ञानरहितस्य' इत्यस्य स्थाने 'अजानानस्यैव' इति–क०। १७ 'प्रजिघाय' नास्ति–ख०। १८ 'निकृन्तस्व' नास्ति–ग०। १९ छिन्धीत्यर्थः–ख-ग०। २० 'रुच''''रोचिष्णु' नास्ति–ख-ग०। २१ 'स्वयमेव''''कर्तृभूतम्' इत्यस्य स्थाने 'ब्रह्म वेदान्तप्रतिपाद्यं विज्ञानमानन्दं ब्रह्म' इति–ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानन्दं ब्रह्म" [बृह० ३।६।२८] इत्यादिशब्दवाच्यं परं ब्रह्म कर्तृभूतम् । त्वा त्वाम् । प्रतीचीं प्रत्यञ्चनां कर्तारं प्रति गमनशीलां कृत्वा । अपसेधतु नाशयतु । तथा अमित्रहा शत्रुहा । रक्षोहा राक्षसादिदुष्टगणहन्ता । ईदृशः अग्निश्च प्रतीचीं त्वापसेधतु । प्राग्वत् । तथा रिप्रहा [1]अस्माकं दुःखजननोन्मुखपापहन्ता । ईदृशः अज एकपात् एतन्नामकः पूर्वभाद्रपदाभिधनक्षत्रदेवतात्वेनातिप्रसिद्धो देवविशेषश्च प्रतीचीं त्वापसेधतु । प्राग्वत् ॥ ८ ॥

यथा त्वाङ्गिरस इति । हे कृत्ये, पूर्वं पुरातनाः । अङ्गिरसः अङ्गिरोनामका अङ्गिरोगोत्रोत्पन्ना [वा] [2]ऋषयः । त्वा त्वाम् । [3]यथा अपसेधिरे एतन्मन्त्रगणप्रयोगेण नाशयामासुः । [4]एवं भृगवश्च भृगुनामका [5]भृगुगोत्रोत्पन्नाः [वा] । [6]अत्रयश्च अत्रिगोत्रोत्पन्नाः । वसिष्ठाश्च[7] [8]वसिष्ठगोत्रोत्पन्ना ऋषयः । [9]त्वा त्वाम् । यथा अपसेधिरे । तथैव वयमनायासेनाक्लेशेनैव शीघ्रतरमेव । त्वा त्वाम् । अपसेधिम नाशयेम [10]इति ॥ ९ ॥

यस्ते परूंषीति । हे कृत्ये, [11]यस्ते तव कर्ता । परूंषि रूक्षाणि [12]निष्ठुरवचनानि [13]परेहीत्येवमादिरूपाणि । [14]संदधौ [15]संहितवान् । तं गच्छ तमेव कर्तारं प्रति गच्छ । तत्र तत्रैव तव कर्तरि । ते तव । अयनं गमनमुचितमित्यर्थः । [16]यतो हेतोः । अयं मल्लक्षणो जनः । ते तव । अज्ञातः ज्ञातो न । अतस्तवाज्ञाते मयि गमनं नोचितमित्यर्थः[17]; [18]ज्ञाते एव तव [19]कर्तरि गमनमुचितमिति भावः । कथं [20]परूंषि संदधौ ? [21]इत्यतो दृष्टान्तः—रथस्येवेति । धिया बुद्ध्या । "धीः शची माया" [निघ० ३।९] इति बुद्धिनामसु पाठात् । यद्वा धिया कर्मणा तक्षणरूपेण

---

१ अस्मद्दुःख''''—इति साधीयान् पाठः । २ 'ऋषयः' नास्ति—क० । ३ 'यथा' नास्ति—ख-ग० । ४ 'एवम्' नास्ति—क० । ५ 'भृगुगोत्रोत्पन्नाः' नास्ति—ख-ग० । ६ 'अत्रयश्च अत्रिगोत्रोत्पन्नाः' नास्ति—क० । ७ 'च' नास्ति—क० । ८ वसिष्ठगोत्राः- ख-ग० । ९ 'त्वा त्वाम् । यथा' नास्ति—ख-ग० । १० इत्यर्थः—ख-ग० । ११ यतः—क० । १२ निष्ठुराणि वचनानि—क० । १३ 'परेहीत्येवमादिरूपाणि' नास्ति—ख-ग० । १४ 'संदधौ' इत्यस्याग्रे 'परस्परम्' इत्यधिकम्—क० । १५ संधितवान्—क-ख-ग० । १६ 'यतो हेतोः' नास्ति—ख-ग० । १७ 'इत्यर्थः' नास्ति—क० । १८ 'ज्ञाते एव' नास्ति—ख-ग० । १९ कर्तर्येव—ख-ग० । २० 'परूंषि' नास्ति—ख-ग० । २१ 'इत्यतो दृष्टान्तः''''संदधातीति' इत्यस्य स्थाने 'तत्राह—धियेति । ममायमहितमिति धियेत्यर्थः । अत्र दृष्टान्तः—विभुः रथस्येवेति । विभुस्तक्षा यथा रथस्य परूंषि पर्वाणि संदधाति तथेत्यर्थः' इति पाठः—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणा। "धीः शची शमी शिमी" [निघ० २।१] इति कर्मनामसु पाठात्। विभुः विशेषेण [1]भवतीति विभुः विभुनामको देवतक्षा, [2]'ऋभुः, विभुः, वाजः' इति त्रयाणां देवतक्षकाणां भ्रातॄणां मध्ये मध्यमो ज्ञेयः। स विभुस्तक्षा रथादिकाष्ठघटितपदार्थसंपादकः। स रथस्येव स यथा रथस्य परूंषि पर्वाणि सर्वाण्यप्यवयवान् व्यस्तान् सतः संदधातीति ॥ १० ॥

यो नः कृत्ये इति। हे कृत्ये, यः कश्चित्। रणस्थः संग्रामस्थो वा। अन्यो वा असंग्रामस्थो वा। नः अस्मानभिहिंसति। हे कृत्ये, त्वं स्वहेलिता [3]स्वेन आत्मना स्वयमेव [4]हेलिता क्रुद्धा भूत्वा। तस्य [5]प्रागुक्तस्य कृत्याकर्तुः [6]शत्रोः। [7]तनूं शरीरम्। ऋच्छ प्राणैर्वियोजय। कस्य क इव ? द्रोः द्रुमस्य तनूम्। इद्धः समिद्धः [8]संदीप्तः [9]अग्निरिवेति ॥ ११ ॥

भवाशर्वेति। भवाशर्वा [10]भवाशर्वौ भवानीशंकरौ। अस्य अस्मै। पापकृत्वने पापकारिणे [11]कृत्यारूपपापकारिणे। देवहेलिं देवानां क्रोधम्। [12]क्षिपन्तं प्रक्षिपन्तम्। वधार्थमिति शेषः। हे कृत्ये, त्वं हरस्वती क्रोधवती भूत्वा। [13]तस्य कृत्याकर्तुः। [14]किञ्चन किञ्चनापि किञ्चिदपि धनादिकम्। मोच्छिपः [15]मैवोच्छिष्टमवशिष्टं [16]कुर्या इति ॥ १२ ॥

यो नः कश्चिदिति। यः कश्चित्। अरातिः [17]शत्रुः। गुहा गुहायां प्रतिप्रच्छन्ने स्थाने स्थितः। दूरस्थो वा अन्तिकस्थो वा [18]निकटस्थो वा भूत्वा। मनसा [19]प्रतिभूषति [20]हन्तुमिच्छति। [21]प्रतिपूर्वो भवतिरत्र हनने द्रष्टव्यः। [22]हे कृत्ये, तस्य अरातेः। हृत्रं हृदयस्थम्। असृक् रुधिरं [23]पिबेति ॥ १३ ॥

---

१ भातीति–क०। २ 'ऋभुर्विभ्वा वाजः' इति निरुक्तम् [११।१६]। ३ 'स्वेन आत्मना' नास्ति–ख-ग०। ४ 'हेलिता' नास्ति–ख-ग०। ५ 'प्रागुक्तस्य' नास्ति–ख-ग०। ६ 'शत्रोः' नास्ति-ख-ग०। ७ तनुम्–ख०। ८ प्रदीप्तः–ख०। ९ अग्निरिवेत्यर्थः ख-ग०। १० 'भवाशर्वौ' नास्ति–ख-ग०। ११ 'कृत्यारूपपापकरिणे' नास्ति–ख-ग०। १२ 'प्रक्षिपन्तम्' नास्ति–क-ख०। १३ 'तस्य कृत्या' नास्ति–ख०, 'तस्य' नास्ति–ग०। १४ 'किञ्चन किञ्चनापि' नास्ति–ख०, 'किञ्चनापि' नास्ति–ग०। १५ 'मैवोच्छिष्टम्' नास्ति–ख-ग०। १६ मा कुर्या इत्यर्थः–ख-ग०। १७ 'शत्रुः' नास्ति–ख०। १८ 'निकटस्थो वा भूत्वा' नास्ति–ख-ग०। १९ प्रतिबुभूषति–ग०। २० 'हन्तुमिच्छति' नास्ति–ग०। २१ 'प्रतिपूर्वो भवतिरत्र हनने द्रष्टव्यः' नास्ति–ख-ग०। २२ 'हे कृत्ये' नास्ति–ग०। २३ पिबेत्यर्थः–ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

येनासि कृत्ये इति । हे कृत्ये, येन दूढ्येन दुर्धिया दुर्बुद्धिना कृत्याकारिणा [1]शत्रुणा । अस्मज्जिघांसया अस्माकं हन्तुमिच्छया । प्रहितासि प्रेषितासि । तस्य व्यनच्च [2]प्राणच्च [3]प्राणदपि पुत्रादिकम् । अव्यनच्च अप्राणच्च अप्राणदपि धनादिकम् । सा कृत्या हरसा क्रोधेन । अशनिः अशनिरूपा वज्ररूपा भूत्वा । [4]हिनस्त्विति ॥ १४ ॥

ये नोऽशिवास इति । हे कृत्ये, ये नः अस्माकम् । अशिवासः [5]अशिवा अकल्याणरूपाः । पन्थानः मार्गाः । परावतं दूरदेशम् । [6]परायान्ति अतिदूरदेशं [7]गच्छन्ति । तैः दूरदेशं गतैरशिवैर्मार्गैः । रात्र्याः भगवत्या रात्र्या देव्याः प्रसादात् । नः अस्मान् । [8]स्वानुकृत्तये स्वस्याः तवैव कृत्याया [9]अनुकृन्तनाय छेदनाय । गमय [10]प्रापयेति ॥ १५ ॥

यद्युवैषीति । हे कृत्ये, त्वं यद्युवा यदि वा । द्विपदी द्विपाद्युक्ता भूत्वा । अस्मानेषि आगच्छसि । यदि वा चतुष्पदी अस्मानेषि । सा त्वम् । इतः [11]अस्मदीयात् स्थानात् । अस्माभिर्निरस्ता सती अष्टापदी भूत्वा कर्तुः [12]स्वकर्तुरेव । गृहान् व्रज [13]गच्छेति ॥ १६ ॥

यो नः शपादिति । हे कृत्ये, यः शत्रुः । अशपतः शापमददतः । नः अस्मान् । शपात् शापयामास । यश्च योऽपि शत्रुः । शपतः शापं ददतः । नः अस्मान् । शपात् शापयामास । [14]'बहुलं छन्दस्यमाङ्योगेऽपि' [अष्टा० ६।४।७५] इत्युभयत्राडागमाभावः । हे कृत्ये, त्वम् । आशु शीघ्रम् । तं शत्रुम् । आमूलात् मूलमभिव्याप्य । अनुशोष्य [15]अनुक्रमेण आपादतलमस्तकं शुष्कं कुरु । का कमिव ? विद्युद् वृक्षमिव । [16]यथा विद्युदुपरि पतिता सती वृक्षमामूलादनुक्रमेण शुष्कं करोति तथेति ॥ १७ ॥

---

१ 'शत्रुणा' नास्ति–ग० । २ प्राणाञ्च–क० । ३ 'प्राणदपि ⋯ 'अप्राणच्च' नास्ति–क० । ४ हिनस्त्वित्यर्थः–ख-ग० । ५ 'अशिवाः' नास्ति–ख-ग० । ६ 'परायान्ति' नास्ति–क० । ७ 'गच्छन्ति । तैः दूरदेशं ग'-नास्ति–क० । ८ 'स्वानुकृत्तये' नास्ति-ग० । ९ अनुकर्त्तनाय–ख-ग० । १० प्रापयेत्यर्थः-ख-ग० । ११ अस्मदीयस्थानात्–ख-ग० । १२ तव कर्तुरेव-ख-ग० । १३ गच्छेत्यर्थः–ख-ग० । १४ 'बहुलं ⋯ 'अडागमाभावः' नास्ति–ख-ग० । १५ 'अनुक्रमेण' नास्ति–ग० । १६ 'यथा ⋯ तथेति' इत्यस्य स्थाने 'स्पष्टम्' इत्येव–ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यं द्विष्म इति । हे कृत्ये, वयं यं द्विष्मः । यश्च योऽपि । नः अस्मान् द्वेष्टि । अघायुः अघं दुःखमिच्छतीत्यघायुः, अस्मभ्यं दुःखदानेच्छावान् । ईदृशो यश्च योऽपि शत्रुः । नः अस्मान् । शपात् शापयामास । तं त्रिविधमप्यस्मदीयं शत्रुम् । क्षामम् अतिक्षीणं कृत्वा । स्वमृत्यवे [1]स्वीयमरणाय । प्रत्यस्य [2]अतिदूरतरं [3]प्रक्षिप । कस्मै किमिव ? शुने पिष्टमिवेति । यथा कुक्कुराय पिष्टं दूरतरं विभज्य प्रक्षिप्यते तथाऽस्मदीयं शत्रुं हस्ताद्यवयवशः पिष्टमिव चूर्णितं कृत्वातिदूरं प्रक्षिपेत्यर्थः । [4]अडभावः प्राग्वदिति ॥ १८ ॥

यश्च सापत्नः । हे कृत्ये, यश्च योऽपि । सापत्नः [5]शत्रुसम्बन्धी सपथः । यश्च [6]योऽपि । यामी [7]यामोऽस्यास्तीति यामी आयामवानतिदैर्घ्यवानतिविस्तृतः शपथः । यद्वा यामी यमस्यायं यामः, याम एव यामी । 'व्रीह्यादिभ्यश्च' [अष्टा० ५।२।११६] इति स्वार्थे इनिः । यमनियुक्तो [8]यमदूतो यः कश्चनेत्यर्थः[9] । स वा नः अस्मान् शपाति । ब्रह्मा च चतुर्मुखोऽपि क्रुद्धः सन् [10]यत् नः अस्मान् । शपात् शापयामास । तत्सर्वं सर्वविधमपि शापम् । हे कृत्ये, अधस्पदं पदादध इत्यधस्पदं पादतलादप्यधः । कृधि कुरु । पादतलेन [11]सर्वविधमपि शापमुन्मूलयेति [12]भावः ॥ १९ ॥

सबन्धुश्चेति । हे कृत्ये, सबन्धुश्च बन्धुसहितोऽपि । अबन्धुश्च बन्धुरहितोऽपि । [13]यः शत्रुः । अस्मानभिदासति हिनस्ति । हे कृत्ये, तस्य [14]हिंसयितुः शत्रोः । शिरोऽधिष्ठाय । पदा [15]पादेन तद् विस्फूर्य विशेषेण हत्वा । भिन्धि [16]'भिदिर् विदारणे' [१४४० रुधादिः] विदीर्णं कुरु । [17]'स्फुरति स्फुलति निवपन्तु' [निघ० २।१९] इति वधकर्मसु पठितमिति ॥ २० ॥

---

१ स्वीयमारणाय-क० । २ अतिदूरम्-ख० । ३ 'प्रक्षिप ·· कृत्वातिदूरम्' नास्ति-क० । ४ शपादित्यत्रेति योजनीयम् । 'अडभावः प्राग्वत्' नास्ति-ख-ग० । ५ वैरिसम्बन्धी- ख-ग० । ६ 'योऽपि' नास्ति-ख-ग० । ७ 'यामोऽस्यास्तीति····स्वार्थे इनिः' नास्ति-ख-ग० । ८ 'दूतः' इत्येव-ख-ग० । ९ 'इत्यर्थः' नास्ति-ख-ग० । १० 'यत्' नास्ति-ख-ग० । ११ सर्वमपि-ग० । १२ 'भावः' इत्यस्यानन्तरम् 'इति' इत्यधिकम्-क० । १३ यश्च-ख० । १४ हिंसितुः-ग० । १५ पदेन-ग० । १६ 'भिदिर् विदारणे' नास्ति-ख-ग० । १७ 'स्फुरति ···'पठितमिति' नास्ति-ख-ग० । 'विस्फूर्य विशेषेण हत्वा' इत्यस्य समर्थकमेतदुद्धरणम् । हस्तलेखे 'निवपन्तु' इत्यस्य स्थाने 'निवपन्ति' इति पठितः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिप्रेहीति। हे कृत्ये, त्वं तु रथे शपथं युक्त्वा योजयित्वा। सहस्राक्षम् इन्द्रम्। अभिप्रेहि गच्छ। शत्रूनन्विच्छती [1]शत्रूनवलोकयन्ती सती। [2]ननु को वा भाव इति चेत्; हे बाल, नहि मरणं विना केनचिदपीन्द्रपदं गन्तुं शक्यते। हे कृत्ये, त्वमतिशीघ्रमेव म्रियस्व। मृता सती रथेऽश्वस्थाने शपथं योजयित्वा पश्चादिन्द्रपदं गच्छ। त्वमिन्द्रं स्वपतित्वेनेन्द्राणीव[3] प्राप्स्यसीति [4]निन्दागर्भस्तुतिलक्षणं भावं स्पष्टं कथं नावगच्छसि। का कानिव ? अविमतः मेषयुक्तान् गृहान् वृकीव। यथा मेषयुक्तान् [5]गृहान् मेषभक्षणलिप्सया वृकी प्राप्नोति तथा त्वमपीन्द्रं प्राप्नुहीति लिप्सामात्रे दृष्टान्तो [6]न तु सर्वांश इति ॥ २१ ॥

परि णो वृङ्धीति। हे कृत्ये, [7]त्वं कृत्याकर्तुः स्वीयाच्छपथात्। नः अस्मान्। परिवृङ्धि परिवर्जय। कः कमिव ? दहन्नग्निर्हृदमिव। स यथा ह्रदं परित्यजति [8]तथेत्यर्थः। अस्मान् परित्यज्य किं कर्त्तव्यमित्याह—नः अस्माकम्। शत्रूनेवाभिजहि। न त्वस्मानित्यर्थः। का कमिव ? दिव्या दिवि अन्तरिक्षे भवा दिव्या [9]आन्तरिक्षा। एतादृशी अशनिः विद्युत्। सा [10]वृक्षमिवेति ॥ २२ ॥

शत्रून्मे प्रोथेति। हे कृत्ये, त्वं शपथात् कृत्याकर्तुः कृताच्छपथात् [11]। मे मम। शत्रून् कृत्याकर्तॄनेव। प्रोथ नाशय। तथा सुहृदः सुहृद्भूता मित्रभूताः। कृत्याश्च अन्याः कृत्या अपि। प्रोथ नाशय। असुहृत् यदि त्वमसुहृद् भविष्यसि। तदा जिह्माः कुटिलाः। दुर्हृदः दुर्हृदया [12]दुष्टहृदया अमित्रभूता अन्याः कृत्याः, तथा श्लक्ष्णाश्च स्निग्धाश्च अतिस्नेहवतीरपि कृत्याः प्रोथ नाशय। किं च, समिद्धं [13]दीप्तम् अतिप्रज्वलितम्। जातवेदसम् अग्निं च प्रोथ भक्षय। [14]को भाव इति चेत्; मम शत्रुभक्षणे सुहृद्दुर्हृत्श्लक्ष्णरूपत्रिविधकृत्याभक्षणेऽपि हे कृत्ये, यदि त्वं

---

१ 'शत्रून्' नास्ति—क०। २ 'ननु को वा ''' त्वमिन्द्रम्' इत्यस्य स्थाने 'मरणं विनेन्द्रपदप्राप्तेरयोगाच्छीघ्रमेव म्रियस्व मृत्वेन्द्रपदं गत्वा' इति पाठः—ख-ग०। ३ इन्द्राणीवेन्द्रम्—ख-ग०। ४ 'निन्दागर्भ''''नावगच्छसि' इत्यस्य स्थाने 'निन्दागर्भा स्तुतिरत्र ज्ञातव्या' इति पाठः—ख-ग०। ५ 'गृहान्' नास्ति—ख-ग०। ६ 'न तु सर्वांश इति' नास्ति—ख-ग०। ७ 'त्वम्' नास्ति—क०। ८ तथेति— क०। ९ आन्तरिक्ष्या—क०। १० वृक्षमिव स्पष्टमिति—क०, वृक्षमिव स्पष्टमित्यर्थः—ख-ग०। ११ 'शपथात्' नास्ति—ख-ग०। १२ दुर्हृदयाः—क०। १३ 'दीप्तम्' नास्ति—ख-ग०। १४ 'को भावः '''' भक्षयेति' नास्ति—ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षुधितैव भविष्यसि तर्ह्यतिप्रज्वलितं हुताशनं भक्षयेति निन्दागर्भस्तुत्या स्पष्टं भावं जानीहि। लोके ह्यतिप्रसिद्धमेतद् यस्याः क्षुधाशान्तिर्न भवति तां प्रत्युच्यते काष्ठं भक्षयेति ॥ २३ ॥

असपत्नं पुरस्तान्न इति। हे कृत्ये, नः अस्माकम्। पुरस्तात् पूर्वस्यां दिशि। असपत्नं [1]सपत्नाभावम्। कृधि कुरु। तथा दक्षिणतः दक्षिणस्यां दिशि। शिवं कल्याणम्। कृधि कुरु। तथा [2]पश्चात् पश्चिमस्यां दिशि। सततं निरन्तरम्। अभयं भयाभावम्। कृधि कुरु। तथा उत्तरतः उत्तरस्यां दिशि। नो गृहे भद्रं पुत्रपौत्रादिविवाहाद्युत्सवं कृधि कुरु [3]इति ॥ २४ ॥

परेहि कृत्ये इति। हे कृत्ये, परेहि [4]पराङ्मुखीभूय गच्छ। मा तिष्ठ, अत्रेति शेषः। तर्हि किं कर्त्तव्यमित्याह—पदं स्थानं कृत्याकर्तुरिति शेषः। नय स्वात्मानं प्रापय। तेन कृत्याकर्तुः पदं स्थानं [5]स्वात्मानं नय प्रापयेत्यर्थः सिद्धः। कस्येव? विद्धस्येव। यथा शरादिना विद्धस्य पदं सुखेनैव प्राप्यते तथा त्वं तव कर्तुः पदं सुखेनैव प्राप्स्यसीति भावः। कथं तत्र गत्वा स्थातुं [6]शक्यमित्युत्तरार्द्धेनाह—हि यतः। मृगस्य [7]पापात्मनोऽस्मच्छत्रोः। मृगः त्वादृशो जनः। अरिप्रः अशत्रुः। अतो हेतोः स त्वा त्वाम्। निकर्त्तुं नितरां कर्त्तुं कर्त्तितुं छेत्तुम्। नार्हति नैव योग्यो भवति। [8]"मृगो मार्ष्टेर्गतिकर्मणः" [निरु० १।२०] इति यास्कः ॥२५॥

अघ्न्यास्ये इति। हे अघ्न्यास्ये अहन्तव्यास्ये अघघ्नास्ये वा। [9]"अघ्न्याऽहन्तव्या भवत्यघघ्नीति वा" [निरु० ११।४३] इति यास्कः। घोररूपे अतिक्रूररूपे। [10]विपुरूपे विषमरूपे [11]नानारूपे। अविनाशिनि विनाशरहिते। ईदृशि हे कृत्ये, [12]त्वं जृम्भिता आलस्ययुक्ता [13]सती आयासलेशरहिता सती। स्वयम् अद्भुतम् अभूतं भूतरहितं [14]पञ्चमहाभूतरहितं मृतं तव कर्तारम्। स्वयमादाय गृहीत्वा। प्रतिगृभ्णस्व प्रतिगृह्णीष्व भक्षयेत्यर्थः ॥ २६ ॥

---

१ सपत्नरहितम्—क०। २ 'पश्चात्' नास्ति—क०। ३ इत्यर्थः—ख-ग०। ४ पराभूय-क०। ५ आत्मानम्—ख-ग०। ६ शक्यं तत्राह मृगस्येति—ख-ग०। ७ 'पापात्मनो ··· त्वादृशो जनः' इत्यस्य स्थाने 'स्वकृतपापेन गन्तुस्तव कर्तुरस्मच्छत्रोर्मृगयितस्तस्य पदं गत्वा त्वल्लक्षणो जनो मृगः' इति—क०। ८ 'मृगो ··· यास्कः' नास्ति-ख-ग०। ९ 'अघ्न्या ··· यास्कः' नास्ति—ख-ग०। १० 'विपुरूपे' नास्ति—क०। ११ 'नानारूपे' नास्ति—क०। १२ 'त्वम्' नास्ति—ख-ग०। १३ 'सती' नास्ति—ख-ग०। १४ पञ्चभूतरहितम्—क० पञ्चमहाभूतम्—ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१]त्वमिन्द्र इति। इयं कृत्यायाः स्तुतिरिति स्पष्टा। हे कृत्ये, त्वमिन्द्र इत्यादि। अनिलशब्देन वायुः। त्वष्टृशब्देन सूर्यः, "त्वष्टा तूर्णमश्नुत इति नैरुक्ताः" [निरु० ८।१४] इति निरुक्तितः। "विष्णु[ष्णु]र्वा प्रजापति[ः] दक्षप्रजापतिः" इति (?) ॥ २७ ॥

आवर्तध्वमिति। अनया कृत्याग्रस्तः कृत्याप्रतिमोचनाय देशकालौ प्रार्थयते। हे ऋतवः, मे मम कृत्याग्रस्तस्य कृत्याप्रतिमोचनाय। आवर्तध्वम् अभिमुखीभूय वर्तध्वम्। अत एव निवर्तध्वम् अन्यस्मात्स्थानान्निवृत्ता [२]भवत। [३]एवं हे परिवत्सराः, मे आवर्तध्वं निवर्तध्वम्। परिवत्सरशब्देनायने उच्येते, [४]अब्दशब्दस्य पृथगुपादानात्। एवम् अहोरात्राः, [५]मे आवर्तध्वं निवर्तध्वम्। एवम् अब्दाश्च। [६]अब्दशब्देन संवत्सरा उच्यन्ते। [७]एवं [८]दिशः प्रदिशश्च। प्रदिक्शब्देन विदिश उच्यन्त [९]इति ॥ २८ ॥

त्वमिति। हे कृत्ये, त्वं यमं वरुणं सोमम् एतान्। तथा त्वं त्वमेव। आपः अपः जलम्। अग्निम्। अथ अनिलं वायुम्। एतांश्च एतानपि। अत्र अस्माकं गृहे। आहृत्य आनीय स्थापयित्वा। अस्मान् प्रति पशूनुत्पादयसि शीघ्रमेव गवादिपशुवदतिवश्यानुत्पादयिष्यसि[१०] [११]जनयिष्यसि करिष्यसि। किं च, अद्भुतं च [१२]अभूतं च यत्कदापि न भूतं न संपन्नं तदपीत्थमेवा[१३]संभावितमप्य[१४]स्माकमभिलषितं [१५]पदार्थमुत्पादयसि उत्पादयिष्यसि शीघ्रमेव जनयिष्यसीति[१६] ॥ २९ ॥

ये मे दम इति। [१७]अत्र कृत्याविशेषणत्वेन यत्तत्पदे अध्याहृत्य व्याख्येयम्। तत्तत्रैवाग्रे स्पष्टं भविष्यति। ये यमस्य पुरुषासः धर्मराजस्य पुरुषाश्चित्रगुप्तादयः। मे मम। दारुगर्भे

---

१ 'त्वमिन्द्र इति स्पष्टम्। कृत्यास्तुतिमन्त्रोऽयम्' इत्येव—ख-ग०। २ भवन्तु—ख-ग०। ३ 'एवं हे' इत्यस्यानन्तरम् 'ऋतवः, मे आवर्तध्वं निवर्तध्वम्। एवम्' इत्यधिकम्—क०। ४ 'अब्दशब्दस्य पृथगुपादानात्' नास्ति—ख-ग०। ५ 'मे आवर्तध्वं निवर्तध्वम्' नास्ति—ख-ग०। ६ 'अब्द·····उच्यन्ते' नास्ति—ख-ग०। ७ 'एवम्' नास्ति—क०। ८ दिशश्च—ख०। ९ 'इति' नास्ति—ख-ग०। १० उत्पादयसि—क०। ११ 'जनयिष्यसि करिष्यसि' नास्ति—ख-ग०। १२ 'अभूतं च' नास्ति—ख-ग०। १३ 'एव' नास्ति—ख-ग०। १४ 'अपि' नास्ति—ख-ग०। १५ 'पदार्थ·····उत्पादयिष्यसि' नास्ति—ख-ग०। १६ 'इति' नास्ति—ख-ग०। १७ 'अत्र·····भविष्यति' नास्ति—ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काष्ठगर्भे नानाविध[1]तक्षणादिसंस्कारसंस्कृतातिसौन्दर्योपेतकाष्ठरचिते । दमे गृहे । शयानं पादौ प्रसार्य स्वपन्तमतिशयेन[2] चिन्तालेशरहितम् । अत एव भिया [3]यजनयाजनादिषड्विधकर्मणा सहितम् । पुरुषं पौरुषोपेतं पुत्रपौत्रादिकम् । निजह्रुः नितरां हृतवन्तः । कृत्याजनितमरणोत्तरं तदनु कुम्भीपाकं [4]कुम्भीपाकाभिधम् । नरकं नरकविशेषं निजह्रुः । ते यमस्य पुरुषासः पुरुषाः । [5]हे कृत्ये, जनाग्र्या सर्वजनपूज्यया । त्वयेति शेषः । अहरहः प्रतिदिनं ते बद्धाः । एवं इत्थं [6]तवालौकिकं सामर्थ्यमिति शेषः । [7]पुरुषं कुम्भीपाकं नरकं च निजह्रुरिति मानसभयेन संभावनामात्रं न त्वेतत्संपन्नम् । यद्वाऽत्युग्रप्रारब्धतः संपन्नं वा ज्ञेयमिति ॥ ३० ॥

अभ्यक्तेति । हे कृत्ये, त्वम् अभ्यक्ता [8]अभि अस्मानभिमुखीभूय[9] अक्ता [10]व्यक्ता स्पष्टा सती । [11]'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' [१४५९ रुधादिः] पठितः । तथा आऽक्ता आ अर्वाक् । [12]"आ इत्यर्वागर्थे" [निरु० १।३] इति यास्कः । अस्मदभिमुखीभूता सती अक्ता स्पष्टा । [13]शब्दतो विशेषो न त्वर्थतः पूर्वस्मात् । उक्तस्यैवार्थस्य पुनरुक्तिर्भूयस्त्वायार्थस्य । यास्कः—"अभ्यासे भूयांसमर्थं मन्यन्ते, यथाहो दर्शनीयाहो दर्शनीयेति" [निरु० १०।४२] इत्युक्तवान् । तथा स्वलंकृता [14]सुष्ठु अलंकृता कर्णभूषणकुण्डलाद्यलंकृता । ईदृश्यपि सती त्वम् । नः अस्माकम् । सर्वं दुरितं त्वज्जनितं दुःखप्रदं दुरदृष्टम् । वह वाहय प्रवाहय [15]नाशयेत्यर्थः । उत्तरार्द्धे कर्तॄनित्यध्याहारः । हे कृत्ये, त्वं कृत्यानां कर्तॄन् शत्रून् । पापचेतसः पापान्तःकरणानेव जानीथाश्च जानीहि च । ज्ञात्वा च तान्नाशयेति भावः ॥ ३१ ॥

---

१ 'तक्षणादि····सौन्दर्योपेत' नास्ति—ख-ग० । २ 'अतिशयेन' नास्ति—ख-ग० । ३ 'यजन····कर्मणा' इत्यस्य स्थाने 'षट्कर्मणा' इत्येव—ख-ग० । ४ 'कुम्भीपाकाभिधम्' नास्ति—क० । ५ 'हे कृत्ये····त्वयेति शेषः' इत्यस्य स्थाने 'हे कृत्ये, या त्वं जनाग्री जनाग्र्या सर्वजनपूज्या अतिश्रेष्ठा तया' इति पाठः—क० । ६ 'तव' नास्ति—ख-ग० । ७ 'पुरुषं····ज्ञेयमिति' नास्ति—ख-ग० । ८ 'अभि' नास्ति—ख-ग० । ९ 'भूय····पठितः' नास्ति—ख० । १० 'व्यक्ता' नास्ति—ग० । ११ 'अञ्जू····पठितः' नास्ति—ग० । १२ 'आ····सती' नास्ति—ख-ग० । १३ 'शब्दतो····इत्युक्तवान्' इत्यस्य स्थाने 'सती । पूर्वार्थस्यैवाभ्यासोऽयम्' इत्येव पाठः—ख-ग० । १४ 'सुष्ठु····अलंकृता' इत्यस्य स्थाने 'सम्यगलङ्कारयुक्ता' इत्येव—ख-ग० । १५ नाशयेति यावत्—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा हन्तीति । हे कृत्ये, यथा आसीनम् उपविश्य तिष्ठन्तं निरुद्यमं पुरुषम् । [१]पुरा पुराणं [२]प्राक्तनं दुरदृष्टं [३]कर्तृभूतं सत् । हन्ति दारिद्र्यादिना पीडयति । [४]अयमर्थश्च–"आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः । शेते निपद्यमानस्य चराति चरतो भगः ॥" [ऐत० ब्रा० ७।१५।३] इत्यादिश्रुतिष्वतिप्रसिद्धः । तथैव सुकृत् [५]शोभनकर्मकृत् पुण्यकृन्नरः । इष्वा शरेण । हन्ति, [६]शत्रुमिति [७]शेषः । तथा हे कृत्ये, त्वया युजा युक्तया [८]संयुक्तया हेतुभूतया । वयं तस्य तव [९]कर्तुः शत्रोः । स्थास्नु स्थावरम् । [१०]जङ्गमं जङ्गममपि । [११]निकृन्मः छिन्द्म इत्यर्थः ॥३२॥

उत्तिष्ठैवेति । हे कृत्ये, त्वम् अज्ञातेव सती । इतः अस्मदीयात् स्थानात् । उत्तिष्ठैव उत्थाय च । परेहि पराङ्मुखीभूय गच्छ । इह स्थित्वा-किं कर्तुमिच्छसि ? इह स्थित्वाऽस्मदीय-मनिष्टं त्वया कर्तुमशक्यमित्यर्थः । अपि च यदि मदीयमुक्तं न करिष्यसि तदा हे कृत्ये, ते तव । ग्रीवाः पादौ च अभिकर्त्स्यामि अभिमुखीभूय कर्त्तयिष्यामि । विद्रव प्रपलाय-स्वास्मात् स्थानादिति[१२] ॥ ३३ ॥

स्वायसा इति । हे कृत्ये, नः अस्माकम् । गृह इति शेषः । स्वायसाः [१३]अयःशब्देन लोहम्, तत्सम्बन्धिन आयसाः; सुष्ठु आयसा अत्युत्तमलोहघटिता [१४]इत्यर्थः । ईदृशा असयः [१५]अस्यन्ति क्षिपन्ति छित्वाऽतिदूरं शत्रूनिति ह्यसयः खड्गाः । सन्ति विद्यन्ते । हे कृत्ये, ते तव । परूंषि च पर्वाण्यपि अस्थ्यादिसन्धिरूपाणि । विद्म एव जानीम एव । ज्ञात्वा च हे कृत्ये, तैः असिभिः । ते तव । तानि पर्वाणि । निकृन्मः नितरां छिन्द्मः । हे उग्रे अतिक्रूरे कृत्ये । यदि नः अस्माकम् । अरीन् शत्रून् । जीवयसि [१६]जीवयिष्यसि तदा । न चेन्नैव ते तानि निकृन्म इति[१७] ॥३४॥

---

१ 'पुरा' नास्ति–ग० । २ 'प्राक्तनम्' इत्यस्य स्थाने 'प्रस्तुतं प्रारब्धम्' इति–क० । ३ 'कर्तृभूतं सत्' नास्ति–ख-ग० । ४ 'अयमर्थश्च·····प्रसिद्धः' नास्ति–ख-ग० । ५ 'शोभन·····नरः' इत्यस्य स्थाने 'पुण्यात्मा जनः' इति–ख-ग० । ६ शत्रुमित्यर्थः–ख-ग० । ७ 'शेषः' नास्ति–ख-ग० । ८ 'संयुक्तया' नास्ति–ख-ग० । ९ 'कर्तुः' नास्ति–ख-ग० । १० 'जङ्गमम्' नास्ति–ख-ग० । ११ निकृन्म इति–क० । १२ 'इति' नास्ति–ख-ग० । १३ 'अयः·····आयसाः' नास्ति–ख-ग० । १४ 'इत्यर्थः' नास्ति–ख-ग० । १५ 'अस्यन्ति ····ह्यसयः' नास्ति–ख-ग० । १६ 'जीवयिष्यसि' नास्ति–ख-ग० । १७ 'इति' नास्ति–ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माऽस्येति । हे कृत्ये, अस्य शत्रोः । द्विपदं [1]गृहवर्तिनं द्विपदाद्युक्तं पुत्रादिकम् । मा उच्छिषः [2]मैवोच्छिष्टमवशिष्टं कार्षीः । तथा अस्य [3]उत किञ्चित् किञ्चिदपि । चतुष्पदं गवादिकं मोच्छिषः । प्राग्वत् । [4]एवं पूर्वार्द्धेन सामान्यतोऽस्य[5] द्विपदं [चतुष्पदं] च मोच्छिष इत्युक्त्वोत्तरार्द्धेन[6] विशेषत आह । [7]तथा हि—मा ज्ञातीन् सपिण्डान् मोच्छिषः । मा ज्ञातीनित्यपि सामान्यत उक्त्वा परमप्रेमास्पदान् विशेषत आह—[अनुजानिति । कनिष्ठभ्रातॄनित्यर्थः । चतुष्पदे विशेषमाह—] अश्वानिति । अस्याश्वान् मोच्छिषः [मा] प्रथय । किञ्चित्सम्बन्धिद्विपदं चतुर्थपादेन विशेषत आह—मा वेशिप्रतिवेशिनाविति । अस्य वेशिप्रतिवेशिनौ मोच्छिषः । विशति प्रविशति संबन्धेनाऽस्य गृहे तच्छीलो वेशी पितृष्वसेयमातृष्वसेयमातुलेयादिः सर्वोऽपि संबन्धी वेशिशब्देन ज्ञेयः । प्रविशति निकटे स्थित्वाऽस्य गृह इति प्रवेशी सर्वोऽपि प्रतिवेशिवर्गः । एवमस्या ऋचोऽर्थः ॥ ३५ ॥

शत्रूयतेति । हे कृत्ये, त्वं [8]येन शत्रूयता [9]शत्रुवदाचरति शत्रूयति शत्रूयतीति शत्रूयत् तेन शत्रूयता शत्रुवदाचरता । मामभि प्रहितासि [10][मामभिप्रेत्य] प्रेषितासि । यथा येन प्रकारेण । यतः यस्मात् स्थानात् । तथा तेनैव प्रकारेण । ततः तस्मिन्नेव [11]स्थाने । योऽयं सर्वजनप्रत्यक्षः परमात्मा सर्वजीवनियन्ता । मयि अन्तः हृदयाकाशे । श्रितः स्थितः । हे कृत्ये, स त्वा त्वाम् । नुदतु प्रेरयतु दूरे [12]प्रक्षिपत्विति[13] ॥ ३६ ॥

---

१ 'गृहवर्तिनं द्विपदाद्युक्तम्' नास्ति—ख-ग० । २ 'उच्छिष्टम्' नास्ति—ख-ग० । ३ 'उत' नास्ति—क० । ४ 'एवं पूर्वार्द्धेन' नास्ति—ख-ग० । ५ 'अस्य ····· मोच्छिष इति' नास्ति—ख-ग० । ६ 'उत्तरार्द्धेन' नास्ति—ख-ग० । ७ 'तथा हि ····· ऋचोऽर्थः' इत्यस्य स्थाने 'मा ज्ञातीनिति सपिण्डानित्यर्थः । अत्रापि विशेषमाह--अनुजानिति । कनिष्ठभ्रातॄनित्यर्थः । चतुष्पदे विशेषमाहाश्वानिति । सामान्यद्विपदे विशेषमाह—मा वेशीति । वेशी मातुलेयादिः । प्रवेशी सर्वदा संनिहितः । तौ मोच्छिष इत्यर्थः' इति पाठः—ख० । गपुस्तके तु खपुस्तकस्थम्-'मा वेशीति ····· मोच्छिष इत्यर्थः' इत्येतदेव वर्तते । ८ 'येन' नास्ति—ग० । ९ शत्रुवदाचरति ···· शत्रूयता' नास्ति—ख-ग० । १० अभिमुखीभूय-क-ख-ग० । ११ 'स्थाने' नास्ति—क० । १२ क्षिपतु—क० । १३ 'इति' नास्ति—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं त्वमिति। हे देवि द्योतमाने [1]स्वतेजसा दीप्यमाने हे कृत्ये, एवम् अनेन प्रकारेण। अस्माभिर्ब्रह्मणा [2]मन्त्रेणानेन मन्त्रप्रयोगेण। त्वं सर्वशः [3]सर्वत्र सर्वेष्वपि [4]हस्तपादादिष्ववयवेषु। निकृत्ता छिन्ना सती। यथेतं यथागतं स्थानम्। गत्वा तत्स्थानमाश्रिता यावच्चन्द्रार्कमाश्रिता [5]सती। नः अस्मान्। जहि त्यज। क्वानिव पापध्नीनिव [6]पापं दधति धारयन्ति प्रायश्चित्ताद्याचरणं विना स्वात्मवशे स्थापयन्ति ते पापधयः पापधारका [7]अति-नास्तिका जनास्तानिव। यथा वैदिको जनस्तांस्त्यजति तथेत्यर्थः॥ ३७॥

यथेति। यथा येन प्रकारेण। विद्युद्धतः विद्युद्धिंसितः। वृक्षः अश्वत्थादिः। आमूलात् मूलमभिव्याप्य। अनुशुष्यति अनुक्रमेण शुष्को भवति। एवम् अनेन प्रकारेण। मे मह्यं मदर्थम्। पापं कृत्यादिरूपम्। चिकीर्षति कर्तुमिच्छति। यः पुरुषः। स प्रतिशुष्यतु स्वयमेव प्रतिशुष्को भवतु। या काचित् स्त्री वा मे पापं चिकीर्षति सा प्रतिशुष्यत्विति लिङ्गविपरिणाम इति॥ ३८॥

यथा प्रतीति। यथा प्रतिशुकः संमुखवर्ती अपरः शुकः। भूत्वा पुनः पुनः प्रतिशब्दं कुर्वाणः। तमेव शब्दं कुर्वाणमेव [8]शुकं प्रतिधावति। एवं यो मे पापं चिकीर्षति [9]या मे पापं चिकीर्षतीति प्राग्वत्। पापं [10]कृत्यादिरूपं पापं कर्तृभूतं तमेव कृत्याकारिणं पुरुषं तामेव च कृत्याकारिणीं स्त्रियं धावत्विति[11]॥ ३९॥

यः शत्रुः। स्वः स्वीयो भ्रातृव्यादिः। अरणः रणरहितः संग्रामरहितो भूत्वा। जिघांसति हन्तुमिच्छति। यश्च योऽपि। निष्ट्यः [12]'स्त्यै [ष्ट्यै] शब्दसंघातयोः' [९१०–९११ भ्वादिः] [13]निः निरन्तरं स्त्यायति शब्दायते त्वं मया [14]हतस्त्वं[15] मया हन्तव्यस्त्वं मृतस्त्वं मरिष्यसि

---

१ स्वेन तेजसा–ग०। २ 'मन्त्रेण' नास्ति–ख-ग०। ३ 'सर्वत्र' नास्ति–क०। ४ हस्ताद्यवयवेषु–ख-ग०। ५ 'सती' नास्ति–ग०। ६ 'पापं ···· धारकाः' नास्ति–ख-ग०। ७ 'अति ···· निव' इत्यस्य स्थाने 'अतिनास्तिकजनानिव' इति–ख-ग०। ८ 'शुकम्' इत्यस्याग्रे 'चार्थम्' इत्यधिकम्–क०। ९ 'या मे ······ चिकीर्षतीति' नास्ति–ख-ग०। १० कृत्यारूपम्–ख-ग०। ११ 'इति' नास्ति–ख-ग०। १२ 'स्त्यै [ष्ट्यै] शब्दसंघातयोः' नास्ति–ख-ग०। १३ 'निः ···· स्त्यायति' इत्यस्य स्थाने 'नितरां ष्ट्यायति' इति–ख-ग०। १४ 'हतः' नास्ति–ख०। १५ 'त्वं मया ·· रणकर्ता' इत्यस्य स्थाने 'हन्तव्यो मरिष्यसीत्यादिशब्दपूर्वकम्' इति–ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

-त्व शिरश्छिन्नं तव शिरश्छेत्स्यामीत्येवमादिपूर्वकं यो रणकर्ता संग्रामकर्ता । [1]सर्वेऽग्नीन्द्रादित्य-प्रभृतयो देवास्तं धूर्वन्तु हिंसन्तु। यतो मम ब्रह्म [2]मन्त्ररूपं शब्दब्रह्म। [3]आन्तरं शरीरमध्यवर्त्ति। वर्म कवचं रक्षकं सद् वरीवर्त्तीति[4] ॥ ४० ॥

यो म इति । [5]हे कृत्ये, यः कृत्याकारी शत्रुः । मे मम । प्रद्वारे प्रकृष्टं द्वारं प्रद्वारं तस्मिन् [6]प्रद्वारे प्रकृष्टे [7]अनन्तधनव्ययरचिते दर्शनमात्रादेव जगद्व्यामोहनेऽतिसौन्दर्योपेते द्वारे । करोति त्वामिति शेषः । [8]सर्वत्र तथा । यः शत्रुरगारे गृहे त्वां करोति । तथा [9]यो निवेशने [10]नितरां विशत्यस्मिन्निति निवेशनमुपवेशनशयनादिस्थानं तस्मिन्निवेशने उपवेशनशयनादि-स्थाने त्वां करोति । तथा ये कृत्याकारिणः शत्रवः । मे मम । केशनखे केशाश्च नखानि [11]च तेषां [12]समाहारः केशनखं तस्मिन् केशनखे केशेषु नखेषु चेत्यर्थः[13]। तथा अञ्जने अक्ष्णोरञ्जने कज्जले । तथा दन्तधावने । [14]हे कृत्ये, त्वां कुर्युः । एषां पूर्वोक्तानां सर्वेषामपि कृत्याकारिणां मूर्द्धानं शिरः । स्फोटय अवयवशो विदारय[15] । [16]हे कृत्ये, एषां कुले प्रसिद्धे कुले। यद्वा कुले गृहे । हे कृत्ये, त्वं पदं स्वीयं पदम् । जहि त्यज स्थापय । एषां कुले गृहे वा त्वं सर्वदा तिष्ठेत्यर्थः ॥ ४१ ॥

[17]अथ द्वितीयस्या ऋचोऽर्थः । तत्र पितृगृहानित्यतः समस्तात् पदाद् गृहानिति व्यस्तं कृत्वा पुनर्योज्यम् । तथैव व्याख्यास्यामः । हे प्रतिसर, एषां गृहान् प्रतिधाव । कः कानिव ?

---

१ 'सर्वे····देवास्तम्' इत्यस्य स्थाने 'तं सर्वे देवा ब्रह्मादयः' इति—ख-ग० । २ 'मन्त्ररूपं शब्दब्रह्म' इत्यस्य स्थाने 'परमात्मा मन्त्रो वा' इति—ख-ग० । ३ 'आन्तरं····वर्त्ति' इत्यस्य स्थाने 'अन्तरम् अन्तवर्त्ति शरीरं मध्यवर्त्ति' इति—क० । ४ 'इति' नास्ति—ख-ग० । ५ व्याख्यारम्भे 'अथ युग्मम्' इति—ग० । ६ 'प्रद्वारे प्रकृष्टे' इत्यस्य स्थाने 'प्रकृष्टद्वारे' इति—ख-ग० । ७ 'अनन्त····द्वारे' इत्यस्य स्थाने 'बहुधनेन रचिते' इति—ख-ग० । ८ 'सर्वत्र तथा' नास्ति—ख-ग । ९ 'यः' नास्ति—ख-ग० । १० 'नितरां····स्थाने' इत्यस्य स्थाने 'उपवेशन-शयनादिविहारस्थले' इति—ख-ग० । ११ चेति—ख-ग० । १२ 'समाहारः····नखे' नास्ति—ख-ग० । १३ 'इत्यर्थः । तथा' नास्ति—क० । १४ 'हे कृत्ये' नास्ति—ख-ग०। १५ विदारयेत्यर्थः—ख-ग० । १६ 'हे कृत्ये····तिष्ठेत्यर्थः' नास्ति—ख-ग० । १७ अथ द्वितीयस्याः····कृत्याविशेष एवोच्यते । तेन' नास्ति—ख-ग० ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितृगृहान् कुमार इवेति दण्डान्वयः पूर्वार्द्धर्चस्य। अथ प्रत्यक्षरं व्याख्या। हे प्रतिसर, प्रतिसरशब्देन गले निक्षिप्ताऽऽविकसूत्रदोरकस्थः क्षौमसूत्रदोरकस्थो वा पादद्वयं प्रति सरणशीलः पादपर्यन्तं लम्बमानः पूर्वोक्तसूत्रस्थो व्रीहियवाद्यन्यतमो मणिरेव गृह्यते—"रक्तकृष्णमाविकं क्षौमं वा त्रिमणिं प्रतिसरं ज्ञातयोऽस्या बध्नन्ति नीललोहितमिति" [कौषी० गृ० १।१२] इति शाङ्खायनसूत्रे दर्शनात्। तेन प्रतिसरशब्देन शत्रुवधार्थं निर्मितमध्य (?) स्त्र्याकारकृत्याशब्दवाच्यपुत्तलिका-विशेषगलस्थपादाग्रावलम्बिदोरकस्थो व्रीहियवादिर्मणिरेव निश्चीयते। यद्वा विद्वज्जनैर्विशेषतः प्रोक्तः शाङ्खायनसूत्रवत्। अन्यसूत्रपुराणादिविहितो जिज्ञास्यः। सांप्रदायिकास्तु—प्रतिसरशब्देन शरपुङ्खी। बाणपर्णीत्यपि सैव। उत्तानपर्णापि सैव। सपत्नीबाधसूक्ते—"इमां खनाम्योषधिम्" [अथर्व० ३।१८।१] इत्यादिके परिपठिता। यस्याः पर्णे छिद्यमाने तुल्यं खण्डद्वयं न भवत्येव। एकं शराकारं भवति, अपरं शरपुङ्खाकारम्। प्रतिसरशब्देन सैव शरपुङ्खी गृह्यत इति संप्रदायः। पश्चाद्धर्मरहस्यमीश्वरो वेद। यद्वा येन कृत्या कृता तं प्रतिसरतीति व्युत्पत्त्या प्रतिसरशब्देन वलगशब्दवाच्यः कृत्याविशेष एवोच्यते। तेन हे प्रतिसर कृत्याकारिणं प्रति सरणशील कृत्याविशेष [1]हे वलग। [2]प्रतिधाव [3]एषां कृत्याकारिणां गृहान् प्रति धाव [4]धावनं कुरु। कः कानिव ? पितृगृहान् कुमार इव। कुमारो यथा पितृगृहान् [5]प्रतिधावति तथेत्यर्थः। तदनु किं [6]कर्त्तव्यमित्याह—[7]एषामिति। एषां [8]पूर्वोक्तानां सर्वेषामपि कृत्याकारिणां मूर्द्धानं शिरः। स्फोटय [9]अवयवशो विदारय। वलग-शब्दवाच्ये कृत्ये, एषां कुले प्रसिद्धे कुले। यद्वा कुले गृहे। हे [10]वलगशब्दवाच्ये [11]कृत्ये, त्वं पदं स्वीयं पदम्। जहि त्यज [12]स्थापय। [13]एषां कुले गृहे वा त्वं सर्वदा तिष्ठेत्यर्थः॥ ४२॥

---

१ 'हे वलग' नास्ति—ख-ग०। २ 'प्रतिधाव' नास्ति—क०। ३ 'एषाम्' नास्ति—ख-ग०। ४ 'धावनं कुरु' नास्ति—क०। ५ 'प्रति' नास्ति—क०। ६ तत्राह—ख-ग०। ७ 'एषामिति' नास्ति—क०। ८ पूर्वोक्तानां सर्वेषामपि' इत्यस्य स्थाने 'सर्वेषां पूर्वोक्तानाम्' इति—ख-ग०। ९ अवयवशो···कुले गृहे' नास्ति—ख-ग०। १० 'वलगशब्दवाच्ये' नास्ति—ख-ग०। ११ 'कृत्ये' इत्यस्यानन्तरम् 'एषां कुले' इत्यधिकम्—ख-ग०। १२ स्थापयेत्यर्थः—ख-ग०। १३ 'एषां कुले····तिष्ठेत्यर्थः' नास्ति—ख-ग०।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Published by the Superintendent, Printing and Stationery, U. P. Allahabad.
मुद्रक—पं० वैकुण्ठनाथ भार्गव, आनन्दसागर प्रेस, गायघाट, बनारस १.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kaṇya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar